

This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.


+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`





HARVARD
COLLEGE
LIBRARY

HARVARD COLLEGE
LIBRARY



FROM THE LIBRARY OF

JAMES HAUGHTON WOODS
INSTRUCTOR AND PROFESSOR AT HARVARD
FROM 1900 TO 1935

THE GIFT OF HIS FAMILY
1935

THE

BHAMINIVILASA

OF

PANDITRAJA JAGANNATHA

WITH

A SANSKRIT GLOSS BHUSHANA OF

MAHADEO SURI DIKSHITA PANDITAJA,

WITH

ENGLISH TRANSLATION, NOTES

ON DIFFICULT WORDS, VARIOUS

READINGS AND THE POET'S LIFE

BY

B. G. BAL, B. A.

Assistant Master, Amraoti High School.

Bombay:

GOPAL NARAYEN & Co;

BOOKSELLERS & PUBLISHERS,

1895.

Ind L 720.3

~~Ind L 720.3~~

HARVARD COLLEGE LIBRARY
FROM THE LIBRARY OF
JAMES HAUGHTON WOODS
1935

BOMBAY: PRINTED AT "GOPAL NARAYEN & Co's PRINTING PRESS," FOR THE PROPRIETOR, VENAYEK NARAYEN,
BY R. C. PINGE, HANUMAN LANE.
(Registered under Act XXV of 1867).

PREFACE.

The Bhaminivilas is a very highly interesting poetic composition, divided into four parts, named Prástavikavilas, Shringàrvilas, Karuṇavilas and Shàntavilas. These contain miscellaneous stanzas and present a variety of subjects, in which respects they closely resemble the three Shatakàs of Bhatrihari. To illustrate universal truths by means of personal experience seems to have been the author's motive at heart and so the stanzas are composed to represent various occasions when remarkable events took place in connection with his rise in the royal court of Dhilli, his intellectual superiority over his contemporary rivals, his amorous enjoyments, the loss of his son and wife, and finally his sincere devotion to the Almighty in his advanced life. This is manifest enough from the order of the Vilàsas. Thus in the Anyokti or Prástávikavilas, there appear such of the stanzas as have a direct bearing upon his personal abilities in point of composing poems with success; in point of reverses of fortune, of the influence of wicked persons in the royal court with the consequent disrespect of the learned worthies, of the obliging nature of the good, &c. &c. In the second or Shringáravilàs, the author's mind is busy at work in descerning charms in the three stages of the development of youth (मुग्धावस्था—मध्यमावस्था—प्रौढावस्था) of a damsel, and he describes with cogent force the various mental agitations to which a young damsel is subjected, when she has direct control over her husband; when she waits anxiously for him, after having dressed and decorated herself to the best advantage; when she is disappointed in her love; when she is offended against him by finding that he has been attached to another lady; when she is struck with bitter remorse and re-

proaches herself for having quarreled with him; when her heart is sunk within her on account of separation from him; when she is extremely impatient to see him or when she becomes ready to go to him, having decorated herself and clad in her best apparel. In the third or Karunavilas he deplores the loss of his dear wife and observes that he could not bear the thought of those amorous enjoyments which he once had with her and which he had faithfully made the subject for so many stanzas in his compilation. Her final separation was too much for him. In the last or Shàntavilas his mind is completely set at rest and it is obvious from the fact of his having composed poems to implore Divine mercy for his past sins, to show indomitable courage in pursuing right course of conduct, though heavy misfortunes were threatening to overwhelm him and lastly to advise his tongue to accustom itself to the Godly name Krishna. In short he was so much conscious and proud of what-ever he did in his active life that he declares,

शास्त्राण्याकलितानि नित्यविधयः सर्वेपि संभाविता
विद्वीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ॥
संप्राप्तोज्झितवासनं मधुपरीमध्ये हरिः सेव्यते
सर्वं पंडितराजराजितिलकेनाकारि लोकाधिकम् ॥

2 Thus all the stanzas are arranged under four heads, each of which contains as many of them as answer the notions conveyed by it; on the whole however each stanza is complete in itself and no context can be seen in any of the stanzas whatever; consequently the guiding principle of context is thoroughly absent and it becomes difficult to determine which of the stanzas are genuine or spurious and in such cases whole stanzas might be dropped or interpolated without the least fear of detection. From this point of view it is not difficult to account for the unusual diversity respecting the number of stanzas contained in several editions of Bhaminivilas. The late Professor L. R. Vaidya has however done ample justice to

this part of the work by inserting such of the stanzas and readings as he found in the majority of the six different copies which were carefully collated by him for his edition. I have, therefore, invariably adopted the same readings for my translation, though I am not the less indebted to Pandit Achyutrao Modak for some of his readings. The stanzas which are omitted in this edition, but are seen in the late Professor L. R. Vaidya's edition are given in the footnotes as perhaps, his edition may be the University text.

The compilation of "the Bhaminivilas" has caused a great deal of discussion among its commentators. Nagojibhatta says the poem was composed in anticipation of the illustrations he would have had to give in the Rasagangadhar, a treatise on Alankára Shástra. His argument is that all the stanzas, with the exception of a very few, are found in the Rasagangadhar and so he takes the word प्रबन्ध in the author's stanza at the commencement of the Rasagangadhar to mean only "Bhaminivilas." But as the writer had already published great many works, it seems improbable that he could have exactly foreseen his future short-comings, although he had at command a large number of stanzas in his other works. In my opinion, the stanza at the commencement of the Rasagangadhar and the last one of the Bhaminivilas itself decide the contested point in a great measure. For in the Rasagangadhar the writer says that he begins to write the Alankàra Shàstra after having composed poems, which would serve to exemplify his definitions of alankara. This clearly shows that while composing the Rasagangadhar the author had recourse to his previous works for giving the required illustrations. But wherever his previous stanzás did not serve his purpose, he composed new poems on a variety of subjects for the occasion which, as he says in the last stanza of the Bhaminivilas

दुर्वृत्ता जारजन्मानो हरिष्यंतीति शंकया
नवीयपद्यरत्नानां मंजूषेषा कृतामया ॥ ४५ ॥

he collected together that they might not be plagiarised by other writers.

4 There are many theories put forward to explain the title. One says that the composition was so named because a majority of the stanzas treat of a Bhamini or passionate lady. Professor Táránáth suggests that it must have been named after the poet's wife, but in the opinion of some, just as man derives highest sort of earthly pleasures from the amorous enjoyments when in company with the fair sex, so men of learning whose intellect has a refined appreciation, are highly pleased with the sentiments relating to amorous sports, which are unmistakably brought home to the mind by the graphic description of poets; and since the present compilation does the same conquest, it may adequately be styled as Bhaminivilas.

But it is very difficult to determine which of the theories is correct.

5 For this edition several copies are not collated but it is based upon one compiled by Madhava Pandit, the grandson of the author. The commentary of this tikàkár does not appear to be as learned as that of Nagojibhatta, the commentator of Rasagangadhar. Seeing that mere literal translation of such stanzas, as have an implied sense in a prominent degree, would be of little use, I have tried to bring out the force of such verses by translating them freely but such as could well be literally translated have been so rendered.

Further I beg to say that I have consulted six different commentaries but as different commentaries have different explanations, I have adopted the best according to my view.

But I have, in the main, trusted to Mr. L. R. Vaidya

edition. His edition was in fact my guide and almost enabled me to accept or reject any reading generally, though in every place I had my own choice. The translation was rather hurriedly made in order to put it into the hands of the students in time; so the reader will not, it is hoped, be severe with reference to those mistakes, if any have crept in, that may not be very important. For instance in verse 19 of Vilas first instead of औन्नत्य the word was thought to be औधत्य and so insolence is the word used in the translation in place of nobleness or greatness. There is another thing also to which the attention of the reader must be drawn; in order to make the reader understand the real meaning of a verse and to make it quite intelligible to him, free translation has been taken recourse to; for instance तरङ्गीभङ्गान्प्रकटीकरोषि in 44 Verse of of Prustairkavilas has been translated by "breakest the waves'.

Another thing is that as the students for whom this translation is intended being rather advanced in Sanskrit knowledge, are likely to understand the context of the verses so some words not very important have been omitted; as for instance अर्णव in Verse 41 of the 1st vilas. In short the translation is neither free nor literal but it partakes of both.

Before finishing this preface, let me say a few words about the substantial part of the work that is now presented to the reader. After I accepted the work of translating the Bhaminivilas, other urgent duties called my attention, and my presence being required there, I had to give up the work for some time abruptly, but my word was engaged to Messrs. Gopal Narayen & Co. My friends Mr. A. H. Kher and Mr. P. V. Upadhye have, however, become a source of great relief to me by rendering substantial assistance for the work I had undertaken, for which my heart-felt thanks are due to them. They have also looked over the proof-sheets and carried them through the press, and are therefore entitled to a share of the credit for the work, if any.

7th December 1894.

B. G. Bal.

THE POET'S LIFE.

It is a matter of great satisfaction to find that Jagannath has himself furnished materials, though scanty, to determine his lineage, time, patronage and literary works. Of course in the absence of regular history of the Sanskrit authors that ever flourished at his time, his particulars have to be gleaned from the various works which have come down to us from his pen. His works on Prose and Poetry give a few particulars, without which a trustworthy account of what he was and what he did could not have been possibly framed. There are many traditions about him, which in their nature and points, much resemble a romance. To consult these fictions and write his life is to raise his character beyond anything human. For the tale of his having armed himself with a charmed amulet to defeat Hari Dikshit, the story of the Ganges rising each step in answer to his verse to receive him with his Yavani into her bosom, the fact of his having propitiated a deity, who had conferred upon him her boon for successful controversy—all these fictions represent him as a mythological personage and so they do not rest on solid evidence not being within the limits of physical possibility.

We must therefore discard such thories, improbable to all appearance, and accept such of the traditions as are nearer to the confines of the authentic history and have therefore some foundation in truth. For the inventor of such traditions must have, in his eagerness to applaud the poet's merits, exaggerated the truth, but some truth there must be at the bottom. To prove this. The author of the Bhaminivilas may have been in love with a beautiful Mehomedan lady, but she must not necessarily be a princess so as to carry him as far back as the reign of Akabar. History disprove

this and the inference of the time when he flourished shows this to be impossible. It is therefore worth while to trace his time, parentage and patron with special references to his works which have descended to us at present and this we propose to do in the following few pages.

This renowned Sanskrit poet was a Tailang Brahmin by caste. He sprang from an ancient family of the surname of Veginâd. His father's name was either Perubhatta or Perambhatta and his mother's name Lakshmi.

तैलंगान्ववनंगलालवनशालक्ष्मीवधूलालितः
श्रीमत्पेरमभट्टसूनुरनिशं विद्वल्ललाटंतपः ।
संतुष्टः कमलाविलास कविताकाकुर्व तत्पर्णनं
श्रीमत्पंडितराजपंडितजगन्नाथो व्यधासीदिदम् ॥

प्राणाभरण ९२

(b) "इति श्रीमदखिलभूभवेगिनगरैकुलावतंस "
इस्तालिखितमति (भामिनीविलास "


His hereditary residence was Muganda in Tailangana and he was a very learned Pandit of his time. He had studied all the shastras at Benares under various teachers. He learned Vedánta from Jnyánendrayati; he mastered philosophical systems of Kanada and Gautama under Mahendra; he studied Mimansa under one Khanddeo and acquired a thorough knowledge of Patanjali Mahabhashya from Pandit Veereshwarshesha. Jagannath completed his studies in various shastras under his father and finished his Grammar under Shesha Veereshwar as he confesses in his "Manoramakuchmardan." Commentary on Manorama, BhattojeeDikshit's commentary on his own सिद्धांत कौमुदी. After having mastered so many shastras to the best of his ability he is said to have gone one day to see a prince in the Karnatic, but he was not received there as he had expected. He then composed a few verses expressive of what he felt on being repulsed and tried to present them to the prince, but it availed nothing. He then left Karnatic for Northern India and at Jayapoor he worsted many

of the learned Pandits in controversy and establishing a new school for the study of the shastras, lived there. While he was here he learned Persian to defeat a learned Kaji from the court of Dhilli, who had silenced many of the then Pandids in religious controversy and was going to establish that the faith of Islam was the only faith under the sun. This account is by some supposed to belong to a tradition of his, but as some of his verses, half Sanskrit and half Persian are extant, the fact of his having learned Persian cannot be doubted, and the story is probably true. After this he found favour with the Emperor Shaha Jahan and received from him the title of Panditraja.

He was under the patronage of Dara too for some time as is evident from the eulogiums he had conferred upon him in his "Jagadà-Bharana." But when he was cruelly put to death by Auraguzeb, he retired to Mathura, some say to Banares—to pass the remainder of his life in Divine service, the best part of which he had happily spent in the royal court of Dhilli as a poet Laureate.

His Time:—Nàgeshabhatta is the commentator of "the Rasagangadhar" a treatise on Alankára Shastra by Pandit Jagannathraya, and he is proved to have lived two descents further than Panditraya. The time of Nágeshabhatta is chronologically determined by the अश्वमेध, performed by His Highness Jayasing of Jayapoor. It is therefore quite possible to ascertain the time when Pandit Jagannathraya flourished.

This अश्वमेध a learned Pandit of Jayapoor named Durga Prasàd says took place in 1714 A. D. on this grand occasion Nagojebhatta was sent for to preside at the altar. But he was at the time under the patronage of His Highness Ramraja of Shringawerapura on the banks of the Ganges and had taken a religious vow not to leave Benaras अहंक्षेत्र संन्यासं गृहीत्वा काश्यां स्थितोस्मि अतस्तां परित्यज्य अन्यत्र गन्तुं न शक्नोमि. So he did not attend the sacrifice in question. This clearly goes to prove that Nagojibhatta flourished towards the close of the seventeenth century and at the beginning of the 18th one. Now Nagojeebhatta is only removed two descents further than Pandit Jagannathraya as the following table will show:—



Shesha Shree Krishna, who composed "प्रक्रिया कौमुदी" had one son Shesha Vereshwar.

Shesha Veereshwar and Bhattojee Dikshita received their literary knowledge from him and Bhattoji Dikshit wrote "सिद्धांत कौमुदी." Each of these again taught two pupils, Shesha Veereshwar instrncted Pandit Jagannath and Bhattojee Dikshita prepared his own son Veereshwar Dikshit. Veereshwar Dikshit taught his own son Hari Dikshita who in his turn received Nágesha Bhattu as his pupil.

This proves that Pandit Jagannàthraya and Vereshwar Dikshita the son of Bhattojee Dikshit were contemporaries and that Pandit Jagannattaraya was removed from Nageshabhatta only two descents or degrees back. So deducting some sixty years from 1714, the time of Nageshbatta, we may infer the author of the Bhaminivilas to have flourished between 1620 and 1670.

Now to prove this same fact by reference to History.

The traditions abont Jagannathraya as all traditions, have little foundation. The most current and having the least foundation is that about Lavangi the supposed lovely

daughter of Akabar whose posture is reported to have been described by Jagannathraya (a), and who was given in marriage to the learned poet as a reward for his ready wit at the special request of her, (b) though with great regret.

The detailed history of Akabar does not however give any information as to the veracity of the above tradition.

(a) इयं सुस्तनी मस्तकन्यस्तकुंभा ।
कुसुंभारुणं चारुचेलं वसाना ।
समस्तस्य लोकस्य चेतः प्रवृत्ति ।
गृहीत्वा घटे स्थाप्य वातीव भाति ॥ १ ॥

(b) भयाच्चे गजालिं न वा वाजिराजिं
न चित्तेषु चिन्तं मदीयं कदाचित् ।
इयं सुस्तनी मस्तकन्यस्तकुंभा
लवंगी कुरंगी दृगंगी करोतु ॥ २ ॥
यवनी नवनीतकोमलांगी
शयनीये यदि लभ्यते कदाचित् ।
अवनीतलमेव साधु मन्ये
न वनी माधवनी विनोदहेतुः ।

Besides traditions we have many reliable grounds to fix the date of Jagannathraya Pandit. The fact that he was under the liberal patronage of the Emperor of Dilhi is well determined by his laudatory stanzas referring to the Lord of Delhi (a) as by his own statement in the closing stanzas of the Bhaminivilas. (b)

(a) सुराणामारामादिह झटिति झंझानिलहताः
पतेयुः शार्दीन्द्रा यदि तदखिलो नंदति जनः ।
किमेभिर्वा कार्यं शिव शिव विवेकेन विकलै
श्चिरंजीवन्नास्तामधिधरणिदिल्लीनरपतिः ॥
सृष्टः सृष्टिकृता पुरा किल परित्रातुं जगन्मंडलं
त्वं चंडातप निर्दयं दहसि यत्कस्यालाजदाक्षे. करैः ।
संरंभारुणलोचनो रणभुवि प्रस्थातुकामोऽधुना
आनीतो भवता न हंत विदितो दिल्लीधरो यद्भयः ॥
नाहास्यस्य परोवधिर्निजगृहं गंभीरतायां पिता
रत्नानामहमेक एव भुवने कोवाऽपरो मादृशः ।
इत्येवं परिचिन्त्य मास्म सहसा गर्वोद्धतं गमो
दुग्धाब्धे भवता समो विजयते दिल्लीधरावल्लभः ॥

(b) दिल्लीवल्लभपाणि पल्लवतले नीतं नवीनं वयः ।

Muhammedan records of Akbar's reign make no reference what-ever to Jagannathraya. We have Jagannath's own state-

ment proving that Emperor Shahájáhan conferred on him the title of Pandit rája, (a) and his reference to the names of Jahángir and Shahájáhan in Rasagangádhara.

From this information we can conclude that Jagannáth was chiefly under the patronage of Shahájahan. The poet may have probably seen the latter end of Jahángir. So in the end we can safely say that the poet's prominent carreer lay between 1620 and 1660 A. D.

(a) मूर्तिमतेव नवाबासफखान मनः प्रसादेन द्विजकुलसेवा हेमा क्रिवाहुनः कांचेन नागुरकुलसमुद्भवना राजमुकुंदेनादिष्टेन सार्वभौमश्रीशहाजहांप्रसादाधिगतपंडितराजपदवीविराजितेन तैलंगकुलावतंसेन पंडितजगन्नाथेनासफविलासा रंभयमा कथायिका निर्मीयत ।

Works of Jagannath:—

1. पीयूषलहरीः—generally known as गंगा लहरी, a very pathetic hymn to the most sacred river in India.

2. सुधालहरीः—A short poem devoted to the celebration of the glories of the Sun.

3. अमृतलहरीः—a very short hymn to the Yamoona.

4. करुणालहरीः—a poem in which the poet describes worldly miseries and tries to secure protection from Vishnoo.

5. लक्ष्मी लहरीः—a short poem in praise of Goddess Laxshmee.

All of these five are now recovered and published.

6. यमुनावर्णन चंपूः—this work is partly in prose and partly in verse.

7. रसगंगाधरः—the most important work of the author's. It is a minute, critical, successful and a very able treatise on Alankárashastra.

8. मनोरमा कुचमर्दनः—this is a work on Grammar devoted to a criticism on मनोरमा भट्टोजी दिक्षित commentary on his own सिद्धांत कौमुदी.

9. अभ्यधाटीः—A short poem called after the metre was composed at the request of his grandson Ráma.

रामनाम्नः स्वपौत्रस्य कामनापूरणोत्सुकः
अभ्यधाटीं जगन्नाथो विश्वहृद्यांतरीरचत् ।

10. प्राणाभरणः—a small poem celebrating the prowess and virtues of a potentate of Kámarúpa named Pránanáráyen.

11. जगदाभरणः—a small poem in praise of दारा the eldest son of शहाजहान.

12. भामिनीविलासः—a beautiful poem divided into four parts consisting of unconnected stanzas arranged under four heads. 1 प्रास्ताविकविलास. 2 शृंगार विलास. 3 करुणा विलास. and 4. शांत विलास.

7th December 1894.

B. G. Bal.

श्रीः ।

पण्डितराजजगन्नाथविरचितो-

भामिनीविलासः ।

अन्योक्तिसमुल्लासः ।

(माधुर्यपरमसीमा सारस्वतजलधिमथनसम्भूता ।
पिबतामनल्पसुखदा वसुधायां मम सुधा कविता ॥१॥)

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ॥
इदानीं लोकेस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयति कस्मिन्मृगपतिः ॥१॥

वन्देहं परमेशं नन्दकुमारं व्रजाङ्गनामृग्यम् ॥
कौतुककृत्यकलत्रं बल्लवनटवेषधारिणं विष्णुम् ॥ १ ॥
पण्डितराजकुमारः प्रादुर्भूतोथ योऽपूर्वः ॥
पण्डितराजसुसंज्ञस्तत्पुत्रोहं महादेवः ॥ २ ॥
कुर्वे तद्रचनायाः प्रदीपिकां भामिनीकस्य ॥
विलासवर्यं जानन् प्रोल्लासत्वेन कथयामि ॥ ३ ॥
चतुरः कृताः समुल्लासाः पण्डितराज्ञा सुकवितायाः ॥
पूर्वोन्योक्तिः शतकः सर्वनिगूढार्थपटुकल्पः ॥ ४ ॥

अधुना स्वयं पण्डितराजः कविः कर्ता ग्रन्थस्य परिसमाप्त्यर्थं मङ्गलमारभमाणो दिगन्त इति स्वस्येष्टदेवतास्मरणपूर्वकं प्रारभत् ॥ दिगन्ते दिक्प्रान्ते लोकालोके पर्वते ब्रह्म स्मरा-

---

१ श्लोकोयमेकस्मिन्नेत्र वैद्यमुद्रितपुस्तके ।
२ 'प्रकटयतु' इति प्रायिकः पाठः । अत्र टीकायामपि प्रकटयति इति ।

पुरा सरसि मानसे विकचसारसालिस्खल-
त्पराग्सुरभीकृते पयसि यस्य यातं वयः ॥

मीति शेषो मृग्यः। 'दिगन्तमिति कालाख्यं पदं सर्वत्र वैष्णवम्' इति पुराणोक्तेः । तस्मादत्र मङ्गलं संसाधनीयं विघ्नबाहुल्याच्छिष्याणां नतु गुरूणां, गुरवो यत्कुर्वन्ति तच्छिष्यो नाचरेत्। इति हेतोः कवीनां स्वस्मरणप्रादुर्भावात् कविताबाहुल्यान्निरङ्कुशाः कवयः मत्ताः सन्तो विस्मृताः ।

स्वयमारभ्यतेऽस्माभिर्ग्रन्थो भवतु सार्थकः
महम्मदक्षोणिपतेः सभाविरचितः किल ।

दिगन्त इति । मदमलिनगण्डाः करटिनः । मदेन मलिना दानभ्रष्टा गण्डा येषां ते तथा। गण्डः कटो मदो दानमित्यमरः। तादृशा मदोन्मत्ता इत्यर्थः । करटिनः हस्तिन. । दिगन्ते लोकपालानां लोके । श्रूयन्ते आकर्ण्यन्ते । करिण्यः हस्तिन्य इत्यर्थः । कारुण्यास्पदं स्त्रीषु करुणा भवति सबालत्वात्कामित्वाच्च । तत्केषु पराक्रम्यते । मृगाः हरिणाः। पूर्वमेवासमं न पौरुषयोग्यं शीलं स्वभावं येषां चञ्चलत्वात् रोषत्वाच्च । इदानीं तर्हि लोके संसारेऽस्मिन्दृश्यमाने । पार्थिवे इत्यर्थः। अनुपमा तीक्ष्णा शिखा प्रान्तानि येषां ते तथा तेषां नखानां अयं मृगपतिःसिंहो। सिंहो मृगेन्द्र इत्युक्तत्वात्।पाण्डित्यं।पाटिन्यमिति पाठे पाटनं विदारणं कर्म कस्मिन् प्रकटयति ॥ देवदत्तः यथा पण्डितं पाण्डित्यं कस्मिन् प्रकटयति तद्वत् पाण्डित्यं । अत्र मुक्तादिदर्शनभक्षणादिकं नैव जयादन्यत्र यथा पण्डितसभायां पण्डितजयात् ॥ राजा तुष्टोददातीति तस्मै धनं तद्यशोऽपि गच्छति दिक्षु न तथा मूर्खसभायां इति ज्ञेयं किंतु तत्र पाण्डित्यहानिः प्रश्ननिरुत्तरात् ॥ १ ॥

पुरेति । मानसे सरसि मानसाख्ये सरोवरे पयसि दुग्धो-

स पल्वलजलेधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्त्तताम् ॥ २ ॥
तृष्णालोलविलोचने कलयति प्राचीं चकोरीगणे
मौनं मुञ्चति किंच कैरवकुले कामे धनुर्धुन्वति ॥
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किंनु विधौ विधातुमुचितो धाराधराडम्बरैः ॥३॥

दे वा जले यस्य वयः यातं यस्यायुः पूर्णत्वमागतम् । स एव पल्वलजले पल्वलस्य स्वल्पकारे जले ऽधुना वर्तमानकाले । मिलदनेकभेकाकुले मिलन्तः शब्दायन्तः येऽनेका भेकाः ब्रह्मास्तैराकुले व्याप्ते एतादृशकाकयोग्ये मरालकुलनायकः मराला ये हंसास्तेषां कुलं यूथः तस्मिन्नायकः श्रेष्ठः विधिचतुर इति । यथा ह रसः नायकं तु विजानीयाद्बहुस्वादुरसप्रियमिति प्रामाण्यात् । एतादृशो रतिकामुक इत्यर्थः । रे इति विशेषणं ग्रीष्मे स्वल्पजलत्वात् मृततप्तत्वात् । सूर्यकिरणैः मृगमरीचिकारूपे तत्र जलाभावात् । सन्तापावहे न रमते । यदि स एवात्र रमिष्यति । तर्हि कुतः काको नोपदेशः तत्राह । कीदृशे मानसे मनसश्छत्वे विकचंकचरहितं सारं तेन शालि शोभमानं स्खलत्परागं तेन सुरभीकृते ॥ २ ॥

तृष्णेति ॥ तृष्णया लोले विलोचने चञ्चलनेत्रे प्राचीं पूर्वदिशं कलयति सति प्राप्ते सति ॥ चकोरीणां गणे समूहे किंच कैरवाणां मौनं मुञ्चति त्यज्यमाने सति कामे स्मरे धनुः पुष्पमयं धुन्वति सति ॥ पुनः मानवती मानगर्वितस्त्रीजनेः तस्यमाने प्रस्थातुकामे ॥ गन्तुकामे सपदि तत्क्षणमेव अधुनास्मिन्काले किमु विधौ विधातुं कर्त्तुं कस्मात् कारणादित्यर्थः ॥ धाराधराडम्बर. मेघाडम्बरः ॥ धाराधरो जलधरः तस्या-

अयि दलदरविन्द स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ॥
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥ ४ ॥
अलभत वत बन्धं गन्धमाघ्रातुमागा-
दपि(तदपि) मुक्तो गायति त्वद्यशोलिः ॥
तव सरसिजसर्वंसुंसमादाय वायुः
सुरभिरिति यशस्तु स्वीयमाविष्करोति ॥ ५ ॥

डम्बरः तूर्यरवे गजेन्द्राणां च गर्जिते ॥ इति ॥ अत्र मेघशब्दो ज्ञेयः । स उचित योग्य इति भावः ॥ ३ ॥

अयीति ॥ कोमलामन्त्रणे ॥ हे दलदरविन्द तव स्यन्दमानं प्रस्रुतायमाणं मरन्दं लिहन्तः स्वादयन्तो भृङ्गाः षट्पदाः मञ्जु यथा स्यात्तथा गुञ्जन्तु । दिशि दिशि निरपेक्षः निर्गताऽपेक्षा लोभेच्छा यस्य स तथाऽयं गन्धवाहः अन्यः बान्धवः द्वितीयो बन्धुरित्यर्थः । तावकीनं तवेदं परिमलं विवृण्वन् विशेषं जानन् सन् (गुञ्जतु) दलदरविन्दत्वात् फुल्लत्वात् ॥ ४ ॥

अलभतेति । अयि सरसिज हे कमल तव सर्वस्वं समादाय गन्धमात्रमपहृत्य वायुः सुरभिः लोकैरुपलक्षितस्यादरं सौगंध्यत्वेनेति स्वीयं यशः आविष्करोति प्रकटीकरोति । यथा देवदत्तः स्वीयं धनमपहाय परद्रव्यस्तेयारम्भेण लोके दाता भविष्यति तद्वत् । यदपि अलिः षट्पदः गन्धं आघ्रातुं आगात् मधुपाने सक्तोऽभवत् तदपि बन्धं अलभत् सायन्तनपद्मकुड्मलगतत्वात् । मुक्त इति त्वद्यशो गायति यथा—

---

१ अयं श्लोक एकास्मिन्निखिते टीकापुस्तके एव ।

समुपागतवति देवादवहेलां कुटज मधुकरे मा गाः ॥
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ ६ ॥
तावत्कोकिलविरसान् यापय दिवसान् वनान्तरे निवसन्॥
यावत् मिलदलिमालः कोपि रसालः समुल्लसति ॥ ७ ॥

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोरगते द्विरेफे
मार्त्तण्डमण्डलमखण्डलमाविरासीत् ॥

तदा तस्य यजमानेषु स्वाशीरुदयपरा । यथा देवदत्तः कन्यादाने राजदत्तद्रव्यं शंसते। तदन्यश्चोरो वायुरिति चिन्त्यम् ५

समुपागतवतीति । समीपं प्राप्ते सति । कस्मिन्मधुकरे भ्रमरे कुटजवृक्ष विशेषे दैवाद्भाग्यवशात् अवहेलां अपमानतां मा गाः मावजानासीत्यर्थः । यतोयं मधुकरः मकरन्दतुन्दिलानां सौरभगर्भाणां पुष्टानामपि अरविन्दानां पूज्यतमः । यथा कश्चिद्देवदत्तः महद्भिः सत्कृतो दैवात् कञ्चित् याचते तथा तस्य स्वरूपं सत्कृतमेवेत्याशयः ॥ ६ ॥

तावादिति । हे कोकिल तावत्कालं विरसान् दिवसान् औदास्ययुक्तान् यापय व्यतीतान्कुरु । यावत् मिलदलिमालः मिलन्ती अलीनां भ्रमराणां माला यस्य तथा रसालः कोपि अनिर्वचनीयः समुल्लसति फलिष्यति । यथा रसालः पुरुषो गुणग्राहो भवति तथा देशान्तरादपि गुणिनामागमः स्यात् । तथैव गुणाग्राहिणि लोके मूर्खे सति विरसान् दिवसानेव विदुषां वनान्तरे कोकिलपक्षेऽत्र देशान्तरे इति योज्यम् । सदेशो यत्र जीविका तदन्यं वनमेव दिश्यते इत्यन्योन्योक्तिरिति श्लेषः ॥ ७ ॥

कमलिनि मलिनीकरोषि चेतः
किमिति बकैरवलेहितामभिज्ञैः ॥
परिणतमकरन्दमार्मिकास्ते जगति
जयन्तु चिरायुषो मिलिन्दाः ॥ ८ ॥
नितरां नीचोस्मीति त्वं खेदं कूप मा कदापि कृथाः ॥
अत्यन्तसरसहृदयो यतः परेषां गुणगृहीतासि ॥ ९ ॥

केति । हे कमलिनि त्वं इति अमुना प्रकारेण किं चेतः मलिनीकरोषि इति चित्तमलिनीकरणे को हेतुः अहं जाने यतः अनभिज्ञैः अकोविदैः त्वं अवलेहिता पक्षिविशेषैर्बकैरास्वादिता । अवहेलितेति पाठान्तरं तत्रावज्ञाता । यथा काचिन्नायका जारैरुपहास्यते ततः मलिनी भवति तदपि तदादरत्वे प्रमाणं परिणतेति ॥ परिणतं बहुतरं मकरन्दं तदेव मर्म जानन्ति इति तदभिज्ञा इत्यर्थः ॥ जगति लोके मिलिन्दाः भ्रमराश्चिरायुषः दीर्घायुषः जयन्तु सर्वोत्कृष्टा भवन्तु । यथा नाय कासुखदाः नैयायकाः रसज्ञाः चिरायुषः संतु ततो जाराणां किमनादरेण नायकबहुत्वं च क्षीयते नैवेत्याशयः ॥ का हानिरिति भावः ॥ सतीत्वे जारा एव स्थीयन्त इति ॥ अजा एव पुंसो मर्मज्ञाः इति यावत् (!) ॥ ८ ॥

नितरामिति ॥ हे कूप त्वं नितरामहं नीचोस्मीति खेदं कदापि मा कृथाः । अत्रश्लेषः । हे राजन् भूप कूप इति राज्ञः संबुद्धिः त्वं खेदं मा कृथाः मा कुरु यतः नीचः नीचो मूर्खो विद्यारहितः इति । ज्ञाता अत्यन्तसरसं रसो जलं कूपपक्षे ऽन्यत्र रसाः शृङ्गारादयः ते हृदये यस्य स तथा परेषां गुणगृहीतासि रज्जुग्राहकः । राजपक्षे गुणो विद्यादिस्तद्ग्राहकः ।

१ अवहेलिता इति सांप्रदायिकः पाठः ।

येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ॥
कुब्जे खलु तेनेहा तेने हा मधुकरेण कथम् ॥ १० ॥
अयि मलयज महिमायं कस्य गिरामस्तु विषयस्त ॥
उद्गिरतो यद्गरलं फणिना पुष्णासि परिमलोद्गारैः ११
पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ॥

पण्डितसम्मानीत्याशयः । पण्डितसन्मानात् तद्वासत्पण्डितेनैवापि भूयः पण्डितः सेव्य इति भावः ॥ ९ ॥

येनेति । मधुकरेण अमन्दं । बहु मरन्दं मधु यस्मिन् तस्मिन् दलदरविन्दे फुल्लारविन्दे निशाराहित्याद्दिना न्यनायिषत ॥ व्यतीयाय तेन हा कष्टं कथं कुटजे ईहा चेष्टा इच्छा तेने विस्तृता यथा कश्चिद्देवदत्तः बहुधनसंमानी दिवसोल्लङ्घनः स च कथं तुच्छसेवनाजीवी भूयात् । हा कष्टमिति चात्र कारुण्यरसः १०

अयीति । अयि मलयज हे चन्दनतरो अयं ते महिमा यशः कस्य गिरां वाणीनां विषयः नैव कस्यापि ब्रह्मणेपि ककारः किंशब्दस्य रूपं वा ब्रह्मा कः प्रजापतिरिति यद्वा कं शिरः तस्य विषयः । गिरां सरस्वतीनां मस्तकस्यापि विषयः। तेनाभिष्टुतः स च महिमा यथा यत् यतो हेतोः ।त्वं गरलं विषं उद्गिरन्तः फूत्कारद्योतनेन वह्निवत्तापवहं वायुं निश्वसन्तोपि-पि फणिनः कृष्णदर्वीकराः तान् परिमलोद्गारैः सौगन्ध्योद्गारैः पुष्णासि तापशान्त्या निवर्तयसीत्यर्थः । यथा कश्चित् धनी यशःशायी ब्राह्मणान् शयतोपि पुष्णाति तस्य महत्त्वं लोकान्तिरैरङ्ग तव सन्तद्यशो पूरति जगत् यत ब्रह्मणा गीयते अङ्गीकृतं सुकृतिनः परिपालयन्ति इति प्रामाण्यादिति भावः ॥ ११ ॥

पाटीरेति । हे पाटीर चन्दन तव पटीयान् पटुः चतुरः

यः पिंशतामपि नृणां पिष्टोपि तनोषि परिमलैः पुष्टिं १२
नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ॥
विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः ॥१३॥
उपरि करवालधाराकाराः क्रूराः भुजंगमपुङ्गवात् ॥
अन्तः साक्षाद्राक्षादीक्षागुरवो जयन्ति केपि जनाः १४

परिपाटी परिपाट्यते अनुक्रमते यस्यां सा परिपाटी।परिपाटी त्वनुक्रमः। तां उरीकर्तु को भविता योसौ स्वयं तवानुगामी यथा त्वं यत् यथेति । यः पिंशतामपि धृष्टतां नृणां प्राणवतां पिष्टोपि चन्दन त्वं पुष्टिं शैत्यं तनोषि । तनुविस्तारे । परिमलैः सौरभ्यैः इत्यर्थः । यथा देवदत्तेनाद्दतोपि पुष्टिं तनुते द्रव्यैः । पुत्रेषु पितेव पुत्रैः पिष्टोपि पुत्रवात्सल्यात्याशयः ॥ १२ ॥

नीरेति ॥ हे हंस नीरं क्षीरं च ते जलदुग्धे तयोर्विवेकं भिन्नाभिन्नं तस्मिन्कार्ये त्वमेवालस्यं चेत् यदि तनुषे विस्तारयसि तार्हि अस्मिन्विश्वसिन्नधुना कः पुमान् कुलव्रतं कुलस्य पितृपैतामहस्य परंपरां पालयिष्यति नैवम् ॥ यथा राज्ञो दण्डः यदि न्यायभ्रष्टो भवति तथा कोपि न्यायकृत् न भवति तत्तदधिंकारित्वात् तस्यान्यायमेवायशः ॥ न्यायकार्यं तु बहिर्यशविस्तारकं तथैवायमभिप्रायः ॥ १३ ॥

उपरीति । दृष्टिपथे बहिरित्यर्थः। करवाला याऽसी छुरिकाविशेषः तस्या धारा तदाकारा छिन्नकारित्वाद्धितोपदेशकत्वात् ॥ यदि नो शिक्षिष्यते शिष्यास्तदा तदुपरि क्रोधकारित्वाच्छीक्षाविघातात् भुजगपुङ्गवत् ॥ सर्पकिरणवत् क्रूरवत् क्रूराः ॥ यथा सर्पो विषाग्निना क्रूरो बलापुष्पहरस्तथैवैतेपि शापदातृत्वेन क्रूरास्तामसाः क्रोधिनः अन्तः हृदि साक्षाद्राक्षामाधुर्यं येषां ते तथा दीक्षागुरवः ॥ कर्मठाः केपि स-

स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः ॥
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणात्प्रवीणः ॥ १५ ॥
याते मय्यचिरान्निदाघमिहरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसन्ततिरसौ सन्तापमालाकुला ॥
एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः१६॥

त्रिणो जनाः जयन्ति सर्वोत्कृष्टा भवन्ति यथा गुरूणां महिमा श्लाघ्यो भूयात् तथैवमुक्तः ॥ १४ ॥

स्वच्छन्दमिति । हे दलदरविन्द ते स्वच्छन्दं स्वाधीनं मरन्दं विन्दन्तो मिलिन्दाः भ्रमराः गुञ्जितशब्दं विदधतु कुर्वतु अथ च समीरणादन्यः समीरण इव हरिदन्तराणि दिशामन्तेषु आमोदान् नेतुं गन्धं वाहितुं न प्रवीणोभिज्ञ । स एव वायुः यथा । विदेशादागतो सूरिः विदेशं गतवान् तत्र गत्वा आगतमर्थं संगृह्य देशे देशे दातुर्यशः ख्यापयति नैवाश्रिताः ते तु राजासनमेवमुपाश्रिताः शोभापराः नृपं बहुधनं सूचयंतस्तत्रैव तिष्ठन्ति भ्रमरा इवोपजीविन इत्यन्योक्तेः श्लेषः ॥ १५ ॥

याते मयीति । मयि चिरात् शीघ्रमेव हे निदाघमिहर ग्रीष्मद्युमणे तव ज्वालाशतैः किरणैः शुष्कतां निर्जलतां प्राप्ते सति पान्थानां संततिरसौ मार्गगपङ्क्तिः सन्तापमालाभिः तृड्भिराकुला व्याप्ता कं प्रति जलं प्रति गन्ता गमिष्यति । एवं प्रकारेण यस्य नित्यं वपुः जलं क्षीयते तथा बृहतां नैवेत्याशयः । निरन्तरं अहर्निशं आधिपटलैः मनस्तीव्रतापैः जलमेव मनः तस्मिन्सूर्यतापत्वात् यः क्षयः ततः कारणात् अस्य दृष्टिविषयस्य

आपेदिरेम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ति ॥
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपेतु ॥१७॥
मधुप इव मारुतेऽस्मिन्मा सौरभ लोभमम्बुजिनि मंस्थाः ॥
लोकानामेव मुदे महितोप्यात्मामुनार्थितां नीतः ॥ १८ ॥

मार्गसरसः पन्थकासारस्य जीवनं जलं धन्यं धनिभिर्गम्यं न तु निस्तातत्वेन पूर्णत्वात् आविलत्वं संभाव्यते द्रव्याधीनत्वात् ॥ वारिधीनां सिन्धूनां जनुर्जन्म धिक् दुःप्राप्यत्वाच्च यथा देवदत्तः दयालुः दातापि धनहीनः ॥ कथमार्थितार्पयति तस्मात् शोचनं । प्रतिदिवसं क्षीणः यदि धनागमः ततः पुनर्दानैवार्थतार्पणतामिति वारिधेः संकाशाद्धनिनो राजानः लुब्धास्तेषां जनुर्धिक् । उपेतं न धनं दापयन्ति ॥ १६ ॥

आपेदिर इति । हे सरः त्वयि सङ्कोचं अञ्चति सति शुष्के सति पतङ्गाः पक्षिणः अम्बरपथं आकाशवर्त्म आपेदिरे प्राप्ताः अथ च कमलराहित्यात् भृङ्गाः द्विरेफाः रसालमुकुलानि आम्राङ्कुराणि समाश्रयन्ति तेष्वासक्ता भवन्ति ॥ नु वितर्के दीनदीनः महान् आसक्तः अन्यत्र गतिरहित इत्यर्थः ॥ मीनो मत्स्यः हन्त कष्टं कतामामनिर्वाच्यां गतिं मरणाग्निकामित्यर्थः ॥ कथं अभ्युपेतु प्राप्तो भवतु जलराहित्यादिति ज्ञेयम् । यथा देवदत्तमुपसेवकाः परित्यजन्ति निर्द्रव्यं न तथा बन्धुकलत्रं तत्तु तेनैव सह क्षीणं भवतीति तात्पर्यार्थः ॥ १७ ॥

मधुपइति ॥ हे अम्बुजिनि हे पद्मिनि यथा मधुपे मत्तद्विरेफे सौरभस्य सुगन्धस्य लोभं मंस्था तथास्मिन्मारुते वायौ मा मंस्थाः कुतः अमुना वायुना यतः कारणतो लोकानां जनानां-

गुञ्जति मञ्जुमिलिन्दे मालति मा मौनमुपयासीः ॥
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥१९॥
यैस्त्वं गुणगणवानसि सतां द्विजिह्वैरसेव्यतां नीतः ॥
तानपि वहसि पटीरज किं कथयामस्तवौन्नत्यम् ॥ २० ॥

मेव नैवात्महेतोरित्यर्थः । मुदे हर्षाय महितः पूज्यतमो प्यात्मार्थितां नीतः त्वदादौ सकाशात् अर्थिभावं मैक्ष्यत्वं प्रापितः यथा लक्ष्मी याचयित्वा देवदत्तो दाता भवति । तस्मिन् हे लक्ष्मि मा लोभं मंस्थाः जानीहि ततः अन्यो यो श्रीमदान्धः तस्मिन्यथा कुरुषे तथैव तस्मिन्योग्यमिति भावः । दातरि तु नायुक्तं इति ध्वन्यते चायमाशयः ॥ १८ ॥

गुञ्जतीति । हे मालति त्वं मञ्जु मधुरं यथा स्यात्तथा मिलिन्दे मधुपे गुञ्जति शब्दायमाने सति मौनं मुग्धतां मा उपयासीः । मा प्राप्नासि यतः। वदान्यगुरवः दातृशिरोनम्याः महादानिन इत्यर्थः । सुरतरवः देवद्रुमाः देवदारवो वा शिरसा सादरं ससत्कारं एनं द्विरेफं वहन्ति धारयन्ति । अयं तु मिलितां मालतीमालोक्य देवद्रुमेषु शिरोगतो भवति । तस्य का हानिः तवैव क्षतिरित्यर्थः। यथा देवदत्तः स्त्रीसङ्गी स्त्रियं मानवतीं क्रुद्धां दृष्ट्वा अन्येषु वार्तारसालेषु यथा सज्जते तथा तस्य का हानिः तस्या एवेत्यर्थः ॥ १९ ॥

यैरिति । हे पटीरज चन्दन त्वं गुणगणवान् गुणानां सीतत्वसौरभ्यमाधुर्यादीनां गणः समूहो विद्यते यस्य तथापि त्वं यैर्द्विजिह्वैः सर्पैः सतां असेव्यतां नीतः सेव्यस्याभावः तत्ता तां नीतः प्रापितः यतः संतो सर्ववासात् चन्दनानि न सेव्यन्ते विषसहजकत्वात् तानपि गुणनाशकानपि सर्पान् वहसि तवौन्नत्यमेतत् वयं किं कथयामः अत्युच्चतैवं तवास्ति तां कथयामः नै-

अपनीतपरिमलान्तरकथे पदं न्यस्य देव तरुकुसुमे ॥
पुष्पान्तरेपि गतुं वाञ्छसि चेद् मधुप धन्योसि ॥ २१ ॥
तटिनि चिराय विचारय विन्ध्यभुवस्तव पवित्रायाः ॥
शुष्यन्त्या अपि युक्तं किं खलु रथ्योदकादानम् ॥ २२ ॥

वेत्याशयः । यथा देवदत्तः मादकः मधुपः तस्य दोषारम्भकमपि मदं न त्यक्ष्यते तथापि गुणी स च विगुणेनावृतो महतां बहुगुणत्वान्न त्याज्यः ॥ यथा चन्दनं काष्ठमागतं स्थानभ्रष्टं सेव्यं न तु मलयशैलस्थं सर्पसहकारित्वात् । तथैवायमपि मत्तो जनः मदात्यये शीतलस्वभावत्वात्सेव्यः । न तु मद्यपानावसरे क्रोधारम्भकत्वात् ॥ २० ॥

अपेति ॥ हे मधुप त्वं अपनीतपरिमलान्तरे दूरीकृतं सौगन्ध्यान्तरं येन स्वसौगन्ध्यबाहुल्यात् । तस्मिन् देवतरुकुसुमे देवदारुद्रुमकुसुमे नन्दनभवे वा पदं स्थानं न्यस्य मधुपत्वेन हे मन्न त्वं पुष्पान्तरेऽन्यवृक्षभवे कुसुमे गन्तुं वाञ्छसि तर्हि त्वं धन्योसि तृष्णाबाहुल्यं तवास्तीति भावः । यथा कश्चित् राजोपजीवी धनिनोल्पान्याचते नैव तृष्णामधिगच्छतीत्यन्योक्तिः २१

तटिनीति ॥ हे तटिनि नदि त्वं चिराय विचारय बहुकालं विचारं कुरु । तव रथ्योदकादानं मार्गीयनदानां वर्षाजलजातानां आदानं ग्रहणं किं युक्तं नैवेत्यर्थः । शुष्यन्त्या अपि शोषङ्गतायाः अपि तव विन्ध्यभुवः विन्ध्यो गिरिः भूर्जन्म यस्याः सा तथा पुनर्विशेषयति ॥ अतएव पवित्रायाः पापनाशकायाः खलु

विंशीक विंशयोर्मध्येऽयं श्लोकः पुस्तकान्तरे—

" गाहितमखिलं गहनं परितो दृष्ट्वाथ विटपिनः सर्वे ।
सहकार न प्रपेदे मधुपेन भवत्समं जगति ॥ १ ॥

गाहितं विलोडितम् । गहनं वनम् । सहकार आम्रवृक्षः ।

पत्रफलपुष्पलक्ष्म्या कदाप्यदृष्टं वृतं च खलु शूकैः ॥
उपसर्पेम भवन्तं बर्बुर वद कस्य लोभेन ॥ २३ ॥
एकस्त्वं गहनेस्मिन्कोकिल न कलं कदाचिदपि कुर्याः॥
साजात्यशङ्कयामीन त्वां निघ्नन्ति निर्दयाः काकाः॥२४॥
तरुकुलसुषमापहरां जनयन्तीं जगति जीवजातार्तिम् ॥
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥ २५ ॥

संभावनायां अत्र श्लेषः। काचिन्नायिका बुभुक्षिता सती वेश्याद्वारे भिक्षति तामेवाहेत्याशयः ॥ २२ ॥

पत्रेति। हे बर्बुर कण्टकवृक्ष पत्रपुष्पफलानां लक्ष्म्या शोभया वृतं कदापि अदृष्टं न दृष्टं खलु संभावनायां। शूकैः कण्टकैः वृतं एतादृशं भवन्तं त्वां प्रति कस्य वस्तुनो लोभेन वयं उपसर्पेम समीपमागच्छामः। तत् वद त्वमेव कथय। यथा दुर्जनचेष्टितं स्वाचाररहितं जन्तुं कश्चित् नापयाति तद्वत् ॥ २३ ॥

एक इति। हे कोकिल गहने गम्भीरेऽस्मिन् दृष्टवने कदाचिदपि विस्मृत्वापि कलं मधुराव्यक्तं रवं न कुर्याः। यदि करोषि तर्हि अमी काकाः निर्दयाः निष्करुणाः सन्तो साजात्यशङ्कयासजातित्वशङ्कया न निघ्नन्ति! प्रहरिष्यन्ते एव। यथा पण्डितं मूर्खबान्धवाः। अन्योक्तिः ॥ २४ ॥

तर्विति। हे भवानीतात भवस्य योषिता भवानी तस्यास्तात हे हिमवन् गिरे, त्वं केन गुणेन इमां हिमानीं हिमसंहतिं वहसि धारयसि। इयं कीदृशा। तरुकुलस्य वृक्षसमूहस्य सुषमापहारा सुषमा शोभा तामपहरतीति तथा तादृशीं। पुनः कीदृशीं जगति लोके जीवानां जातं समूहं तस्यार्तिं पीडां जनयन्तीं कुर्वन्तीं। यथा देवदत्तः सर्वोपद्रवां स्त्रियं क्रियते तद्वत् ॥ २५ ॥

कलभ तवान्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः ॥
अपि दानसुन्दराणां द्विपधुर्याणामयं शिरोधार्यः ॥२६॥
अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य ॥
पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती ॥ २७ ॥
पृष्टाः खलु परपुष्टाः परितो दृष्टाश्च विटपिनः सर्वे ॥
माकन्द न प्रपेदे मधुपेन तवापमा जगति ॥ २८ ॥

कलभेति । हे कलभ तवान्तिकमागतमेनं समीपं प्राप्तं अलिं भ्रमरं कदापि माऽवज्ञासीः। अपि पुनः यदि त्वदपमानितोऽसौ दानसुन्दराणां मदोन्मत्तानां शिरसा धार्यते स शिरोधार्यः । द्विपधुर्याणां हस्तिमुख्यानां अयं भ्रमरः मूर्धासक्तो भवति तर्हि तवैव क्षतिस्तु न तस्येत्यभिप्रायः ॥ २६ ॥

अमरेति । अमरतरुः कल्पवृक्षः कुसुमितदेवदारुर्वा तस्य कुसुमस्य सौरभं तस्य सेवनेन सुगन्धाघ्राणेन सम्पूर्णाः सकलाः सर्वे कामा यस्य स तथा पुष्पान्तरसेवा अन्यवृक्षकुसुमगन्ध-ग्राहितेयं दृश्यमाना तृष्णा तस्यैव भ्रमरस्य महती विडम्बना यथा एकोपजीवी तृष्णया ऽन्यानपि धनाढ्यान्सेवते तद्वदन्योक्तिः ॥ २७ ॥

"पुष्पेति । पुष्पान्तरसेवा कमलादीनां स्वादः। इयं दृष्टिगता भ्रमरस्य महती विडम्बना सा काया परितो दृष्टा सैव खलुनिश्चयेन सर्वे विटपिनः वृक्षाः अस्माभिः पृष्टाः किं यत् वृक्षेषु आम्राङ्कुरमेव मधुविशेषमिति । परपुष्टाः कोकिलाः खलु निश्चये सम्भावनायां वा पृष्टाः प्रश्नं कृताः। कथं यत्" 'आम्राङ्कुरास्वादकषायकण्ठः पुंस्कोकिलेयं मधुरं चुकूजे' इति कुमारे दृ-

---

१ पाठभेदोऽत्र पुष्पान्तरसेवेयमित्यादि पूर्वश्लोकार्धं यत्र पठ्यते । २ इयं टीकापि पुष्पान्तरसेवेयमिति पाठं गृहीत्वैव ।

तोयैरल्पैरतिकरुणया भीमभानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ॥
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥२९॥
आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा
वात्याभिः परुषीकृता दशदिशश्चण्डातपो दुःसहः
एवं धुन्वति चम्पकस्य शकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन तोयद कुतोप्याविष्कृतो वेधसा ३०

श्यते तस्मात् । पाठवैकल्प्यमर्द्धस्याह । माकन्द न प्रपेदे मधुपेन तवोपमाजगति । हे माकन्द हे आम्राङ्कुर माकन्दः पिकवल्लभ इत्यमरः। तस्मात्तव उपमा सादृश्यं जगति न प्रपेदे केन मधुपेन मधुपशब्देनयंमद्यपानास्वादी ज्ञेयः ॥ २८ ॥

तोयैरिति । हे मालाकार उद्यानपाल भवता त्वयाऽस्य दृश्यमानस्य तरोः या पुष्टिः प्ररूढाङ्कुरत्वं अल्पैस्तोयैः सिञ्चनादिभिः अतिकरुणया बहुदयया व्यरचि क्रीयते । सा पुष्टिः प्रावृषेण्येन वर्षाभवेन वारिदेन जलदेन वारां जलानां धारासारान् विकिरतापि जलमुचापि बहु यथा भवति तथा वर्षता इह विश्वतः किं जनयितुं शक्यामहर्निशमिति भावः । इयं तु शिञ्चनादिपुष्टिः स्वेच्छाबहुला सा विश्वतः सर्वतोहर्निशं जनयितुं शक्या कर्त्तुं समर्था । यथा पितुर्लालनं पुत्रस्य सर्वदा सुखकरं नत्वन्यस्य मित्रादेस्तस्य स्वार्थपरत्वात् ॥ २९ ॥

आरामेति । आरामाधिपतिः उद्यानपालः विवेकेन विशेषा कला यस्य स विवेकविकलः नूनमिति निश्चये वात्याभिः झी-

---

१ धन्वनि इति प्रचुरः पाठः ।

न यत्र स्थेयानं दधुरतिभयभ्रान्तहृदया
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ॥
स्खलन्मुक्ताभारे भवति परलोकं गतवति
हरेरद्य द्वारे शिवशिव शिवानां कलकलः ॥ ३१ ॥
दधानः प्रेमाणं तरुषु समभावेन विपुलं
न मालाकारोसावकृत करुणां वा लवकुले ॥
अयं तु द्रागुह्यत्कुसुमनिकराणां परिमलै-
र्दिगन्तानातेने मधुपकलझङ्कारभरितान् ॥ ३२ ॥

ष्मवायुविशेषैः दशदिशः परुषीकृताः सरजस्काः कृताः चण्डानपः उग्रधर्मो दुःसह एवं प्रकारेण चम्पकस्य शकले खण्डे कुसुम इति पाठे पुष्पे इत्यर्थः । धुन्वति सति कम्पिते सति संहारहेतावपि सति त्वं अमृतेन जीवनेन सिंचन् हे तोयद हे जलद कुतोपि भाग्यादपि वेधसाविष्कृतः ब्रह्मणा निर्मितः ॥ ३० ॥

नेति । यत्र करटिनः स्थेयानं न दधुः न क्षणमपि तिष्ठन्ति । तत्र भवति त्वयि परलोकं गतवति हेहरे सिंह शिवानां फेरवाणां कलकलः आसीत् । शिवशिव खेदमेव । कीदृशाः गजाः अतिभयेन भ्रान्तं हृदयं येषां ते तथा ॥ पुनः किंभूताः गलद्दानं स्रवन्मदः तस्योद्रेकेणाधिक्येन भ्रमन्तः अलीनां भ्रमराणां कदम्बा येषु ते तथा । कीदृशे भवति स्खलन्मुक्तानां दिग्गजकुम्भीयानां भारं यस्मिन् तस्मिन् मृते । यथा भूपे मृते सर्वाः स्त्रियो रुदन्ति ॥ ३१ ॥

दधान इति । अयं मालाकारः सिञ्चकोद्यानपः तरुषु सम-

---

१ भ्रान्तनयना इति प्रायः पाठः । २ लुठन्मुक्ताभारे पा०।३ विपुलमिति एकस्मिन्पुस्तके ।

मूलं स्थूलमतीव बन्धनदृढं शाखाः शतं मांसला
वासो दुर्गमहीधरे तरुपते कुत्रास्ति भीतिस्तव ॥
एकः किं तु मनागयं जनयति स्वान्ते ममार्धिं[2]ज्वरं
ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः ॥३३॥
ग्रीष्मे ग्रीष्मतरैः करैर्दिनकृता दग्धोपि यश्चातक-
स्त्वां ध्यायन् घनवासरान् कथमपि द्राघ्रीयसो नीतवान्॥
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपां तत्कं प्रति ब्रूमहे ॥ ३४ ॥

भावेन प्रेमाणं दधानः सर्वतरून्यथा सिञ्चति तथैव बालबकुले विपुलं अधिकं यथा स्यात्तथा करुणं सिञ्चन् दयां न अकृत अकरोत् । अयं बकुलस्तु द्राक् किंचित् उद्यन्ति कुसुमानि येषां निकराणां स्तबकानां परिमलैः सौरभ्यैः दिगन्तान्मधुपानां कर्ं झङ्कारं शब्दं तेन भरितान् अधिकशब्दायमानान् तेनेव्यस्तरत् ॥ ३२ ॥

मूलमिति । हे तरुपते ऽश्वत्थ तव भीतिः कुत्रास्ति यस्य मूलं जटा स्थूलम् । अतीवबन्धनदृढं शाखा शतं मांसलाः स्थूलाः विटपाः शतं बहु यथा स्यात् दुर्गमहीधरे वासः सरक्षकगिरौ निवसनं सर्वमेव तथापि एकः घस्मरः भक्षको दावानलः मम स्वान्ते हृदि आधिं जनयति मनाग् किंचित् ज्वालाली ज्वालामाली वलयी वर्तुलः अकरुणो निर्दयो भवन् सन् । यथा राज्ञो मृत्युः ॥ ३३ ॥

ग्रीष्म इति । हे मेघेति शेषः । ग्रीष्मे ग्रीष्मतरैः करैः कि-

---

१ एकः किंनु० इति पाठान्तरम् । २ ममाधिज्वरं इति पाठान्तरम् । ३ ग्रीष्मे भीष्मतरैः पाठान्तरम् ।

दवदहनजटाज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ॥
अयि जलधरशैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोयं श्रीमदस्तावकीनः ॥ २५ ॥

शृण्वन् पुरः परुषगर्जितमस्य हन्त
रे पान्थ विह्वलमना न मनागपि स्याः ॥
विश्वार्तिवारणसमर्पितजीवनोयं
नाकर्णितः किमु सखे भवताम्बुवाहः ॥ २६ ॥

रणैः कृत्वा दग्धोपि दिनकृता सूर्येण यः चातकस्तीककरं पक्षिविशेषः । त्वां ध्यायन् चिन्तयन् वासरान् किलेति वा मेघपाठे घनवासरान् साभ्रदिवसान् कथमपि महता कष्टेन द्राघिष्ठान् अतिशयितान् नीतवान् प्रापितवान् । अथ च दैवात् लोचनगोचरेण दृष्टेर्विषयेण भवता तस्मिन् पक्षिणि यदि इदानीं करकानिपातनकृपां वर्षोपलनिपतनकृपां स्वीचक्रे स्वीकृता ॥ तत्कं प्रति ब्रूमहे कथयामः । वयमिति शेषः ॥ २४ ॥

दवेति । अयीति कोमलामन्त्रणे हे जलधर मेघ तावकीनः भवदीयोयं श्रीमदः किं यत् दवदहनो दावाग्निः तेन जटाला ज्वाला ज्वलच्छिखा तस्या जालेनावरणेन हतानां अत एव परिगलिता त्रुटिता लता वीरुधो येषां तेषां भूरुहाणां बहु यथा स्यात्तथा न वितरसि यथा शैलानां पर्वतानां श्रेणयः पङ्क्तयस्तासां शृङ्गेषु शिखरेषु वितरसि । देवदत्तो धनी यथा पात्रान् दरिद्रान् विहाय कुपात्रेषु ददाति तथा ॥ २५ ॥

शृण्वन्निति । रे पान्थ पुरः अग्रे त्वं अस्य मेघस्य परुषगर्जितं शृण्वन् हन्त खेदे विह्वलं कामासक्तं मनो यस्य स तथा न स्याः मनाक् किञ्चित् विश्वस्यार्तिः पीडा तस्यावारणार्थं समर्पि

सौरभ्यं भुवनत्रयेपि विदितं शैत्यं तु लोकोत्तरं
कीर्त्तिः किंच दिगङ्गनाङ्गणगता किं त्वेतदेकं शृणु ।
सर्वानेव गुणानियं निगिरति श्रीखण्ड ते सुन्दरान्
उज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ३७
नापेक्ष्यं नच दाक्षिण्यं न प्रीतिर्न च संगतिः ॥
तथापि हरते तापं लोकानामुन्नतो घनः ॥ ३८ ॥
समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं
विलासः पद्मायाः सुरहृदयहारी परिमलः ॥

तं जीवनं जलं येन स तथायं अम्बुवाहः मेघः हे सखे भवता किन्नाकर्णितः श्रुतः उ वितर्के ॥ ३६ ॥

सौरभ्यमिति । हे श्रीखण्ड चन्दन सौरभ्यं भुवनत्रयेपि त्रिलोक्येपि विदितं ज्ञातं ते त्वया लोकोत्तरं शैत्यमपि ज्ञातम् । कीर्त्तिश्च दिगङ्गनाः लोकेशस्त्रियः तासां अङ्गणं गृहाजिरं गता प्राप्ता अङ्गरागत्वात् किंतु पादपूरणे एतत् एकं किंगुणं कुत्सितगुणं शृणु त्वं मत्त इति शेषः। खलु सम्भावनायां इयं द्विजिह्वानां सर्पाणां आवली पङ्क्तिः कोटरेषु वृक्षबिलेषु सर्वान् गुणान् शैत्यादीन् एव निगिरति वमति । कीदृशी गरलज्वाला विषाग्निं उज्झन्ती त्यजन्ती । कीदृशांस्तान् सुन्दरान् ॥ ३७ ॥

नापेक्ष्यमिति । अनपेक्षाया भावः । दक्षिणस्य भावोपि । न सङ्गतिश्चापि । न तथापि इच्छारहितत्वादपि हरते किं तापं तप्यते अनेनेति घर्मं । घनो मेघः कीदृशः लोकानां भूरादीनां मध्ये उन्नतः उर्ध्वलोकादागतः वृष्ट इति अर्थः ॥ ३८ ॥

समुत्पत्तिरिति । हे अम्बुज कमल तव समुत्पत्तिः स्वच्छे

---

१ तु इति पाठान्तरम् । २ नापेक्षा पाठान्तरम् । ३ निवसतिः पाठः ।

गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥ ३९ ॥
साकं ग्रावगणैर्लुठन्ति मणयो बालार्कबिम्बो रमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ॥
एवं वीक्ष्य तवाविवेकमपि चे प्रौढां परामुन्नतैः
किं निन्दाम्यथ वा स्तवामि कथय क्षीरार्णव त्वामहम् ४०
किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ॥
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ४१

सरसि निर्मले सरोवरे हरिहस्ते विष्णुकरे पद्मरूपेण निवसनं स्थानं विलासः पद्मायाः लक्ष्म्याः आसनत्वात् सुखकरः परिमलः सुरभिः सुरहृदयहारी देवानामपि कामदः एतैश्चान्यैरपि गुणैर्ललितस्य सुभगस्य तव द्विजोत्तंसे हंसे यदि रतिप्रीतिरति वोन्नतिरुच्यतेयं भवति सर्वपक्षिभ्यो मुख्यत्वात् हंसः अधिकारीति ॥ ३९ ॥

साकमिति । क्षीरार्णव दुग्धसमुद्र तव मणयः ग्रावाणां गणैः पर्वतपुत्रकैः साकं सह लुठन्ति । कीदृशाः मणयः बालार्कबिम्बोपमाः कन्यकातपसङ्काशाः स भगवान्नारायणः नीरे जले चरतीति तै तथा तैः समं सह निद्राति वार्षिकांश्चतुरो मासान् स्वपितीशोमया सहेत्युक्तत्वात् । एतं वीक्ष्य तवाविवेकमपि उन्नतेः निर्मर्यादायाः परां प्रौढां चतुरां गङ्गां च त्वां किं निन्दामि अथ वा स्तवीमि सैव मानवती त्वमेवाभिमानी वा चैतत् सन्देहः । अदृष्टाश्रुतत्वात् ॥ ४० ॥

किमिति । हे अर्णव तावकं सलिलं जलं तृषितानां पिपा-

---

१ ' मणयस्तीरे ऽर्कबिम्बोपमा ' इति पाठान्तरम् । २ ' अथ वा ' इति पाठभेदः ।

इयत्यां सम्पत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि कासार सहसा ॥
निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरं
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥ ४२॥

अयि रोषमुरीकरोषि नो चे-
त्किमपि त्वां प्रति वारिधे वदामः ॥
जलदेन तवार्थिनोऽपि मुक्ता-[1]
न्यपि तोयानि महान्न हा जहासि ॥ ४३ ॥

सितानां जीवानां वदनमपि न प्रतियाति कण्डूषाबाहुल्यात् ॥ तस्मादेतैः ते तव किं प्रयोजनं परमार्थहीनस्य रत्नैः मणिमुक्तादिभिः यस्य खलु संभावनायां खलुः स विसर्गः शून्यद्योतकः सन्तीति तथा दुःप्रापत्वात् नैवेत्यर्थः । यथा दुष्करहीनस्य समुद्रेपि हस्तगताः शंखा एव न तु मौक्तिकमणयः ॥ ४१ ॥

इयत्यामिति । हे कासार तडाग इयत्यां बहव्यां सलिलानां संपत्तावपि सत्यां त्वं अधुना शरद्यपि तृषां न हरसि चेत् यदि तर्हि निदाघे ग्रीष्मे चण्डांशौ सूर्ये परितः सर्वतोऽङ्गारनिकरं किरति सति अङ्गारवद्विकीर्णातपे सति कृशीभूतः अल्पजलः सन् केषां तृषां हरसि । खलु निश्चयेनान्येषां रोगिणां आर्तानामहह दुःखे ज्वरादौ क्षीणजलत्वात् । परिहर्ता ननु वातिकतृप्तिकरजलः । यथा क्षुत्करजलः(?) ॥ ४२ ॥

अयीति । हे वारिधे समुद्र त्वां प्रति वयं वदामः कथयामः । अयि कोमलामन्त्रणे द्वे चेत् यदा त्वं रोषं किमपि किंचिदपि नो उरीकरोषि तर्हि हा कष्टं अन्याभ्यं महान् दाता-

---

१ तवार्थिना विमुक्तामिति पाठभेदः ।

गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥ ३९ ॥
साकं ग्रावगणैर्लुठन्ति मणयो बालार्कबिम्बोपमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ॥
एवं वीक्ष्य तवाविवेकमपि चौढां परामुन्नतेः
किं निन्दाम्यथ वा स्तवामि कथय क्षीरार्णव त्वामहम् ४०
किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ॥
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ४१

सरसि निर्मले सरोवरे हरिहस्ते विष्णुकरे पद्मरूपेण निवसनं स्थानं विलासः पद्मायाः लक्ष्म्याः आसनत्वात् सुखकरः परिमलः सुरभिः सुरहृदयहारी देवानामपि कामदः एतैश्चान्यैरपि गुणैर्ललितस्य सुभगस्य तव द्विजोत्तंसे हंसे यदि रतिप्रीतिरति वोन्नतिरुच्यतेयं भवति सर्वपक्षिभ्यो मुख्यत्वात् हंसः अधिकारीति ॥ ३९ ॥

साकमिति । क्षीरार्णव दुग्ध समुद्र तव मणयः ग्रावाणां गणैः पर्वतपुत्रकैः साकं सह लुठन्ति । कीदृशाः मणयः बालार्कबिम्बोपमाः कन्यर्कातपसङ्काशाः स भगवान्नारायणः नीरे जले चरतीति तै तथा तैः समं सह निद्राति वार्षिकांश्चतुरो मासान् स्वपितीशोमया सहेत्युक्तत्वात् । एतं वीक्ष्य तवाविवेकमपि उन्नतेः निर्मर्यादायाः परां प्रौढां चतुरां गङ्गां च त्वां किं निन्दामि अथ वा स्तवीमि सैव मानवती त्वमेवाभिमानी वा चैतत् सन्देहः । अदृष्टाश्रुतत्वात् ॥ ४० ॥

किमिति । हे अर्णव तावकं सलिलं जलं तृषितानां पिपा-

---

१ ' मणयस्तीरे ऽर्कबिम्बोपमा ' इति पाठान्तरम् । २ ' अथ वा ' इति पाठभेदः ।

इयत्यां सम्पत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि कासार सहसा ॥
निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरं
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥ ४२॥
अयि रोषमुरीकरोषि नो चे-
त्किमपि त्वां प्रति वारिधे वदामः ॥
जलदेन तवार्थिनोऽपि मुक्ता-
न्यपि तोयानि महान्न हा जहासि ॥ ४३ ॥

सितानां जीवानां वदनमपि न प्रतियाति कण्डूषाबाहुल्यात् ॥ तस्मादेतैः ते तव किं प्रयोजनं परमार्थहीनस्य रत्नैः मणिमुक्तादिभिः यस्य खलु संभावनायां खलुः स विसर्गः शून्यद्योतकः सन्तीति तथा दुःप्रापत्वात् नैवेत्यर्थः । यथा दुष्करहीनस्य समुद्रेपि हस्तगताः शंखा एव न तु मौक्तिकमणयः ॥ ४१ ॥

इयत्यामिति । हे कासार तडाग इयत्यां बहव्यां सलिलानां संपत्तावपि सत्यां त्वं अधुना शरद्यपि तृषां न हरसि चेत् यदि तर्हि निदाघे ग्रीष्मे चण्डांशौ सूर्ये परितः सर्वतोऽङ्गारनिकरं किरति सति अङ्गारवद्विकीर्णातपे सति कृशीभूतः अल्पजलः सन् केषां तृषां हरसि । खलु निश्चयेनान्येषां रोगिणां आर्तानामहह दुःखे ज्वरादौ क्षीणजलत्वात् । परिहर्ता ननु वातिकतृप्तिकरजलः । यथा क्षुत्करजलः(?) ॥ ४२ ॥

अयीति । हे वारिधे समुद्र त्वां प्रति वयं वदामः कथयामः । अयि कोमलामन्त्रणे द्वे चेत् यदा त्वं रोषं किमपि किंचिदपि नो उरीकरोषि तर्हि हा कष्टं अन्याय्यं महान् दाता-

---

१ तवार्थिना विमुक्तामिति पाठभेदः ।

न वारयामो भवतीं विशन्तीं
वर्षानदि स्रोतसि जह्नुजायाः ॥
न युक्तमेतत्तु पुरो यदस्या-
स्तरङ्गभङ्गान्प्रकटीकरोषि ॥ ४४ ॥

पौलोमीपतिकानने विलसतां गीर्वाणभूमीरुहां
येनाघ्रातसमुज्झितानि कुसुमान्याजिघ्रिरे निर्जरैः ॥
तस्मिन्वच मधुव्रते विधिवशान्माध्वीकमाकाङ्क्षति
त्वं चेदभ्यसि लोभमम्बुज तदा किं त्वां प्रति ब्रूमहे ४५

मुक्तामृणालपटलीभवितानि पीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ॥

पि त्वं तवार्थिना भिक्षुणा जलदेन मुक्तान्यपि तोयानि जलबिन्दूनि न जहासि तदयोग्यम् ॥ ४३ ॥

नेति । हे वर्षानदि वृष्टजलवहे वयं भवतीं त्वां जह्नुजायाः गङ्गायाः स्रोतासि विशन्तीं प्रविशन्तीं न वारयामो वर्जयामः । यत् एतत् न युक्तं तत् वर्जयामः । किंतु तरङ्गभङ्गान् प्रकटीकरोषि । कस्याः अस्याः गङ्गायाः तरङ्गेषु स्वस्या भङ्गान् तरङ्गान् प्रकटयसि मीलनाभावात् ॥ ४४ ॥

पौलोमीति । मधुव्रते द्विरेफे तस्मिन् माध्वीकं मधु आकांक्षति इच्छति सति हे अम्बुज चेत् त्वं यदि लोभं अभ्यासि प्रकटयसि तदा तर्हि वयं त्वां प्रति किं ब्रूमहे किंवादिष्यामः । नैवं शृणु येन मधुव्रतेन स्वर्गतेनेत्यर्थः । विधिवशात् दैवाधीनात् पौलोम्याः इन्द्राण्याः पतिः इन्द्रः तस्य कानने नन्दनवने गीर्वाणभूमीरुहां देवतरूणां कल्पवृक्षाणामित्यर्थः । आघ्रातानि पूर्वं पुनश्च समुज्झितानि त्यक्तानि कुसुमानि मन्दारोद्भवानि निर्जरैः देवैराजिघ्रिरेऽशुंषि ॥ ४५ ॥

---

१ भवता निपीतान्यानि इति पाठान्तरम् ।

रे राजहंस वद तस्य सरोवरस्य
कृत्ये न केन भवितासि कृतोपकारः ॥ ४६ ॥
प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-
पुञ्जेमञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान् ॥
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामञ्चति
त्वं चेन्मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योस्ति कः ४७
एणीगणेषु गुणगर्वनिमीलिताक्ष
किं कृष्णसार खलु खेलसि काननेस्मिन् ॥
शोभामिमां कलय भिन्नकरीन्द्रकुम्भ-
मुक्तामयीं हरिविहारवसुन्धरायाः ॥ ४८ ॥

मुक्तेति। रे राजहंस त्वया यत्र यस्मिन् सरोवरे मुक्तामृणालः श्वेतमुक्ताफलसदृशः तेन पटलीभवितानि गृहभूतानि अम्बूनि निषेवितानि जलानि संसेवितानि नलिनानि पद्मानि पतितानि जलानि पद्मविशेषणं वा तस्य सरोवरस्य कृतउपकारो येन स तथा केन कृत्येन त्वं भवितासि तद्वद कथय ॥ ४६ ॥

प्रारम्भ इति। हे वञ्चरीक कोकिल कुसुमाकरस्य वसन्तस्य आरम्भे आदौ यस्य आम्रतरोः परितः सर्वतो यस्य उल्लसन्त्यः मञ्जर्यः तासां नवोद्भूतानामंकुरितानां पुञ्जे समूहे मंजुलं यथा स्यात्तथा मधुर गुञ्जितानि रचयन् सन् त्वं तान् पूर्वोद्भूतान् उत्सवान् आतनोः अविस्तरः। तस्मिन् रसालशाखिनि आम्रवृक्षे दैवात् कृशां दशामञ्चति निष्फलपल्लवाङ्कुरत्वात् दीने सति त्वं चेत् विनयं नम्रीभावं मुञ्चसि तर्हि नीचः त्वदन्यः कोस्ति त्वमेवेति भावः ॥ ४७ ॥

एणीति। हे कृष्णसार एणीगणेषु मृगीसमूहेषु गुणेन कस्त

जठरज्वलनज्वलत्प्रपगतशङ्कं सभामतापि पुरः ॥
करिणामरिणा हरिणा हरिणाक्षी हन्यतां नु कथम् ४९

येन भिन्नकरिकुम्भविषज्ज
न्मौक्तिकावलिभिराचिता मही ॥
अद्य तेन हरिणान्तिके कथं
कथ्यतां नु हरिणा पराक्रमः ॥ ५० ॥

स्थितिं नोरे दध्याः क्षणमपि मदान्धेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ॥

रीवलच्छलेन यत् गर्वः तेन निमीलिते अक्षिणी यस्य स त्वं काननेस्मिन् वने खलु खेलसि तथापि वनेत्रैव इमां शोभां कलय पश्य त्वमिति शेषः । कथंभूतां शोभां हरिः सिंहः तस्य विहाराय या वसुन्धरा भूमिः तस्याः सकाशे भिन्नाः करीन्द्राणां कुम्भा यैः तेषां ये मुक्ताः तस्य प्रचुरां सिंहपाटितहस्तिमस्तकरक्तबिन्दुमिलितरजस्कामित्यर्थः ॥ ४८ ॥

जठरेति । करिणामरिणा हस्तिनां वैरिणा शार्दूलेन हरिणा नामालिः पङ्क्तिः कथं नु हन्यतां हन्यतामेवेत्याशयः । कीदृशेन हरिणा जठरज्वलनो बुभुक्षा तेन ज्वलता रसक्षीणेन अपि पादपूरणेपि पुनः अवगताशङ्का भीः यत्र तस्यां यथा स्यात्तथा पुरतः दृष्टेः पथमागता ॥ ४९ ॥

येनेति । येन भिन्नाः करिणां कुम्भास्तेभ्यो विषज्जति मौक्तिकाः येषु तैःकेषांअवलीभिः बिंदुयुक्तमुक्तादामपंक्तियुक्तैः महीअचिता पूजिता तेन हरिणा सिंहेन अद्य हरिणान्तिके मृगसमीपे पराक्रमः कथं नु कथ्यताम् । नैवेत्यर्थः ॥ ५० ॥

स्थितिमिति । हे गजश्रेणीनाथ पङ्क्तिश्रेष्ठ त्वं जटिलायां रक्तमीलितधूल्यां इह वनभुवि रे मूर्ख स्थितिं नोदध्याः मा ति-

असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे मृगपतिः ॥ ५१ ॥
गिरिगह्वरेषु गुरुगर्वगुम्फितो
गजराजपोत न कदापि संचरेः ॥
यदि बुध्यते हरिशिशुस्तनंधयो
भविता करेणुपरिशेषिता मही ॥ ५२ ॥
निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्रापि निदधे॥

ष्ट क्षणमपि मदान्धेक्षण मत्त अद्रवत्वाक्षणमात्रतोपि मृत्युर्भविष्यतीत्याशयः । मत्तस्य पलायनाभावत्वात् । असौ सिंहः कुम्भिभ्रान्त्या गजभ्रमणकरणेन गिरिगर्भे स्वपिति गर्भं इति पाठे गुहायामित्यर्थः । कीदृशः खरा कर्कशा न खरा नखास्तैर्विद्राविता दूरीकृता महागुरवो दीर्घा पाषाणास्तेषां ग्रामः समूहो येन स तथा पुनः कीदृशो मृगपतिरिति पाठे सुगमम् । हरिपतिः सिंहश्रेष्ठः ॥ ५१ ॥

गिरीति । हे गजराजपोत हे गजराजशावक गुरुगर्वेण गुम्फितः महदभिमानी सन् गिरिगह्वरेषु पर्वतानां गुहासु कदापि न सञ्चरेः स्मरणमपहायापि मा चर तृणादिर्वा सञ्चारो वा चरणगतिभक्षणयोः । यत् यदि हरिशिशुः सिंहशावः स्तनंधयशब्देन जागरणाभावात् नेत्रादर्शनत्वाच्च सोपि मृगघ्नः निर्भयः सर्वतो वन्येभ्यः सिंहशीलानुगामी गजमारकः स्यात्तदा करेणुपरिशेषिता हस्तिन्यवशिष्टा यस्यां सा मही भविता निर्गजा भविता भविष्यति ॥ ५२ ॥

---

१ हरिपतिः पाठान्तरम् ।

इदं को जानीते यदयमिह कोणान्तरगतो
जगज्जालं कर्त्ता कुसुमततिसौरभ्यभरितम् ॥ ५३ ॥
यस्मिन् खेलति सर्वतः परिसरत्कल्लोलकोलाहलै-
र्मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ॥
सोयं तुङ्गतिमिङ्गिलाङ्गकदलीकारक्रियाकोविदः
क्रोडे क्रीडतु कस्य केलिकलहत्यक्तार्णवो राघवः ५४॥

निसर्गादिति। कृती कुशलो मालाकारः बकुलमपि पुनः कुत्रापि स्थानान्तरेऽपि शब्दात् । नूतनं च यदा इति लोके निदधे समूलं निक्षिप्य भूमौ समास्थापयत् कीदृशोसौ निसर्गात्पारंपर्येण तरुकुलं वृक्षसमूहं तस्य समारोपे संस्थापने सुकृती सुष्ठु कृतं कर्म यस्य स तथा । इदं को जानीते यदयमिह कोणान्तरगतो कोणान्तरे दिशायां पूर्वस्यां स जले स्थाने क्षिप्तोयं लग्नः अङ्कुरमागतोयं कुसुमततिसौरभ्यं स्मरबाणाख्यपुष्पसन्ततिसौगन्ध्यं तेन भरः भारो जातो यस्य तत् जगज्जालं जङ्गमसमूहं पुरुषप्राधान्यात् घ्राणवेदिन इत्यर्थः । यद्वा जगत्यां भुवि जाता मानुषास्तानलंकरिष्यति इदं भाव्यं कः जानीते नैवेत्यर्थः। यथा देवदत्तः कार्यारम्भी भाव्यं न जानाति यथा कालकार्याज्ञानाच्च ॥ ५३ ॥

यस्मिन्निति ॥ केलिकलहेन लीलाक्रोधेन त्यक्तः तीर्णः अर्णवः क्षाराब्धिर्येन स तथा राघवः रघुवंशोद्भवः श्रीरामः कस्य क्रोडे क्रीडतु कस्यापि हृदि न ममैवेत्याशयः । कीदृशोसौ सोयं तुङ्गतिमिङ्गिलाङ्गकदलीकारक्रियायां दीर्घग्रहशरीररूपकदली रम्भाः तस्याः कारक्रियायां करणक्रियायां निर्जलत्वाजडजातयादसां भावे विदः निपुणः सः कः योसौ चैतादृशः

---

१ यस्मिन्वेल्लति० पा० ।

लूनं मत्तमतङ्गजैः कियदपि छिन्नं तुषारार्दितैः
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ॥
एषा कोणगता मुहुः परिमलैरानन्दयन्ती दिशो
हा कष्टं ललितालवङ्गलतिकादावाग्निना दह्यते ॥ ५५ ॥

यस्मिन् रामचन्द्रे खेलति सति निरायासः खेलः। खिल अपूरणे खेलक्रीडायां वा धातूनामनेकाऽर्थकत्वात् क्रुद्धे सरसि इत्यर्थः। यद्रोषभ्रम इति श्रीभागवते नवमे दृश्यते तस्मिन् सति सर्वतः परिसरत् कल्लोलकोलाहलैः सर्वतः सेनावानरेभ्यः परिसरत् कल्लोलं समीपमागतं शब्दं वानरक्षिप्तगिरीणां रामनामाङ्किता-नामित्यत्र योज्यं तस्य कल्लोलशब्दस्य कोलाहलैः कुतूहलैः कृत्वा विस्मिताः हृदि हरिदन्तावलाः हारितां दिशां दन्तावलाः दन्तैः शुण्डबाहुल्यादबला बलरहिता नात्रागमनक्षमाः भूधारिकत्वात् तत्रैव स्थिताः सन्तो हृदि मानसे मर्मणि वा मन्थाद्रिर्मन्दरः अमृतमथनकत्वात् तस्य भ्रमणं समुद्रमथनं कर्म रत्नैक्यसाधकत्वात् पेदिरे अजानत् ॥ ५४ ॥

लूनमिति । एषा उर्वारितापि वने दग्धे कोणगता कोणगतत्वाददग्धा हा कष्टं मुहुः परिमलैः सौरभ्यैर्दिशो आमोदयन्ती आनन्दयन्ती दिशो मनुष्यान् पवनाधूता दवाग्निना दह्यन्ते ललिता कोमलं शीघ्रं भस्मीभविष्यति । कथं यत् सर्वं काननं वनं पूर्वं क्षीणमेव मत्तमतङ्गजैः बलिष्ठैः करिभिः लूनं उत्पाटितमतः संशुष्कं दाहयोग्यं जातमित्यर्थः पुनः कियत् उर्वारितं तु षारेण शैशिरेणार्दितैः पीडितैः पान्थैरिति शेषः छिन्नं कुठारादिना छित्त्वा धूमायितं अत्र शुष्कस्यैव छेदः नत्वार्द्रस्य छा-

---

१ मत्तगजैः कियत्कियदपि० इत्यपि पाठः ।

स्वर्लोकस्यशिखामणिः सुरतरुग्रामस्य धामाद्भुतं
पौलोमीपुरुहूतयोः परिणतिः पुण्यावलीनामसि ॥
सत्यं नन्दनकिंत्विदं सहृदयैर्नित्यं विधिः प्रार्थ्यते
त्वत्तः खाण्डवरङ्गताण्डवनटो दूरोस्तु वैश्वानरः ॥५६॥
स्वस्वव्यापृतिमग्नमानसतया मत्तो निवृत्ते जने
चञ्चूकोटिविपाटितायसपुटो यास्याम्यहं पञ्जरात् ॥
एवं कीरवरे मनोरथमयं पीयूषमास्वादयत्य-
न्तः संप्रविवेश वारणकराकारः फणी ग्रामणीः ॥५७॥

यानाशत्वात् । शिष्टं तदुर्वरितं ग्रीष्मजभीषणभानुकिरणैर्भस्मीकृतं काननं दृश्यते ॥ ५५ ॥

स्वरिति । हे नन्दन सद्यान त्वं सुरतरूणां पारिजातानां ग्रामस्य समूहस्याद्भुतं साश्चर्यं धाम स्थानं स्वर्लोकस्य शिखा ज्वाला तस्य हरित्वाच्छोकस्य काञ्चनभूमिकत्वात् पौलोमीपुरुहूतयोः शचीन्द्रयोः पुण्यावलीनां धर्मपङ्क्तिरूपशतक्रतूनां परिणतिर्नम्रत्वं वरमित्यर्थः । एतादृशोसि तत्सत्यं किंतु इदं विशेषः सहृदयैः सज्ञानैः विधिः कालः प्रार्थ्यते कल्पान्तकालः किंतु त्वत्तः खाण्डवरङ्गवताण्डवनटः खाण्डवाख्यं नामेन्द्रवनं तस्य रङ्गे नेपथ्ये ताण्डवनटः नृत्यकारी नटः तद्दाहकत्वात् स वैश्वानरः अर्जुनप्रथितोग्निः त्वत्सकाशात् दूरः अस्तु ॥ ५६ ॥

स्वेति । सवारणकराकारः गजशुण्डाकारः फणी ग्रामणीः सर्वएव मृत्युः अन्तः प्रविवेश प्रविष्टोभूत् । कस्मिन् सति स्वस्वव्यापृतिः स्वार्थे धनव्यापारः तस्मिन्मग्नमानसतया लग्नचित्ततया मत्तो निवृत्तेऽन्यत्रगते जनेपुरुषे सति अहं चञ्चूकोटिविपाटितो आयसपुटः पिञ्जरो येन स तथा सन् पञ्जरात् बन्ध-

---

१ फणिग्रामणीरिति पाठान्तरम् ।

रे चाञ्चल्यजुषो मृगाः श्रितनगाः कल्लोल मालाकु-
लामेतामम्बुधिकामिनीं व्यवसिताः संगाहितुं वा कथम्
अत्रैवोच्छलदम्बुनिर्भरमहावर्तैः समावर्त्तितो
यत् ग्राहे च रसातलं पुनरसौ यातो गजग्रामणीः ५८
पिब स्तन्यं पोत त्वमिह किलदन्तावलधिया
इगन्ता नाधत्से किमिति हरिदन्तेषु परुषान् ॥
त्रयाणां लोकानामपि हृदयतापं परिहर
नयं धीरं धीरं ध्वनति नवनीलो जलधरः ॥ ५९ ॥

नात् यास्यामि मुक्तिमेष्यामि एवं कीरवरे शुके मनोरथसमये पीयूषं अमृतं सुखं आस्वादयति सति ॥ ५७ ॥

रइति । रे मूर्खाः चाञ्चल्यजुषः चञ्चलेशे विशीलाः श्रितनगाः पार्वताइत्यर्थः । हे मृगा यूयं एतामम्बुधिवाहिनीं जहुजां कामिनीमिति पाठे सएवार्थः। संगाहितुं विलोडयितुं कथं व्यवसिताः निश्चिताः। कीदृशा यूयं कल्लोलमालाकूर्दना ताभिः भ्रमणवलयैराकुलाः सभ्रमा इत्यर्थः । अत्रैव ग्राहे सति नाट्यां ग्राहे तिमिङ्गिले जाते उच्छलदम्बुनिर्भरमहावर्त्तैस्तरङ्गितजलबहुभ्रमरैः समावर्त्तितः संवेष्टितोसौ चकारात् श्रयत इति गजग्रहे गजेन्द्रमुक्तिः स्मर्यते । पुनरसौ गजग्रामणीर्गजश्रेष्ठः रसातलं यातः मग्नः पुनर्हरिणोल्लिख इति न नु मृग उद्धरयते ॥ ५८ ॥

पिबेति । सिंही पुत्रं कथयति । हे पोत शाव त्वं स्तन्यं पिब किल संभावनायां त्वं इह दन्तावलधिया समीपमागतगजेन्द्रबुद्ध्या इगन्तान् अपाङ्गान् हरिदन्तेषु दिक्प्रान्तेषु किं

---

१ वेतण्डदण्डगण्डाति० इति पाठान्तरम् ।

धीरध्वनिभिरलं ते नीरद मे मासिको गर्भः ॥
उन्मदवारणबुद्ध्या मध्ये जठरं समुच्चलति ॥ ६० ॥
वितुण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना ॥
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ॥६१॥
नीरान्निर्मलतोजानिर्मधुरता रामामुखस्पर्धिनी
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः ॥
सर्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह
त्वं चेत्प्रीतिमुरीकरोषि मधुपे किं त्वां तदा चक्ष्महे ६२

परुषान् कर्कशानाधत्से ऽयं तु नवनीलो जलधरः धीरं धीरं यथा स्यात्तथा ध्वनति शब्दायते किं कुर्वन् त्रयाणां लोकानामपि हृदयतापं परिहरन् दुरीकुर्वन् ॥ ५९ ॥

धीरेति । हे नीरद मेघ धीरध्वनिभिर्मन्द्रगर्जितैः कृत्वा ते त्वया पूर्णं अलं वारणा मे मासिको गर्भः मासेपि सिंहीगर्भो उन्मदवारणबुद्ध्या वचनत्वात् मत्तगजमृत्या पूर्वजानुकारी उग्रवीर्यत्वात् मध्ये जठरं मध्ये इति पश्चाद्योज्यं जठरमध्ये जठरमिति सिद्धं समुच्छलति उत्कूर्दति ॥ ६० ॥

वितुण्डेति । वितुण्डगण्डकण्डूतिपाण्डित्यं ननु नखपाण्डित्यं मृगस्य मुखेनैवाग्रहः । वितुण्डं विरुतं गण्डं कपोलं दंष्ट्रायाः पिधानं तस्य कण्डूतिः । खर्जूस्तस्यां पाण्डित्यं निकण्डूकरणं तस्य परिपन्थिना शत्रुणा किं नु मृगमारणात् दंष्ट्रापि खर्जूमुञ्चति तस्य खर्जूदन्तानां कः सम्बन्धः तदपि हरिणालीषु कः पराक्रमः वर्तते तत्तु कथ्यतां कथयति मृगः सर्व गुणयुक्तो मृगराजस्तस्याग्रेसरत्वात् तस्यैव द्रुतगतिस्पर्द्धयाहतिः इति मृगेन्द्रपराक्रमः ॥ ६१ ॥

नीरादिति । यस्य वासः हरेः करे तत् प्राप्तादपद्मं संबो-

लीलामुकुलितनयनं किं सुखशयनं समातनुषे ॥
परिणामविषमहरिणा करिनायक वर्द्धते वैरम् ॥ ६३ ॥
विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ॥
याताश्चेन्न परायन्ति द्विरदानां रदा इव ॥ ६४ ॥
औदार्यं भुवनत्रयेपि विदितं सम्भूतिरम्भोनिधेः
वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ॥

धयति। अम्भोरुह हेजलज तव जनिर्नीरात् निर्मलतो जलात् जायते। मधुरता पेलवता रामा रमणी सुन्दरी तस्यां मुखं स्पर्द्धयतीति तथास्ति ॥ हरेः विष्णोः करं वासोहर्निशं विष्णुकरे च पद्मं गदा रथाङ्गं जलजोत्तमं चेति भारते। परिमलः गीर्वाणानामपि चेतः हरति काममुद्दीपयति सर्वस्वं सरस्वत्याः प्रसादः तत्तस्मात्पद्मं वा कामस्य च पुनः सर्वस्वं शस्त्रकार्यपौरुषं एतादृशगुणोपि त्वं चेत् मधुपे प्रीतिं करोषि तर्हि वयं त्वा किं आचक्ष्महे नैव वदिष्यामः। किं तु कार्यासक्तं न काश्चिद्भूते ॥ ६२ ॥

लीलेति । हे करिनायक परिणामः विषमो यस्यासौ तथा तादृशेन हरिणा वैरं वर्धते। तस्माल्लीलया मुकुलितमधोन्मीलितनयनं यत्र क्रियायां यथा स्यात्तथा सुखशयनमित्यस्य विशेषणं वा किं समातनुषे मा कुरु इत्यभिप्रायः ॥ ६३ ॥

विदुषामिति । यथा द्विरदानां रदाः बहिर्निर्गता नान्तर्गच्छन्ति। तथा विदुषां वाचः बहिः सहसा ऽविचारेणैव न यान्ति न निर्गच्छन्ति यदि निर्गच्छन्ति तर्हि न परायन्ति न विमुखा भवन्तीत्यर्थः ॥ ६४ ॥

---

१ पराञ्चन्ति इति पाठान्तरम् ।

एवं दातृगुरोर्गुणाः सुरतरोः सर्वेपि लोकोत्तराः
स्यादर्थिप्रकरार्थतर्पणविधौ चैको विवेको यदि ॥ ६५
एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना-
मित्येवं परिचिन्त्य मा स्म मनसि व्याधानुतापं कृथाः ॥
भूपानां भुवनेषु किंच विमलक्षेत्रेषु गूढाशयाः
साधूनामरयो वसन्ति कति नस्त्वत्तुल्यकक्षाः खलाः ६६
विश्वास्य मधुरवचनैः साधून्ये वञ्चयन्ति नम्रतराः ॥
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ६७
अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव कापि रचनावचनावलीनाम् ॥

औदार्येति । भुवनत्रयेपि औदार्यं दानं वित्तं अम्भोनिधेः । सरसः सकाशात् संभूतिः संभवः नन्दनकानने इन्द्रोद्याने वा सोस्ति परिमलः गिर्वाणचेतोहरः सुगमं एवं सुरतरोः दातृणां गुरोः शिक्षकः महादातेत्यभिप्रायः। सर्वे गुणाः लोकोत्तरा देव लोकेऽभिमतत्वादधिकाः एको विवेकः समभावता यदि अर्थिनां भिक्षूणां प्रकरेर्थतार्पणं धनतार्पणं दानं तस्य विधौ स्यात् भवति । अन्यथा तु तस्यैको दोषः ॥ ६५ ॥

एक इति । हे वादिन् त्वत्तुल्याः कक्षा गणना येषांते तथा साधूनामरयः शत्रवः यथा नस्त्वं अस्माकं भवानिव भूपानां भुवनेषु अथ च अयं सुगमं गूढाशयाः अस्पष्टवक्तारः कति न सर्वे एवेत्यर्थः ॥ ६६ ॥

वीति । हे काश्यपि हे भूमे मातः तवापि विवेको ज्ञानं यातः गतः। यस्मात्तानपि दधासि धारयसि। तान् कान् ये मधुरवचनैर्विश्वास्य साधून् वञ्चयन्ति ते खलाः दुष्टास्तान् अपि अपि शब्दात् तेषां धारणे भूभारो ज्ञेयः ॥ ६७ ॥

लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥ ६८ ॥
आपन्नतः खलु महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ॥
कालागरुर्दहनमध्यगतोपि शश्व-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥ ६९ ॥
विश्वाभिरामगुणगौरवगुम्फितानां
रोषोपि निर्मलधियां रमणीय एव ॥

अन्येति । विद्यावतां पण्डितानां गिरां कवितावाचां सकलमेव सर्वमेव दवीयः दीर्घं अन्या मनसः जगद्धितमयी प्रवृत्तिः कर्म करणं अन्यशब्दात् परहितपरत्वं ज्ञेयम् । कापि अन्या द्वितीया वचनावलीनां काव्यानां रचनाकरणमित्यर्थः ॥ लोकोत्तरा लोकाज्जनादुत्तराभ्यधिका कृतिश्च अथ च आकृतिः रूपं आर्तहृद्या दुर्बलसमाश्वासना इति ॥ ६८ ॥

आपदिति । खलु संभावनायां महाशयश्चासौ चक्रवर्त्ती च पण्डितभूप इत्यर्थः ॥ आपन्नतः प्राप्तदरिद्रोपि अकृतपूर्वं उदारभावं दातृत्वं यत् पूर्वं धनव्यापारेण न कृतं तच्छिष्याध्यापनं प्रकटयति विस्तारयति च । यथा कालागरुः अगरुधूपः माङ्गल्यमिति वा दहनोग्निस्तस्य मध्ये ज्वालायां गतः । लोकोत्तरं अधिकं लोकशब्देन मलयो ज्ञेयः तस्मिन्स्थितत्वात्प्रकटीकरोति धूमायते ॥ ६९ ॥

विश्वेति । कस्तूरी कुङ्कुमगन्धं वितृणोति । विश्वमभिरम्यते क्रीडति यैस्ते गुणा विश्वसुखदा इत्यर्थः । तैर्गुणैः कृत्वा गौरवं

---

१ मध्यगतः संमतात् इ० पा० ।

लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥ ७० ॥
लीलालुण्ठितशारदापुरमहासंपद्भराणां पुरो
विद्यासद्मविनिर्गलत्कणमुषो वल्गन्ति चेत्पामराः ॥
अद्यश्वः फणिनां शकुन्तशिशवो दन्तावलानां शशाः
सिंहानां च सुखेन मूर्द्धनि पदं धास्यन्ति शालावृकाः ७१

गुरुत्वं तेन गुम्फितानां गर्वितानां निर्मलधियां कवितार्किकाणां रोषः क्रोधोपि रमणीय एव सुख एव । कथं कटु वामृता भवति गुरूणां शिष्येषु शिक्षाबाहुल्यात् । यथा लोकम्पृणैः परिमलैः परिपूरितस्य लोकतृप्तकारिभिः परिमलैः परिपूरितस्य सर्वतो व्याप्तस्य काश्मीरजस्य । काश्मीरजन्माग्रेशिखामित्यमरः । तस्य कस्तूरी कुङ्कुमस्य न कटुतापि स्वादुतः। कटुरसत्वमपि नितान्तरम्या अतिशय सौरभत्वादानन्दकरीत्यर्थः ॥ ७० ॥

लीलेति । वादं तिरस्करोति । लीलया हेलया लुण्ठितं शारदापुरं सरस्वतीलोकं तस्य महती संपत् लक्ष्मी चमत्काररूपा तस्या भरो येषां भारार्त्ता विदुषस्तेषां कवीनां पुरोविद्यासद्मनि अग्रगतशिष्यशालायां निर्गलत् निःसरत् कणं पदं पदार्थमपि चाणक्ये यत्प्रोक्तं तन्मुषन्ति लुण्ठन्ति ते तथा पामराः अल्पज्ञानाः चेत् बलन्ति शिक्षयन्ति तर्हि अद्यैव अथ वा श्वः प्रातरेव शकुन्तशिशवः पक्षिविशिष्टाः शावाः। शकुन्तौ वाजिपक्षिणावित्यमरः । अत्र पक्षिण एव वैरत्वाद्ग्राहकत्वं । तस्मात्ते फणिनां दर्वीकराणां मूर्द्धनि पदं चरणं धास्यन्तीत्यन्वयः ॥ अथ च दन्तावलानां दिग्गजानां मूर्द्धनि शशाः पदं धास्यन्तीति शालावृकाः क्रोष्टारः सिंहानां मूर्धनि सुखेनेति सर्वत्र

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ॥
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥ ७२ ॥
वहति विषधरान्पटीरजन्मा
शिरसि मशीपटलं दधाति दीपः ॥
विधुरपि भजतेतरां कलङ्कं
पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥७३॥

ज्ञेयः। नतु पौरुषत्वाद्दुःखेन यथा मृगेन्द्रेऽसमर्थे ज्वरादिना तथैवास्मिन्नपि विदुषि मूके सति इत्यर्थः ॥ ७१ ॥

गीर्भिरिति । नराः शिष्याः शिक्षाविशेषात् नरपदं तनुमृगाः बालत्वात्तेषां बुद्धिवत्त्वात् नरशब्दः पुंवाची ज्ञेयः तिरस्कृताः सन्तो महत्त्वं वृद्धत्वं याति तस्मादप्युत्तमां पदवीं प्राप्नुवन्ति ॥ कीदृशाः नराः गुरूणां परुषाक्षराभिः पूर्वं परुषाः शिक्षणताडनतर्जनादित्वात् पश्चादक्षराः अधीताक्षरा यासु तथा ताभिर्गीभिः वाणीरूपाभिः सरस्वतीभिरुपलक्षिताः जातु कदाचिदुपमितौ यथा वा अलब्धशाणोत्कषणा. न लब्धं शाणोत्कषणं वर्षणमज्जनादिकं यैस्ते मणयः नृपाणां राज्ञां मौलौ मुकुटे न वसन्ति न जटिष्यन्ते ऽशोभितत्वात् ॥ ७२ ॥

वहतीति । गुणिषु दोषं समाधत्ते । पाटीरजन्मा चन्दनवृक्षः विषधरान् सर्पान् वहति अङ्गीकृतत्वात् शोभाहानिमपि न जानाति । यतः बहुगुणिषु स्वल्पदोषः नोपद्रवकरः स्यात् । अत आह शिरसि अर्च्चेरुपरि मशीपटलं कज्जलछत्रं दधातीति कः दीपः स्वभावात् प्रकाशी तथापि अग्निजनकत्वात् तस्य निरी-

सत्पूरुषः खलु हिताचरणैरमन्द-
मानन्दयत्यखिललोकमनुक्त एव ॥
आराधितः कथय केन गुणैरुदारै-
रिन्दुर्विकासयति कैरविणीकुलानि ॥७४॥

ङ्गालत्वाद्धूमसंयोगद्योतकः। कारणगुणाः कार्यगुणानारभन्ते इति न्यायात् । अथ च अपि पादपूरणे विधुः सुधांशुः तरांकलङ्कं भजते तरामित्यत्रभिन्नं पदं स्मर्यते । तथैव पिशुनश्चा सौजनश्चेति। पिशुनौ खलसूचकौ। अत्र सूचकः सम्बन्धागमात् । तं जनं मत्सरिणमित्यर्थः । बिभ्रति धारयन्ति पोषणार्थं वा ऽनुगत्वान्मानयन्ति ॥ ७३ ॥

सदिति । सत्पूरुषः खलु हिताचरणैरमन्दमानन्दयतिअखिललोकम् । सर्वं लोकं जनं ज्ञात्वाभिप्रायेणैकवचनं हिताचारैः द्रव्यादिप्रदानैः शेषं सुगमम् । इन्दुश्चन्द्रः केन कृत्वाऽऽराधितः कैरविणीनां कुमुद्वतीनां कुलानि विकासयति प्रफुल्लयति । कीदृशः उदारैर्दातृभिर्गुणैः शीतचन्द्रिकोज्वलादिभिरुपलक्षितः७४

---

१ कैरः इ० पा० । २ ७४ तम ७५ तमयोर्मध्ये इमौ श्लोकौ पुस्तकान्तरयोः ।

कृतमपि महोपकारं पय इव पीत्वानिरातङ्कः ।
प्रत्युत हन्तुं यतते काकोदरसोदरः खलो जगति ॥ १ ॥
पाण्डित्यं परिहृत्य यस्य हि कृते बन्दित्वमालम्बितं
वुष्प्रापं मनसाऽपि यो गुरुतरैः क्लेशैः पदं प्रापितः ।
रूढस्तत्र स चेन्निगीर्य सकलां पूर्वोपकारावलिं
दुष्टः प्रत्यवतिष्ठते तदधुना तस्मै किमाचक्ष्महे ॥ २ ॥

एकस्मिन्पुस्तके चायं श्लोकः—

खलः कापव्यदोषेण दूरेणैव विवर्ज्यते ।
अन्यायशङ्किभिर्लोकैर्विषेणाशीविषो यथा ॥ १ ॥

परार्थव्याससङ्गादुपजहदथस्वार्थपरता-
मभेदैकत्वं यो वहति गुणिभूतेषु सततम् ॥
स्वभावाच्चस्यान्तः स्फुरति ललितोद्दामहिमा
समर्थो यो नित्यं स जयतितरां कोपि पुरुषः॥७५॥
वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ॥
नहि तुम्बीफलविफलो[1] वीणादण्डः प्रयाति महिमानम्७६
अमितगुणोपि पदार्थो लोके दोषेण निन्दितो भवति ॥
निखिलरसायनमहतो गन्धेनोग्रेण लशुन इव ॥ ७७ ॥

परेति । यो नित्यं समर्थः स जयतितरां अतिशयेनेति विराजते स कः यो गुणिभूतेषु गुणवस्तु पुरुषेषु सततं निरन्तरं परार्थव्यासङ्गात् परमार्थहेतोरुपजहदत्याक्षीत् कां । स्वार्थपरतां स्वार्थपरत्वं अभेदैकत्वं । न भेदस्य उच्चनीचज्ञानात्मकस्य एकत्वं एकजात्या सन्मानं स्वभावात् चित्तात् यस्यान्तः हृदि ललितोद्दाममहिमा स्फुरति ललितस्य सुन्दरस्य उद्दाममहन्माहिमा प्रकटी भवति ॥ ७५ ॥

वंशेति । वंशभवो कुलोद्भवः गुणवानपि विद्यावानपि संगविशेषेण पूज्यते कः पुरुषः मनुष्यः तुम्बीफलाभ्यां विफलः वीणादण्डः स तु वंशोद्भवः महिमानं न प्रयाति । हि उपमितिद्योतकम् । स वीणादण्डः गुणवान् निबद्धः ॥ ७६ ॥

अमितेति । अमिताः बहवो गुणा यस्मिन्नसौ पदार्थो वस्तुविशेषः लोके दोषेणाल्पेनापि निन्दितो भवति यथा । लशुनः निखिलाः रसाः धातवस्तेषामयं प्रापणं मौष्टिकादि बहुगुणजन-

---

१ विफली, विकल इति पा० ।

उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ॥
मूर्छां गतो मृतो वा निदर्शनं पारदोत्र रसः ॥ ७८ ॥
वनान्तः खेलन्ती शशकशिशुमालोक्य चकिता
भुजप्रान्तं भर्तुः सपदि भयहर्तुर्विशति या ॥
अहो सेयं सीता दशवदननीता हलरदैः
परीता रक्षोभिः श्रयति विवशा कामपि दशाम् ॥७९॥
पुरो गीर्वाणानां निजभुजबलाहोपुरुषिका-
महोकारङ्कारं पुरभिदि शरं सन्मुखयतः ॥

कं तस्य महतः तेजसः तैक्ष्ण्यादिति उग्रेण गन्धेनैव निन्दितः स्यात् ॥ ७७ ॥

उपेति । सन्तः शुद्धाः स्थिरा गुणा यस्य स पण्डितः आपद्गतोपि उपकारमेव तनुते । मूर्छां गतो भिषग्भिः औषधादिषु क्षिप्तः वाथ वा मृतः सिद्धो रसः पारदः पारं ददातीति पारदः रोगनाशः तत्कारी । रसः सूतश्च पारदइत्यमरः । निदर्शनं नीरुजंकरमित्यर्थः ॥ ७८ ॥

वनान्तरिति । वनस्यान्तः मध्ये पञ्चवटीस्थाने खेलन्ती क्रीडन्ती शशकशिशुं मृगरूपं मारीचं राक्षसं आलोक्य दृष्ट्वा चकिता सती भर्तुः भुजप्रान्तं श्रीरामचन्द्रहृदयं सपदि तत्कालमेव विशति प्रविष्टा या सैवेयं सीता छायारूपिणीत्यर्थः दशवदनेन रावणेन नीता हृता सति हलरदैः दीर्घदन्तैर्हलाकृतिदंष्ट्रायुक्तैरित्यर्थः रक्षोभिः तत्पत्नीभिरिति मृग्यं रक्षोजातित्वात् परीता परिवेष्टिता सति कामपि दशां अनिर्वचनीयामवस्थां श्रयति । कारुण्यरसोत्र ज्ञेयः ॥ ७९ ॥

पुर इति । अहोकारंकारं यथास्यात्तथा इदं करिष्यामि इदं

स्मरस्य स्वर्बालानयनमुखमालार्चनपदं
वपुःसद्यो भालानलभसितजालास्पदमभूत् ॥ ८० ॥
किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोदयः ॥
किं मित्रं सततोपकाररसिकस्तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनासञ्चयः॥८१॥

करिष्यामीति तस्य गीर्वाणाः कार्यकारिणो येषान्ते गीर्वाणादानवारयस्तेषां पुरः अग्रे निजभुजबलस्य स्वबाहुपरिकृतकार्यस्याहोपुरुषिकं स्वकां प्रशंसाम्। अहोपुरुषिका गर्वात् या स्या (सम्भावनात्मनि अमरः । तां शरं च पुरभिदि रुद्रे सन्मुखयति स तथा तस्य स्मरस्य मदनस्य स्वर्बाला दिवपत्न्यः तासां नयनानि मुखानि च तेषां मालाः तासां तन्मुखपङ्क्तीनां अर्चनपदं पूज्यस्थानं लक्ष्मीपुत्रत्वान्नारायणवीर्यत्वात् वपुः शरीरं सद्योभालानलं तृतीयं चक्षुः रुद्रस्याग्निज्वालं क्रोधगुणतमोरूपं तेन भसितं भस्मतुल्यं जालं यथा रुजार्तो जालतुल्यः कृशः कृष्णो रुग्दाहत्वात् तथा स्पदं स्थानं यस्य तादृशमभूत् निश्चेतनमभूत् कथं[1] कुमारसम्भवे दृश्यते । तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकारेति ॥ ८० ॥

किमिति । तीर्थं किं हरिपादपद्मभजनं विष्णुचरणसेवनं पवि-

---

१ अशीतितमैकाशीतितमयोर्मध्येऽयं श्लोकः—

युक्तं सभायां खलु मर्कटानां
शाखातरूणां मृदुलासनानि ।
सुभाषितं चीत्कृतिरातिथेयी
दन्तैर्नखाग्रैश्च विपाटितानि ॥ १ ॥

२ द्वैतान्धकारोत्करः इति पा० ।

निष्णातोपि च वेदान्तैः साधुत्वं नैति दुर्जनः ॥
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ ८२ ॥
नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ॥
शाखिनोन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः ॥८३॥
परोपतर्पणाः सन्तश्चिन्तानलशिखाशतैः ॥
अचुम्बितान्तःकरणाः साधु जीवन्ति पादपाः ॥८४॥

त्रकारि तीर्थं यथा विष्णोः पादोदकं पावनमिति ज्ञेयं रत्नं किं अच्छा मतिः शुद्धबुद्धिः रत्नं शास्त्रस्य धनं किं शास्त्रं यस्य श्रवणेन द्वैतान्धकारोदयः विश्वमन्धतमोरूपप्रादुर्भवः गलति नाशमेति मित्रं किं सततं निरन्तरं उपकारः हितः तस्मिन् रसिकः तत्रसज्ञ इत्यर्थः तत्त्वावबोध तत्त्वज्ञानं यस्य स तथा दुर्वासनासंचयो यस्य कामादिसेवी शत्रुः कः तद्वद हे सखे त्वमिति शेषः मां प्रति कथय ॥ कथयति यो रिपुः स खेदस्य दुःखस्य दाने कुशलः स एव शत्रुः ॥ ८१ ॥

निष्णात इति । दुर्जनः दुष्टो जनो वेदानामपि अन्तैर्निष्णातः प्राप्तपूर्णज्ञानोपि साधोर्भावं नाप्नोति ॥ कथं यथाजलनिधौ समुद्रे मग्नः मैनाकः मृदुत्वं कोमलत्वं नाप्नोति ॥ ८२ ॥

नैर्गुण्यमिति ॥ निर्गुणभावः नैर्गुण्यं मूर्खत्वमेव साधीयः श्रेष्ठं गुणगौरवं गुणबाहुल्यं प्रति धिगस्तु कुतः यतो हेतोः अन्ये शाखिनः निर्गन्धाः विराजन्ते निःछिन्नत्वात् चन्दनद्रुमाः खण्ड्यन्ते घ्नन्ते ॥ ८३ ॥

परेति । परेषां उपतर्पणा फलछायादिजनिता विद्यते येषां ते तथा । चिन्तानलस्य सन्तापाग्नेः शिखायाः अर्चिषःऽसंख्यातैः अचुम्बितं न दग्धमन्तःकरणं येषां ते पादपाः वृक्षाः साधु सार्थकं जीवन्ति ॥ ८४ ॥

शून्योपि च गुणवांस्तमातन्वानः स्वकीयगुणजालैः ॥
विवराणि मुद्रयन् द्रागूर्णायुरिव सज्जनो जयति॥८५
खलः सज्जनकार्पासभक्षणैकहुताशनः ॥
परदुःखाग्निशमनो मारुतः केन वर्ण्यते ॥ ८६ ॥
परगुह्यगुप्तिनिपुणं गुणमयमखिलैः समीहितं नितराम् ॥
ललिताम्बरइव सज्जनमाखव इव दूषयन्ति खराः ॥८७ ॥

शून्य इति । शून्योपि गुणरहितोपि गुणवांस्तमातन्वानः गुणतन्तुविस्तारी स्वकीयगुणानां जालैः समूहैः विवराणि मुद्रयन् द्राक् किंचित् उर्णायुः ऊर्णुते व्याप्नोति स तथा मर्कटिकाकीटविशेषः स इव सज्जनो जयति ॥ ८५ ॥

खलइति । खलः दुष्टः सज्जन एव कार्पासः तस्य भक्षणे एको मुख्यो हुताशनोग्निः यस्य दुःखं अग्निं तं शमयति स तथा मारुतः केन वर्ण्यते न केनापि तत्राह केनापि अनिर्वचनीयेन कालेन शत्रुमरणात् तत् दुःखोपशम इति ज्ञेयम् । मारुतस्य कालाङ्गत्वात् ॥ ८६ ॥

परेति । खलाः खराः गर्दभतुल्याः रलयोरेकत्वात् खराः दुष्टाः सज्जनं दूषयन्ति । आखवो मूषकाः ललिताम्बरं बहुमौल्यं वस्त्रं आछिन्दन्ति इवेत्युपमालङ्कारः । कीदृशं परगुह्यगुप्तिनिपुणं परं अधिकं गुह्यं गोप्यं रहस्यमित्यर्थः । यद्वा गुह्यं उपस्थं तस्य गुप्तिः गोपनं रक्षणं च । रहस्योपस्थयोर्गुह्यमित्यमरः । तस्य गुप्तौ निपुणं चतुरं तथापि गुणमयं सूत्रवत्तन्तुणं संयुतं उभयविशेषणं सर्वैः नितरां समीहितं वाञ्छितम् ॥८७॥

---

१ शून्योपि च गुणवत्तामिति पा० ।

यशःसौरभ्यलशुनः शान्तिशैत्यहुताशनः ॥
कारुण्यकुसुमाकाशः खलः सज्जनदुःखदः ॥ ८८ ॥

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ॥
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोस्तु ॥ ८९ ॥

हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बति च प्रकामम् ॥
व्यालाधिपं च यतते परिबद्धमद्धा
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥ ९० ॥

यश इति । सज्जनाय दुःखं ददाति स तथा खलः दुर्जनः कारुण्यस्य कुसुमं आकाशं यस्य यथाकाशः प्राप्तिदुर्लभः तथैवास्य करुणाङ्कुरं न प्राप्यत इति भावः ॥ कीदृशोसौ यशः सौरभ्ये लशुनः अयशोरूपवत् प्रकटिताप्रशंसाभावात् निषिद्धः पुनः कीदृशः शान्तिशैत्ये स्वस्थचित्ततायां हुताशनः क्रोधवत्वात् दहन इति भावः ॥ ८८ ॥

धत्त इति । यो वृक्षः कुसुमानि पत्राणि फलानि तेषामावल्यः पङ्क्तयस्तेषां भरं भारं धत्ते धारयतीत्यर्थः ॥ घर्मव्यथां शीतभवां रुजं च यो वहति प्राप्नोति यो देहमन्यसुखस्य हेतोरर्पयति छायादिना परैक्यसुखकारी यो वृक्षस्तस्मै वदान्यानां दानिनां गुरवे श्रेष्ठाय शिक्षकाय च वा नमोऽस्तु नमः एवास्योपकृतिः ॥ ८९ ॥

हालाहलमिति । यो नरः दुर्जनं वशयितुं स्ववशीकर्तुं मनीषां तनुते विस्तृतबुद्धिः स्यात् ॥ सः खलु पादपूरणे कौतुकेन

दीनानामिह परिहाय शुष्कसस्याः
नौदार्यं प्रकटयतो महीधरेषु ॥
औन्नत्यं विपुलमवाप्य दुर्मदस्य
ज्ञातोयं जलधर तावको विवेकः ॥ ९१ ॥
गिरयो गुरवस्तेभ्यो पूर्वी गुर्वी ततोपि जगदण्डम् ॥
तस्मादप्यतिगुरवः प्रलयेप्यचलात्मनः[1] सन्तः ॥ ९२ ॥
व्योमनि शं वा कुरुते चित्रं निर्मांति यत्नतः सलिले ॥

विवादाज्ञानेन हालाहलं विषं पिपासति पिबतुमिच्छति प्रकामं नितरां काकुस्थानलं अग्निं परिचुचुम्बति भक्षयति च पुनरर्थेऽन्हा प्रत्यक्षं व्यालाधिपं वासुकिसर्पं परिबद्धुं यतते यत्नं करोति ॥ ९० ॥

दीनानामिति । हे जलधर । धाराधर मया तावकस्त्वदीयो विवेकः ज्ञातः किंकृत्य इह जगति दीनानां दरिद्राणां शुष्कान् सस्यान् धान्यक्षेत्रान् अपहाय त्यक्त्वा महीधरेषु पर्वतेषु औदार्यं दातृभावं प्रकटयतः दुर्मदस्यऽभ्रमातङ्गस्य विपुलं औन्नत्यं उन्नतं भावं प्राप्य ॥ ९१ ॥

गिरय इति । गिरयः पर्वताः गुरवः श्रेष्ठाः महान्तः तेभ्यो महती भूमिः ततः भूमेः महत् जगदण्डं चतुर्दशलोकात्मकं ब्रह्माण्डमित्यर्थः । तस्मादपि अपि शब्दात् परंपरा ज्ञेया गुरवः ॥ अतिगुरवः अतिक्रान्ताः जिताः गुरवो यैस्ते सन्तः विद्यावन्तः प्रलयेपि न चलः आत्मा देहो यस्य स तथा तस्य विष्णोर्भक्त इति शेषः ॥ ९२ ॥

व्योमेति ॥ यस्तु खले सत्कारं चरति सः व्योम आकाशं

---

१ महात्मनः । पा० ।

स्नपयति पवनं सलिलैर्यस्तु स्थले चरति सत्कारम् ॥९३॥
हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ॥
लेढि जिघ्रति संक्षिप्य करोत्युन्नतमाननम् ॥ ९४ ॥
मलिनेपि रागपूर्णां विकसितवदनामनल्पजल्पेपि ॥
त्वयि चपलेपि च सरसां भ्रमरकथं वा सरोजिनीं त्यजसि९५

स्वार्थं धनानि धनिकात् प्रतिगृह्णतो य
दास्यं भजेन्मलिनतां किमिदं विचित्रम् ॥
गृह्णन् परार्थमपि वारिनिधेः पयोपि
मेघोयमेति सकलोपि[3] च कालिमानम् ॥ ९६ ॥

निर्शकुरुते कृष्णवर्णत्वात् नभ एव रात्रिं मन्यते यत्नतः स-
लिले चित्रं निर्माति चित्रनिर्माणं करोति सलिलैर्जलैः पवनं स्न-
पयति स्नानं कारयति। तदा विडम्बनमेवाज्ञानत्वादित्याशयः ९३
हारमिति । सुगमम् ॥ ९४ ॥

मलिन इति ॥ त्वयि मलिने कृष्णेपि रागेण स्नेहेन पूर्णां
त्वयि अनल्पं बहु जल्पते सं तथाविधेपि त्वयि विकसितं व-
दनं यस्याः सा तथा तां हसन्मुखीमित्यर्थः ॥ त्वयि चपले च-
ञ्चलेपि सरसां रसयुक्तां हे भ्रमर तां सरोजिनीं नायकां कथं
त्वं वाशब्दात् निरादरो ज्ञेयः त्यजसि त्यागं करोषि तस्मात्त
वैवायमपराधः ॥ नतु तस्या इति चिन्त्यम् ॥ ९५ ॥

स्वार्थमिति ॥ हे सखे स्वार्थं ननु परमार्थं घनिकात् घनिनः
सकाशात् धनानि प्रतिगृह्णतः ॥ आस्यं मुखं यत् यस्मात् का-
रणात् मलिनतां त्यजेत् मालिन्यमासेवेत् किं तत् विचित्रं यत्

---

१ स्नपयति रेखाः सलिले इ० पु० पा० । २ आसनम् इति पाठः । ३ सकलः किलकालिमानम् । इ० पा० ।

जनकः सानुविशेषो जातिः काष्ठं भुजङ्गमैः सङ्गः ॥
स्वगुणैरेव पटीरज यातोसि तथापि महिमानम् ॥९७॥
कस्मै हन्त फलाय सज्जनगुणग्रामार्जने सज्जसि
स्वात्मोपस्करणाय चेन्मम वचः पथ्यं समाकर्णय ॥
ये भावा हृदयं हरन्ति नितरां शोभाभरैः संभृता-
स्तैरेवास्य कलेः कलेवरपुषो दैन्यं दिनं वर्तते ॥९८॥
धूमायिता दशदिशो दलितारविन्दा
देहं दहन्ति दहना इव गन्धवाहाः ॥

गृह्णन् परार्थमपि मेघः वारिनिधेः समुद्रस्य पयो जलं अपिशब्दात् ननलवान् कालिमावान् किंतु अयमेव सकलोपि सर्वरूपोपि सजलः सन् कालिमानं श्यामत्वं भजते ॥ ९६ ॥

जनक इति । हे पटीरज चन्दन तव जनकः तातः सानुविशेषो मलयनामा गिरिः । जातिः काष्ठं वृक्षजातित्वात् । भुजङ्गमैः सङ्गः सुगमं । स्वगुणैरेव महिमानं यातोसि ॥ तथापिशब्दात् सर्वं उत्पत्तिकदोषत्वात् ॥ ९७ ॥

कस्मा इति । हे सज्जन कस्मै फलाय फलहेतोः गुणानां ग्रामः तस्यार्जनैः संपादनैः सक्तो भवसि चेत् स्वात्मनः उपस्करणं तस्मै स्वसन्मानाय तर्हि हन्त महत्कष्टं यथा मम वचः आकर्णय त्वं शृणु । ये भावाः भवज्जन्मनो जाताः नितरां शोभाभरैः संभृताः शोभारूपा लक्ष्मीः तस्या भरैः। आधिक्याडम्बरैः राजोपलक्षणैश्चामरव्यजनादिभिः सम्यक् भृताः पोषिताः रक्षिता इत्यर्थः । राज्ञां सेनावृतत्वात् ॥ तैः धनिभिः कलेवरपुषो स्वशरीरवृद्धिकारिणः कलेर्युगस्य।स्यात् कलिः कलहे युगे, चतुर्थेपि युगे कलिः। तस्मादस्य तैः कृत्वा दैन्यं दिनं दारिद्र्यं दिनं कालक्षेपमित्यर्थः । वर्तते ऽत्र कालो भक्षकः तेषां निर्दय-

---

१ वर्तनम् इ० पा० ।

त्वामन्तरेण मृदुलाम्रदलाग्र मञ्जु-
गुञ्जन्मधुव्रत मधो किल कोकिलस्य ॥ ९९ ॥
भिन्ना महागिरिशिलाः करजाग्रजाग्र-
दुद्दामशौर्यनिकरैः करटिभ्रमेण ॥
देवे पराचि हरिणा करिणा तथापि
कुत्रापि नापि लिलिहे पिशितस्य लेशः॥१००॥

हृदयाणां निर्दातृशीलानां धनिनां भक्षणेनापि न तृप्यते कुतः पापजीवत्वादल्पत्वाच्च तस्मात्त्वादृक्पुरुषस्य सेवा न फलिष्यति यतोसौ कालान्नरूप इति भावः । धर्मश्चायुर्विन्दतीति श्रुतेः ॥ ९८ ॥

धूमायितेति । वसन्तं वर्णयति । दश दिशो धूमायिताः सधूमा जाताः कीदृशाः दलितानि अरविन्दानि यासु ताः देहं दहन्ति । दहना इव तप्ताः वैशाखसूर्यत्वात् गन्धवाहाः पवनाः स्फुटत्सरोजत्वात् कोकिलस्य अध इति तस्मिन्नारूढे सति त्वं तस्याधोभागे तत्सहितमित्यर्थः। त्वामन्तरेण त्वया विना सर्वएव सुगन्धिपवना धूमायिताः दधिष्यन्ते?कामागतत्वात् इति चिन्त्यं हे मृदुलं आम्रदलं फलपल्लवं यस्य स तथा तादृशः आम्रः नूतनवृक्षः सम्बुद्धौ हे शब्दः प्राक् ज्ञेयः । हे मृदुलाम्रदलाग्र कीदृशं त्वां मञ्जु गुञ्जन् मधु मद्यं तस्मिन्व्रतो अस्य कोकिल एव द्विरेफो वा गुञ्जन् मधुव्रतो यस्मिन्स तथा तं कोमलकुहूरुत्कोकिलं मत्तमधुपं वा (?) ॥ ९९ ॥

भिन्ना इति । देवे पराचि सति प्रतिकूले सति हरिणा सिंहेन करटिभ्रमेण मत्तगजभ्रान्त्या महागिरिशिलाः भिन्नाः मेघा-

---

१ मृदुताम्रदलाग्रमञ्जुगुञ्जन्मधुव्रत मधो इत्येव पाठोयुक्तः । हे मृदूनि-ताम्राणि दलानि येषां ते च ते आम्राः तेषु मञ्जु मञ्जुलं गुञ्जतः मधुव्रता यस्मिन्नेतादृश मधो कोकिलस्य त्वां विना संबन्ध सामान्ये षष्ठी। शेषस्पष्टम् ।

गर्जितमाकर्ण्य मनागङ्के मातुर्निशार्द्धजातोपि ॥
हरिशिशुरुत्पतितुं द्रागङ्गान्याकुञ्च्य लीयते निभृतम् १

इति श्रीभामिनीविलासे पण्डितरायजगन्नाथविरचिते ऽन्योक्ति शतकः (समुल्लासो वा) प्रथमः समाप्तः ।

रूढत्वात् धूमायितत्वाच्च मेघगर्जितशङ्कया विदारणे कुत्रापि अपि पुनः पिशितस्य लेशः मांसखण्डोपि न लिलिहे नास्वादितः करिणां हस्तिनां । तेषां मांसे स्वादु परिचयात् । कैः करजाग्रे जाग्रत् उद्दामशौर्यं उद्भटशूरत्वं तस्य निकरैः प्रहाररूपैः समूहैः ॥ १०० ॥

गर्जितमिति । मनाक् किंचित् गर्जितमाकर्ण्य मातुरङ्के निशार्द्धजातोपि हरिशिशुः द्राक् उत्पतितुं अवयवान्याकुञ्च्य किंचित् संकुलीयते निभृतं यथा भवति तथा ॥ १ ॥

इति श्रीमहादेवकृतायां भामिनीविलासप्रदीपिकायामन्योक्तिः प्रथमःसमुल्लासः ॥ १ ॥

---

१ अथ समाप्तावियमेऽधिकाः श्लोकाः—

किमहं वदामि खल दिव्यतमम् गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनाद् यदहर्निशं न खलु विस्मरसि ॥ १ ॥
रे खल तव खलु चरितं विदुषां मध्ये विविच्य वक्ष्यामि ।
अथवालं पापात्मन् कृतया कृपयापि ते हतया ॥ २ ॥
आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥ ३ ॥
खलास्तु कुशलाः साधुहितप्रत्यूहकर्म्मणि ।
निपुणाः फणिनः प्राणानपहर्तुं निरागसाम् ॥ ४ ॥
वदने विनिवेशिता भुजङ्गी पिशुनानां रसनामिषेण धात्रा ।
अनया कथमन्यथावलीढा नहि जीवन्ति जना मनागसन्त्राः॥ ॥ ५ ॥
कृतं महोन्नतं कृत्यमर्जितश्चामलं यशः ।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः ॥ ६ ॥

आविरतं परकार्य्यकृतां सतां मधुरिमातिशयेन वचोऽमृतम् ।
अपि च मानसमम्बुनिधिर्यशोविमलशारदपार्व्वणचन्द्रिका ॥ ७ ॥

" एत्य कुसुमाकरो मे सञ्जीवयिता गिरं चिरं मग्नाम् ।
इति चिन्तवतो हृदये पिकस्य समधायि शौभिकेन शरः " ॥८॥

निर्गुणः शोभते नैव विपुलाडम्बरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभिता शाल्मलिर्यथा ॥ ९ ॥

पङ्क्तिर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥ १० ॥

तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्म्मिकः को मरन्दानामन्तरेण मधुव्रतम् ॥ ११ ॥

सरजस्कां पाण्डुवर्णां कण्टकप्रकरान्विताम् ।
केतकीं सेवसे हन्त कथं रोलम्ब निस्त्रप ॥ १२ ॥

यथा तानं विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥ १३ ॥

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्य्याः शपथेन विभाव्यते ॥ १४ ॥

अपि बत गुरुगर्वं मा स्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकममुनैव प्राणहीनं करोषि ॥ १५ ॥

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघञ्चुलुकीकरोति ।
भूतेषु किञ्च करुणां बहुलीकरोति
सङ्गः सतां किमु न मङ्गलमातनोति ॥ १६ ॥

अनवरतपरोपकारव्यग्रोभवदमलचेतसां महताम् ।
आपातकाटवानि स्फुरन्ति वचनानि भेषजानीव ॥ १७ ॥

व्यागुञ्जन्मधुकरपुञ्जमञ्जुगीतान्याकर्ण्य श्रुतिमपजालयातिरेकात् ।
आभूमीतलनतकन्धराणि मन्येऽरण्येऽस्मिन्नवनिरुहां कुटुम्बकानि ॥१८॥

मृतस्य लिप्सा कृपणस्य दित्सा विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री विधातृसृष्टौ न हि दृष्टपूर्वा ॥ १९ ॥

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
राजप्रियाः कैरविण्यो रमन्ते मधुपैः सह ॥ १२० ॥

—००—

न मनागपि राहुरोषशङ्का
न कलङ्कावगमो न पाण्डुभावः ॥
परिचीयत एव कापि शोभा
परितो भामिनी ते मुखस्य नित्यम् ॥ १ ॥

भामिनीकुचयुगान्तरमध्ये प्रादुरास किल यः कविः पुरा ।
सोहमद्य कविताप्रदीपिकां स्थापये विबुधरागसेविनीम् ॥१॥

अधुना स्वयं ग्रन्थकर्तृप्रस्तुतमाचक्षते । मुखमेव मुख्याङ्गकत्वात् वर्णयन् प्रारभते । नेति । मुखस्य नित्यं कापि अकथ्या शोभा हे भामिनि ते एव त्वयैव परिचीयते संगृह्यते । यत् मनागपि किंचिदपि यस्मिन् मुखचन्द्रे राहोः रोषः चन्द्रोपरागस्तस्य शङ्का न वर्तते इति योज्यं । न कलङ्कावगमः पूर्णत्वात् यथा चन्द्रे कलङ्को दृश्यते न तथा मुखे कज्जलं विनेत्यर्थः ॥ पाण्डुभावः श्वेतमृद्वर्णं नैवास्मिन् द्विजद्युतिं विना । चन्द्रे तु सर्वमेव दृश्यते न मुखे तस्माच्चन्द्रतिरस्कारि मुखं अत्र स्मर्यते ॥ २ ॥

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्व्वस्वञ्चापि हरते विधिरुच्छृङ्खलो नृणाम् ॥ २१ ॥
दोर्दण्डद्वयकुण्डलोकृतलसत्कोदण्डचण्डाशुग-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम् ।
वल्गद्वाण्डवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यद्वत्खाण्डवसृष्टपाण्डव-महो को न क्षितीशः स्मरेत् ॥ २२ ॥
खण्डितानेकञ्जालि- मञ्जुरञ्जनपण्डिताः ।
मण्डितारिवलदिक्प्रान्ताश्चण्डांशोः पान्तु भानवः ॥ २३ ॥ इति

१ उपचीयते इति पा० ।

नितरां परुषा सरोजमाला
न मृणालानि विचारपेशलानि ॥
यदि कोमलता तवाङ्गकाना-
मथ का नाम कथापि पल्लवानाम् ॥ २ ॥
स्वेदाम्बुसान्द्रकणशालिकपोलपाली
दोलायितश्रवणकुण्डलवन्दनाया ॥
आनन्दमङ्कुरयति स्मरणेन कापि
रम्या दशा मनसि मे मदिरेक्षणायाः ॥ ३ ॥

नितरामिति । हे भामिनि तवाङ्गकानामवयवानां यदि कोमलता तर्हि सरोजानां कमलानां मालापि नितरां परुषा कर्कशा विचारेण विशेषेण पेशलानि कोमलानि न अथातो हेतोः पल्लवानां नूतनकिसलयानां का नाम कथाऽपिशब्दात् शय्यादिरचिता अपि पल्लवास्तस्याङ्गमर्दनकारिणः पुष्पास्तृताः सन्तो रतिदा इति भावः ॥ २ ॥

स्वेदाम्बिति । कापि मदिरेक्षणाया दशावस्था रम्या सती मे मनसि स्मरणेन आनन्दमङ्कुरयति जनयति । कीदृशः मदिरेक्षणायाः मत्तः। इरा इरा भ्रूवाक्सुरास्तुस्यात्। तथा सत् सकाशात् मदिराजलनेत्रायाः मदाघूर्णितनेत्राया इत्यर्थः। पुनः कीदृश्यास्तव स्वेदस्याम्बु जलं तस्य सान्द्रकणं तेन शालिनी शोभिता या कपोलयोः पालिः गल्लयोः प्रान्तं पाली इति लोके तस्मिन् दोलायिते चञ्चले श्रवणयोः कर्णयोः कुण्डले वन्दना च । विन्दुविशिष्टा रङ्गजटितललाटपत्ररचनामध्यस्था भ्रूमध्यगता विन्ददलीति लोके। सा च यथा स्यात्तथा तस्याः स्वेदाम्बुसान्द्रकणशालिकपोलपालिदोलायितश्रवणकुण्डलवन्दनायाः इत्यर्थः ३

कस्तूरिकातिलकमालिविधाय सायं
स्मेरानना सपदि शीलय सौधमौलिम् ॥
प्रौढिं भजन्तु कुमुदानि मुदामुदारा-
मुल्लासयन्तु परितो हरितो मुखानि ॥ ४ ॥
तन्मन्दमञ्जुहसितं श्वसितानि तानि
सा वै कलङ्कविधुरा मधुराननश्रीः ॥
अद्यापि मे हृदयमुन्मदयन्ति हन्त
सायंतनाम्बुजसहोदरलोचनायाः ॥ ५ ॥

कस्तूरीति। सुरतं कर्तुमुत्साहयति शृङ्गाररसोत्र निर्दिश्यते। हे आलि सखि कस्तूरिकातिलकं विधाय कृत्वा त्वं सायं संध्यायां प्रदोषे इत्यर्थः। स्मेरं हसन् आननं मुखं यस्याः तथा सती सपदि शीघ्रं सौधमौलिं शीलय राजसदनश्रेष्ठं गच्छ शय्यां रचयेत्यर्थः। कुमुदानि मुदां हर्षाणां प्रौढिं वृद्धिं भजन्तु। कीदृशां उदारां अधिकां सुगन्धकरीं परितो हरितो मुखानि सर्वतो दिशो मुखानि उल्लासयन्तु। चन्द्रज्योत्स्नयेति शेषः। कुमुद्विकासत्वात् हरितहर्षकारित्वाच्च ॥ ४ ॥

तदिति। हे सखि हन्त हर्षे सायन्तनाम्बुजसहोदरलोचनायाः तव तत् तादृशं मञ्जु कोमलं हसितं कामोद्दीपनमित्यर्थः। तानि रतोत्थानि श्वसितानि च सा कलङ्केन विधुरा रहिता मधुराननस्य मिष्टमुखस्य श्रीः। अद्यापि मे हृदयमुन्मदयन्ति उन्मत्तं कुर्वन्ति कामासक्तं च मे हृदयं भवति तत्स्मरणादिति भावः। कथंभूतायाः तव सायन्तनाम्बुजं कुड्मलरूपं तस्य सहोदरेऽनुकारिणी लोचने यस्याः निद्रातुरे इत्य-

---

१ साय इति पाठः।

प्रातस्तरां प्रणयने विहिते गुरूणां
आकर्ण्य वाचममलाम्भवपुत्रिणीति ॥
नन्दीयसि प्रियतमे परमप्रमोदे
पूर्णादरं दयितया दधिरे दृगन्ताः ॥ ६ ॥
गुरुजनभयमद्विलोकनान्तं
समुदयदाकुलभावमावहन्त्याः ॥
दरदलदरविन्दसुन्दरं हा
हरिणदृशोर्नयनं न विस्मरामि ॥ ७ ॥

र्थः । निद्रातुरायां वनितावरायां स नायकः कामनिषण्णदेहः इति कोकः ॥ ५ ॥

प्रातरिति । दयितया दृगन्ताः अपाङ्गाः पूर्णादरं यथा स्यात्तथा नन्दीयसि प्रियतमे आनन्दिते भर्त्तरि दधिरे धृताः। कीदृशे परमः उत्कृष्टः प्रमोदो यस्य स तथा तस्मिन् हर्षिते इत्यर्थः। किंकृत्य प्रातस्तरां गुरूणां प्रणयने विहिते सति प्रभातकालीनश्वस्तनमस्कारादिकं कृत्वा हे स्नुषे त्वमस्माकमाशिषो पुत्रिणी भव पुत्रोत्पादका भवेति अमलां वाचमाकर्ण्य श्रुत्वा ॥ ६ ॥

गुर्विति ॥ हा इति विरहद्योतकः हे सखि अहं दरं इषत् दलत् स्फुटत् अरविन्दं पद्मं तदिव सुन्दरं हरिणदृशश्चकितदृष्टेर्नायिकायाः नयने न विस्मरामि नयनशब्दोत्र प्रापणार्थद्योतकस्तस्मात्सङ्गमामित्यर्थः। कीदृश्याः हरिणदृशः गुरुजनानां भयं तद्विद्यते यस्मिन्नसौ विलोकनान्तं प्रियदर्शनराहित्यं तेन समुदयत् प्रगटीभवत् यत् आकुलभावं तदावहन्त्याः तद्भयातिप्रेक्षणविधानजनितकामवैचित्त्ययुक्ताया इति अर्थः ॥ ७ ॥

बदरामलकाम्रदाडिमा-
नपहृत्य श्रियमुन्नतां क्रमेण ॥
अधुना हरणे कुचौ यतेते
दयिते ते करिशावकुम्भलक्ष्म्याः ॥ ८ ॥
कपोलपालिं तव तन्वि मन्ये
लावण्यधन्ये दिशमुत्तराख्याम् ॥
विभाति यस्यां लालितालकायां
मनोहरा वै श्रवणस्य लक्ष्मीः ॥ ९ ॥

बदरेति । हे दयिते तव कुचौ अधुना करिशावकुम्भलक्ष्म्याः गजपोतमूर्ध्नि स्थितकुम्भाकारग्रन्थिशोभायाः आहरणे यतेते । यत्नं करिष्येते युवतीत्वात् । किंकृत्य पूर्वपूर्वान्तरावस्थां कथयित्वा किंकृत्य बदरं बदरीफलं आमलकं आमलीफलं तस्मान्महत् आम्रं आम्रफलं प्रौढत्वात् दाडिमं आम्रादधिकं दाडिमीफलं तेषां श्रियं शोभाम् अपहृत्य । कीदृशां श्रियं क्रमेण उत्तरोत्तरं उन्नतां अधिकाम् ॥ ८ ॥

कपोलेति । हे तन्वि लघुरूपेऽहं तव कपोलपालिं उत्तराख्यां दिशं मन्ये। हे लावण्यधन्ये लावण्यं च धन्यं यस्याः सा तथा लावण्यं लवणरसः यथा स्वादुतरः तथैवास्या रूपं लवणस्येवेति समासः ॥ धनस्येदमिति धन्यं आभरणादिलावण्यमेव धन्यं शोभाकररसमस्याः तस्याः सम्बुद्धौ हे लावण्यधन्ये रूपातिशये

---

१ अत्रायमधिकः पुस्तकान्तरे—

जम्बीरश्रियमतिलङ्घ्य लीलयैव
या नम्रीकृतकमनीयहेमकुम्भौ ।
नीलाम्भोरुहनयने ऽधुना कुचौ ते
स्पर्धेते किल कनकाचलेन सार्धम् ॥ १ ॥

नीवीं नियम्प शिथिलामुषसि प्रकाश-
मालोक्य वारिजदृशः शयनं जिहासोः ॥
नैवावरोहति कदापि च मानसान्मे
नाभेः प्रभा सरसिदरसोदरायाः ॥ १० ॥
अलीषु केलीरभसेन बाला
मुहुर्ममालापमुपालभन्ती ॥
आरादुपाकर्ण्य गिरं मदीयां
सौदामिनीयां सुषमामयासीत् ॥ ११ ॥

यस्यां कपोलपाल्यां कर्णपुटिकायां कीदृश्यां ललितालकायां वैश्रवणस्य लक्ष्मीः सम्पत् ललितालकाश्चूर्णकुन्तला यस्मिन् मुखे कपोलपाल्यामित्यर्थः । वै इति भिन्नं श्रवणस्य लक्ष्मीः कर्णाभरणमित्यर्थः । यस्यां विभाति ॥ ९ ॥

नीवीमिति । उरसि शिथिलां त्रुटितरशनां नीवीं उरसिनियम्य हस्तवस्त्राकर्षणत्वात् संगृह्य शयनं जिहासोः त्यक्तवत्याः सरसिजोदरं वारिजमध्यं तस्य सोदरायाः तत्समभातृवत् किंनु पद्मिन्या इत्यर्थः। वारिजदृशः कमलनेत्रायाः यौवनत्वात् रक्तनेत्राया नाभेः प्रभा मे मानसात् कदापि नैवावरोहति न विस्मृता भवतीत्यर्थः । कुतः आलोक्य पूर्वं सुरतसमये दृष्ट्वा अत्र नाभिशब्देन हस्तिनी सुरतोत्थिता नायका पद्मिन्यापि सोदरत्वेन गृह्यते न त्वद्धा ॥ १० ॥

अलीष्विति । बाला अलीषु सखीषु मध्ये ममालापं वाक्यं केलीरभसेषु तृतीयान्तपाठे केल्याः क्रीडायाः रभसेन हास्येन सा मुहुः उपालभन्ती कथ्यमानमपि सखी मुखेभ्यो वर्जयन्ती

---

१ अलीष्वित्याद्यं श्लोको नैकस्मिन्पुस्तके । २ उपाल्यन्ती इति पाठः ।

मुधैव मन्तुं परिकल्प्य गन्तुं मृषैव रोषादुपजल्पतो मे ॥
तदस्रचञ्चन्नयनं नताङ्गी गिरं न कांकामुररीचकार ॥११॥

तदवधि कुशलीपुराणशास्त्र-
स्मृतिशतचारुविचारजो विवेकः ॥
यदवधि न पदं दधाति चित्ते
हरिणकिशोररदृशोर्दृशोर्विलासः ॥ १३ ॥
आगतः पतिरितीरितं जनैः
शृण्वती चकितमेत्य देहलीम् ॥

मानवतीत्यर्थः ॥ पुनश्चारात् मदीयां गिरं वाणीमाकर्ण्य श्रुत्वा सौदामिनीयां विद्युदीयां सुषमां अपासीत् तत्याज । किंतु चञ्चलतां दूरीचकार स्थिताऽभूदित्यर्थः। सद्वचःश्रवणेन मानहानिं प्रकटी चकार कामासक्ताभूदित्यर्थः ॥ ११ ॥

मुधेति । रोषादुपजल्पतो वदतः मे मम गन्तुं परिकल्प्य विदेशमहङ्गमिष्ये त्वदवज्ञया हेतोरित्यर्थः । मृषैव हास्यत्वात् ॥ मुधा एव मिथ्या एव मन्तुं उदस्रे निर्जले चञ्चन्नयने यत्र यस्यां यथा स्यात्तथा शुष्कचञ्चन्नेत्रमित्यर्थः । नताङ्गी नम्राङ्गी विनयत्वात् ॥ कांकां गिरं न उररीचकार । अपि तु मम वाचं त्वं दास्यसि इत्यपि अङ्गी चकार ॥ १२ ॥

तदिति । अथ रसावली रसः हरिणकिशोररदृशोः पद्मिन्या नायिकायाः दृशोर्विलासः। दर्शनसुखं अन्योन्यं नेत्रमेलनमित्यर्थः यत् यस्मात् कारणात् अवधिपदं मर्यादस्थानं न दधाति किं तु उपस्थस्थानं नापेक्ष्यते तस्मात् अधिकुशली उपेक्षा शीलः विलासविशेषेणत्रयं पुराणशास्त्रश्रुतिशतैश्चारुः यो विचारः ततोन्यः विवेकः विशिष्टज्ञानरूप इति ॥ १३ ॥

कौमुदीव शिशिरीकरीष्यते
लोचने मम कदा मृगेक्षणा ॥ १४ ॥
अवधौ दिवसावसानकाले
भवनद्वारि विलोचने दधाना ॥
अवलोक्य समागतं तदा मा-
मथ रामा विकसन्मुखी बभूव ॥ १५ ॥
वक्षोजाग्रं पाणिना स्पृश्य दूरं
यातस्तद्रागाननाब्जं प्रियस्य ॥
शोणाग्राभ्यां भामिनीलोचनाभ्यां
जोषं जोषं जोषमेवावतस्थे ॥ १६ ॥

आगत इति । मृगेक्षणा मृगवच्चञ्चलनेत्रा नायका कदा कस्मिन् समये मम लोचने नेत्रे कौमुदीव चन्द्रज्योत्स्नेव शिशिरीकरिष्यते शीतकारिणी भवति । तत्समक्षनेत्रदर्शनं ममाहोभाग्यमित्यर्थः। कीदृशा मृगेक्षणा हे बाले ते पतिः आगतः रोषान्निष्कृतः गृहमायातीत्यर्थः । इति प्रकारेण जनैः सखीजनैरित्यर्थः ईरितं कथितं शृण्वती तत्क्षणमेव चकितं साश्चर्यं यथा स्यात्तथा देहलीं द्वारभूमिं एत्य गत्वा प्रेक्षन्तीति शेषः ॥१४॥

अवधाविति । अथेति मङ्गलार्थे सङ्गमे वा । अवधौ दिवसावसानकाले सायंकाले दूरमार्गागमनविरुद्धत्वात् ॥ निरासरूपेऽवधौ आयाति नाद्य पतिः श्व एवायाति वा नवेति । भवनद्वारि स्थिता विलोचने प्रेक्षणे दधाना पक्ष्मपातराहित्यं कुर्वन्ती पुनः अवलोक्य समागतं बहुधनं प्रगृह्यागतं मां तदा दृष्ट्वा तद्धेतुं मानं विहाय विकसत् सहास्यं मुखं यस्याः सा तथा रामासुन्दरी रमणी नायका बभूव हर्षाद्वास्यबहुला चेत्याशयः१५

वक्षोजाग्रामिति । भामिनी पूर्वं मानवती कोपना सैव भा-

गुरुभिः परिवेष्टितापि गण्ड-
स्थलकण्डूयनचारुकौतुकेन ॥
दरदर्शितहेमबाहुनाला
मयि बाला नयनाञ्चलं चकार ॥ १७ ॥
गुरुमध्यगता मया नताङ्गी
निहता कोरवरेण मन्दमन्दम् ॥
दरकुण्डलताण्डवं नतभ्रू-
लतिकं मामवलोक्य घूर्णितासीत् ॥ १८ ॥

मिनीत्यमरः। शोणाग्राभ्यां रक्तप्रान्ताभ्यां लोचनाभ्यां नेत्राभ्यां जोषंजोषं सुखंसुखं सुखमेवावतस्थे स्थिताभूत् । सादरा वीप्सा महासुखनिर्वृताऽभूदित्यर्थः । किंकृत्य तत् वक्षोजाग्रं कुचाग्रं पाणिना हस्तेन आस्पृश्य मर्दयित्वा । यत् यस्मात् असौ नायकः प्रियस्य वस्तुनः द्राक् किंचित् आननाब्जं मुखपद्मं प्रति दूरं यातः दृष्ट्वापि प्रिया प्रियस्य मुखं दूरं याताः सोपि दूरं स्थितः अत्र विरोधाभासोऽलङ्कारः रसस्तु रुचिकारिशृङ्गार इत्यत्र सूचना ॥ १६ ॥

गुरुभिरिति । बाला प्रौढा कामिनी गुरुभिः परिवेष्टितापि वेष्टितापि मातापितृभ्रात्रादिभिः मध्यगतापि गण्डस्थलकण्डूयनस्य कपोलस्थानीयकण्डूतिकस्य चारु कौतुकेन । कैतवेनेति पाठे छलेन दीर्घकण्डूकरणात् दर इषद्दर्शितं हेम्नः बाहुनालं अङ्गदं यया सा तथा मयि नयनाञ्चलं अपाङ्गं चकार प्रौढात्र नायिका ॥ १७ ॥

गुर्विति । मया कोरवरेण निहता पद्मकुड्मलेन प्रहता सती

---

१ कैतवेनेति पा० । २ नीरजकोरकेण इति पाठान्तरम् ।

विनये नयनारुणप्रसाराः
प्रथतौ हन्त निरन्तराश्रुधाराः ॥
अपि जीवितसंशयः प्रयाणे
नहि जाने हरिणाक्षि केन तुल्येः ॥ १९ ॥

अकरुणकृपाणासिन्धो विभुश्च यथाञ्चलं
तव परिचितस्नेहः सम्यक् वयेत्यविधायिनीम् ॥
अविरलगलद्धाणां तन्वीं निरस्तविकृष्णां
क इव भवतीं निद्रे मद्रे विना विनिवेदयेत् ॥२० ॥

गुरूणां मध्ये गता नुषवध्वस्या नतं वक्त्रं यस्याः सा तया मृदु-
स्वीत्यर्थः ॥ मन्दं मन्दं यथा स्यात्तथा यावल्लोचने दृष्ट्वा घूर्णि-
तासीत् यत्ता बभूव । कीदृशं यां दरं कुण्डलयोः ताम्बूलं नृत्यं
यस्य स तथा तं चलत्कुण्डलमित्यर्थः । पुनः किंविशिष्टं नता
भ्रूलतिका भ्रूभङ्गवल्लीदण्डायेव कायासक्त्यात् यस्य सः तथा
तं । स्मृतो यस्य मित्यर्थः(?) ॥ १८ ॥

विनय इति । अपि इति कोमलमन्त्रणे । हे हरिणाक्षि त्वं
केन तुल्येः तदहं न जाने किंतु विनये शिक्षायां नयनयोररु-
णाश्च ते प्रसाराः रक्तताबाहुल्यात् । हन्त प्रथतौ चमत्कारे निर-
न्तराश्रुधाराः स्फुटमेव । प्रयाणे प्रस्थाने मम विदेशं गन्तुकामे
जीवितसंशयः हि इति सन्देहालंकारेः ॥ १९ ॥

अकरुणेति ॥ हे अकरुण हे कृपाणासिन्धो निष्कृपा-
सिन् यथाञ्चलं यदीयं वस्त्रप्रान्तं विभुश्च त्वया तव स्नेहः
सम्यक् परिचितः इत्थमविधायिनीं एवं कथयन्तीं अविरलानि
दीर्घाणि गलन्ति बाष्पाणि यस्याः तथाभूतां तन्वीं सुख-

---

१ अत्रोत्तरार्द्धे पाठभ्रंशः ।

तीरे तरुण्या वदनं सहासं
नीरे सरोजं च मिलद्विकासम् ॥
आलोक्य धावत्युभयत्र मुग्धा
मरन्दलुब्धालिकिशोरमाला ॥ २१ ॥
वीक्ष्य वक्षसि विपक्षकामिनी-
हारलक्ष्म दयितस्य भामिनी ॥
अंसदेशविनिवेशितां क्षणात्
आचकर्ष निजबाहुवल्लरीम् ॥ २२ ॥

देहामत एव निरस्तानि उत्तारितानि भूषणानि यया सा तथा तादृशीं त्वां हे भद्रे निद्रेव क इव ना पुरुषः विनिवेदयत् ॥ तादृशः कोपि तादृशो न । यथा कः प्रजापतिः पुष्कराण्येव धात्रीमनादृत्य गायत्रीमारोपितवान्यथा विनिद्रेव रूयपि कापि तादृशी न यथा निद्रा निद्रन्ति जना यस्यां सा निशेत्यर्थः । यथा निश्चन्द्रा तद्वत् ॥ त्वमपि मां नायकं विना शोभारहिता भवितुमिच्छसि इति तात्पर्यार्थः ॥ २० ॥

तीरइति । तरुण्या वदनं मुखपद्मं सहासं हास्यसहितं यथा स्यात्तथा तीरशब्दोत्र सरोवरतटवाची तस्मिन्नीरे जले सरोजं चालोक्य पद्मिनीमुखे कमलभ्रान्त्या मरन्दे मधुनि लुब्धा सती अलिकिशोरमाला अलीनां किशोरा अज्ञातयौवना माला पङ्क्तिः मुग्धा नायका यथा उभयत्र पितुर्गृहाद्भर्तृगृहं भर्तृगृहात्पितृगृहं धावति तथैवात्रापि ज्ञेयम् ॥ २१ ॥

वीक्ष्येति । भामिनी कोपना स्त्री सैव दयितस्य वल्लभस्य वक्षसि विपक्षकामिनीहारस्य अन्यदीयस्त्रीपुष्पमालायाः लक्ष्म वीक्ष्य अंसदेशे विनिवेशितां चिरादाचकर्ष । क्षणात् इति पाठे स्फुटोर्थः ॥ निजां बाहुवल्लरीं मञ्जरीभूतां कान्तस्कन्ध गतामपि आचकर्ष कर्षितवत्यभूत् ॥ २२ ॥

दरानमत्कन्धरबन्धमीष-
न्निमीलितस्निग्धविलोचनाब्जम् ॥
अनल्पनिश्वासभरालसाङ्गं
स्मरामि संगं चिरमङ्गनायाः ॥ २३ ॥
रोषावेशात् निर्गतं यामयुग्मा-
देत्य द्वारं कांचिदाख्यां गृणन्तम् ॥
मामाज्ञायैवाययौ कातराक्षी
मन्दंमन्दं मन्दिरादिन्दिरेव ॥ २४ ॥

दरेति । अहं अङ्गनायाः संगं सौरतं चिरं स्मरामि । कथंभूतं दरं आनमतः कन्धरावन्धौ स्कन्धौ यस्मिन् । इषत् निमीलिते स्निग्धे सरसे विलोचनाब्जे यस्मिन् पुनः अनल्पो बहुलो निःश्वासस्तस्य भरेण अलसं सश्रमं अङ्गं अवय वसमूहो यस्मिन् तथाविधं सुरतोत्सुको नायकः ॥ २३ ॥

रोष इति । कातरे सभये अक्षिणी यस्याः सा नायका कोपनैवेत्यर्थः । रोषावेशात् क्रोधागमात् यामयोर्युग्मं द्विप्रहरं तस्मात्तत्पर्यन्तमित्यर्थः। मध्याह्नकाले मुक्तैव रतोत्सुकोसौ कोपनया निवारितः क्रुद्धो बहिर्निर्गतः। पुनश्च एत्य कांचित्तन्नामानुरूपां आख्यां सम्बोधनं द्वारं एत्य कपाटोद्घाटनार्थं तं कान्तं गृणन्तं कथयन्तं मां आज्ञाय ज्ञात्वैव आययौ । मन्दंमन्दं धीरता निर्देशः क्रुधावगमात् इन्दिरा लक्ष्मीर्यथा मन्दिरात् वृन्दासङ्गमागतं विष्णुं न सम्मुखमिता तद्वदयमपि मध्याह्ने कांचिदभिरम्यागतो रजनीमुखे ममैवायं रात्रिसेवी सुखदः प्रियः तस्मादागतमनमन स्वकीय एव इति भावः । अत्र प्रेमबहुला नायका रसस्तु स्वान्तरभेदः शृङ्गारकरुणः ॥ २४ ॥

हृदये कृतशैवलानुषङ्गा
मुहुरङ्गानि यतस्ततः क्षिपन्ती ॥
प्रियनामपरे मुखे सखीना-
मतिदीनामियमादधाति दृष्टिम् ॥ २५ ॥
इत एव निजालयं गताया
वनिताया गुरुभिः समावृतायाः ॥
परिवर्त्तितकन्धरं नतभ्रु-
स्मयमानं वदनाम्बुजं स्मरामि ॥ २६ ॥

हृदय इति । इयं नायिका हृदये कृतः शैवलानां अनुषङ्गो यया सा तथा रोगार्त्तहृदयेत्यर्थः । मुहुः शश्वत् इतस्ततः वामपार्श्वदक्षिणपार्श्वतः अङ्गानि हस्तपादादीनि क्षिपन्ती न्यस्यन्ती सखीनां मुखे जात्यभिप्रायेणैकवचनं प्रियनाम स्वपतिनाम तस्मिन् परं तत्तथा तादृशे प्रियनामग्रहणकारिणीत्यर्थः । तादृशे सति अतिदीनां दृष्टिं आदधाति यतः पतिरहिता पतिनामश्रवणात् सस्मरणा सेङ्गितरहिता जाता तथेत्याशयः अत्र कारुण्यरसः ॥ २५ ॥

इत इति । अहं वनिताया महिलायाः नयनमेवाम्बुजं स्मरामि । कीदृश्याः गुरुभिः पितृभ्रात्रादिभिः समावृतायाः वेष्टितायाः। कुतः इतः मद्गृहात् एव शब्दात् क्रोधेनेत्यर्थः । निजालयं स्वपितुर्गृहं गतायाः प्राप्तायाः तैरागत्य नीतायाः।विशेषणद्वयं कीदृक् वदनाम्बुजं । परिवर्तिता कन्धरा ग्रीवा यस्मिन् तत्तथा किंतु मत्सकाशं गम्यमानत्वात् मद्भवनोन्मुखत्वाल्लज्जयाऽभर्त्रानाहूतैव पितृगृहाभिमुखा पित्रादिवाक्यात् तस्मान्नता नम्रा भ्रूर्मिं दृष्टवती भ्रूर्यस्मिन् तत्तथा ॥ २६ ॥

कथय कथमिवाशा जायतां जर्विने मे
मलयभुजगवान्ता वान्ति वाताः कृतान्ताः ॥
अयमपि खलु गुञ्जन् मञ्जु माकन्दमौलौ
चुलकयति मदीयां चेतनाः चञ्चरीकः ॥ २७ ॥
निरुध्य यान्तीं तरसा कपोतीं
कूजत्कपोतस्य पुरो दधाने ॥

हे पान्थ त्वं मे कथय कथमिव केनाप्युपायेनापि मे जीवने आशा जायतां । कथं यतः पुष्पकर आसन्नः । तमेव विवृणोति मलयभुजगवान्ताः मलयगिरिजातसर्पवहाः वाता वान्ति निश्वासतुल्याः सविषा इत्यर्थः । ननु चन्द्रगिरिजाताः शीताः सर्पफूत्कारसंपर्गजा दहना एवेत्याशयः। एतादृशा वाताः वान्ति । कीदृशाः वाताः कृतान्ताः कृतस्य कार्यस्य अन्ता नाशकाः तत्कृतः दक्षिणवायुसौरभ्यात् मदनोद्गमः तस्मात् कार्यविस्मृतिर्विरहिणां भवतीत्याशयः । अयमपि चञ्चरीकः पिकः मञ्जु यथा स्यात्तथा माकन्दमौलौ रसालशाखोत्तंसे खलु गुञ्जन् संभावनया कामिनां काममुद्दीपयन् शब्दायमानः सन् मदीयां मद्देहगतां चेतनां मज्जात्मिकं तेजस्तां चुलकयति नाशयतीत्यर्थः । यथा वा । वसन्तप्रारम्भे प्रियविरहखिन्ना सहचरी यदि प्राणान् मुञ्चेत्तदिह वद भागी भवति कः । वयो वा स्नेहो वा कुसुमविशिखो वेति विमृशं स्तुहीति प्रव्यक्तं पिकनिकरझङ्कारमशृणोत् । इति अत्र निकरशब्दो न स्पष्टार्थः ॥ २७ ॥

---

१ जीविते इ० पा० । २ अत्रायं सप्तविंशानन्तरं श्लोकः—

प्राणापहरणेनासि तुल्यो हालाहलेन मे ।
शशाङ्क केन मुग्धेन सुधांशुरिति भाषितः ॥ १ ॥

मयि स्मिताद्रं वदनारविन्दं
सा मन्दमन्दं दमयाम्बभूव ॥ २८ ॥
तिमिरं हरन्ति हरितां पुरःस्थितं
तिरयन्ति तापमथ तापशालिनाम् ॥
वदनत्विषस्तव चकोरलोचने
परिमुद्रयन्ति सरसीरुहश्रियः ॥ २९ ॥
कुचकलशयुगान्तर्मामकीनं नखाङ्कं
सपुलकतनुमन्दंमन्दमालोकमाना ॥
विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकितनतनताङ्गी सद्म सद्यो विवेश ॥ ३० ॥

निरुध्येति । सा नायका स्मिताद्रं मन्दहास्यं स्निग्धं सरसामिति यावत् मन्दंमन्दं वदनारविन्दं दमयाम्बभूव नासाभूषणचिक्रे । विशेषात् नमयाम्बभूवेति पाठे नसिप्रोतं यथा नासाभूषणं नम्रवदाचरणमर्थः । किं कृत्य कपोतीं तरसा यान्तीं शीघ्रं गच्छन्तीं निरुध्य कूजत्कपोतस्य दधाने पुरोग्रे स्थिते मयि सति ॥ २८ ॥

तिमिरमिति । सरसीरुहाश्रियः कमलकान्तयः तव वदनत्विषः परिमुद्रयन्ति मुखशोभास्तिरकुर्वन्ति यथा हे चकोरलोचने रात्रौ कमलानामस्फुटत्वात् मुखानां रात्रौ रतारम्भकतया प्रसन्नत्वान्निरुपमातिशयः। वदनत्विषः हरितां दिशां पुरस्थितं अग्रस्थितं तिमिरं अन्धकारं हरन्ति चन्द्रोपममुखत्वात् सरसीरुहश्रियस्तु वाथ तापशालिनां पुरस्थितं तापं निर्जलदेशगमनरूपं हरन्ति । तस्मादन्योन्योपमत्वात् युक्तमिति भावः ॥ २९ ॥

कुचेति।बाला नायिका मां गवाक्षे विनिहितवदनं वीक्ष्य प्रेक्षन्मुखं

---

१ नमयांबभूव इ० पा० ।

नीवीं नियम्य शिथिलामुरसि प्रकाश-
मालोक्य वारिजदृशः शयनं जिहासोः ॥
नैवावरोहति कदापि च मानसान्मे
नाभेः प्रभा सरसिदरसोदरायाः ॥ १० ॥
अलीषु केलीरभसेन बाला
मुहुर्मनोलापमुपालभन्ती ॥
आरादुपाकर्ण्य गिरं मदीयां
सौदामिनीयां सुषमामयासीत् ॥ ११ ॥

यस्यां कपोलपाल्यां कर्णपुटिकायां कीदृश्यां ललितालकायां वैश्रवणस्य लक्ष्मीः सम्पत् ललितालकाश्चूर्णकुन्तला यस्मिन् मुखे कपोलपाल्यामित्यर्थः । वै इति भिन्नं श्रवणस्य लक्ष्मीः कर्णाभरणमित्यर्थः । यस्यां विभाति ॥ ९ ॥

नीवीमिति । उरसि शिथिलां त्रुटितरशनां नीवीं उरसिनियम्य हस्तवस्त्राकर्षणत्वात् संगृह्य शयनं जिहासोः त्यक्तवत्याः सरसिजोदरं वारिजमध्यं तस्य सोदरायाः तत्समभातृवत् किंनु पद्मिन्या इत्यर्थः। वारिजदृशः कमलनेत्रायाः यौवनत्वात् रक्तनेत्राया नाभेः प्रभा मे मानसात् कदापि नैवावरोहति न विस्मृता भवतीत्यर्थः । कुतः आलोक्य पूर्वं सुरतसमये दृष्ट्वा अत्र नाभिशब्देन हस्तिनी सुरतोत्थिता नायका पद्मिन्यपि सोदरत्वेन गृह्यते न त्वद्धा ॥ १० ॥

अलीष्विति । बाला अलीषु सखीषु मध्ये ममालापं वाक्यं केलीरभसेषु तृतीयान्तपाठे केल्याः क्रीडायाः रभसेन हास्येन सा मुहुः उपालभन्ती कथ्यमानमपि सखी मुखेभ्यो वर्जयन्ती

---

१ अलीष्वित्यादयं श्लोको नैकस्मिन्पुस्तके । २ उपालभन्ती इति पाठः ।

मुधैव मन्तुं परिकल्प्य गन्तुं मृषैव रोषादुपजल्पतो मे ॥
तदस्रचञ्चन्नयनं नताङ्गी गिरं न कांकामुररीचकार ॥१२॥

तदवधि कुशलीपुराणशास्त्र-
स्मृतिशतचारुविचारजो विवेकः ॥
यदवधि न पदं दधाति चित्ते
हरिणकिशोररदृशोर्दृशोर्विलासः ॥ १३ ॥
आगतः पतिरितीरितं जनैः
शृण्वती चकितमेत्य देहलीम् ॥

मानवतीत्यर्थः ॥ पुनश्चारात् मदीयां गिरं वाणीमाकर्ण्य श्रुत्वा सौदामिनीयां विद्युदीयां सुषमां अपासीत् तत्याज । किंतु चञ्चलतां दूरीचकार स्थिताऽभूदित्यर्थः। सद्वचःश्रवणेन मानहानिं प्रकटी चकार कामासक्ताभूदित्यर्थः ॥ ११ ॥

मुधेति । रोषादुपजल्पतो वदतः मे मम गन्तुं परिकल्प्य विदेशमहङ्गमिष्ये त्वदवज्ञया हेतोरित्यर्थः । मृषैव हास्यत्वात् ॥ मुधा एव मिथ्या एव मन्तुं उदस्ते निर्जले चञ्चन्नयने यत्र यस्यां यथा स्यात्तथा शुष्कचञ्चन्नेत्रमित्यर्थः । नताङ्गी नम्राङ्गी विनयत्वात् ॥ कांकां गिरं न उररीचकार । अपि तु मम वाचं त्वं दास्यसि इत्यपि अङ्गी चकार ॥ १२ ॥

तदिति । अथ रसावली रसः हरिणकिशोररदृशोः पद्मिन्या नायिकायाः दृशोर्विलासः। दर्शनसुखं अन्योन्यं नेत्रमेलनमित्यर्थः यत् यस्मात् कारणात् अवधिपदं मर्यादस्थानं न दधाति किं तु उपस्थस्थानं नापेक्ष्यते तस्मात् अधिकुशली उपेक्षा शीलः विलासविशेषेणत्रयं पुराणशास्त्रश्रुतिशतैश्चारुः यो विचारः ततोन्यः विवेकः विशिष्टज्ञानरूप इति ॥ १३ ॥

कौमुदीव शिशिरीकरीष्यते
लोचने मम कदा मृगेक्षणा ॥ १४ ॥
अवधौ दिवसावसानकाले
भवनद्वारि विलोचने दधाना ॥
अवलोक्य समागतं तदा मा-
मथ रामा विकसन्मुखी बभूव ॥ १५ ॥
वक्षोजाग्रं पाणिना स्पृश्य दूरं
यातस्तद्रागाननाब्जं प्रियस्य ॥
शोणाग्राभ्यां भामिनीलोचनाभ्यां
जोषं जोषं जोषमेवावतस्थे ॥ १६ ॥

आगत इति । मृगेक्षणा मृगवच्चञ्चलनेत्रा नायका कदा कस्मिन् समये मम लोचने नेत्रे कौमुदीव चन्द्रज्योत्स्नेव शिशिरीकरिष्यते शीतकारिणी भवति । तत्समक्षनेत्रदर्शनं ममाहोभाग्यमित्यर्थः। कीदृशा मृगेक्षणा हे बाले ते पतिः आगतः रोषान्निष्क्रतः गृहमायातीत्यर्थः । इति प्रकारेण जनैः सखीजनैरित्यर्थः ईरितं कथितं शृण्वती तत्क्षणमेव चकितं साश्चर्यं यथा स्यात्तथा देहलीं द्वारभूमिं एत्य गत्वा प्रेक्षन्तीति शेषः ॥१४॥

अवधाविति । अथेति मङ्गलार्थे सङ्गमे वा । अवधौ दिवसावसानकाले सायंकाले दूरमार्गागमनाविरुद्धत्वात् ॥ निरासरूपेऽवधौ आयाति नाद्य पतिः श्व एवायाति वा नवेति । भवनद्वारि स्थिता विलोचने प्रेक्षणे दधाना पक्ष्मपातराहित्यं कुर्वन्ती पुनः अवलोक्य समागतं बहुधनं प्रगृह्यागतं मां तदा दृष्ट्वा तद्धेतुं मानं विहाय विकसत् सहास्यं मुखं यस्याः सा तथा रामासुन्दरी रमणी नायका बभूव हर्षोद्गास्यबहुला चेत्याशयः१५

वक्षोजाग्रामिति । भामिनी पूर्वं मानवती कोपना सैव भा-

गुरुभिः परिवेष्टितापि गण्ड-
स्थलकण्डूयनचारुकौतुकेन ॥
दरदर्शितहेमबाहुनाला
मयि बाला नयनाञ्चलं चकार ॥ १७ ॥
गुरुमध्यगता मया नताङ्गी
निहता कोरवरेण मन्दमन्दम् ॥
दरकुण्डलताण्डवं नतभ्रू-
लतिकं मामवलोक्य घूर्णितासीत् ॥ १८ ॥

मिनीत्यमरः। शोणाग्राभ्यां रक्तप्रान्ताभ्यां लोचनाभ्यां नेत्राभ्यां जोषंजोषं सुखंसुखं सुखमेवावतस्थे स्थिताभूत् । सादरा वीप्सा महासुखनिर्वृताऽभूदित्यर्थः । किंकृत्य तत् वक्षोजाग्रं कुचाग्रं पाणिना हस्तेन आस्पृश्य मर्दयित्वा । यत् यस्मात् असौ नायकः प्रियस्य वस्तुनः द्राक् किंचित् आननाब्जं मुखपद्मं प्रति दूरं यातः दृष्ट्वापि प्रिया प्रियस्य मुखं दूरं याताः सोपि दूरं स्थितः अत्र विरोधाभासोऽलङ्कारः रसस्तु रुचिकारिशृङ्गार इत्यत्र सूचना ॥ १६ ॥

गुरुभिरिति । बाला प्रौढा कामिनी गुरुभिः परिवेष्टितापि वेष्टितापि मातापितृभ्रात्रादिभिः मध्यगतापि गण्डस्थलकण्डूयनस्य कपोलस्थानीयकण्डूतिकस्य चारु कौतुकेन । कैतवेनेति पाठे छलेन दीर्घकण्डूकरणात् दर इषद्दर्शितं हेम्नः बाहुनालं अङ्गदं यया सा तथा मयि नयनाञ्चलं अपाङ्गं चकार प्रौढात्र नायिका ॥ १७ ॥

गुर्विति । मया कोरवरेण निहता पद्मकुड्मलेन प्रहता सती

---

१ कैतवेनेति पा० । २ नीरजकोरकेण इति पाठान्तरम् ।

विनये नयनारुणप्रसाराः
प्रणतौ हन्त निरन्तराश्रुधाराः ॥
अयि जीवितसंशयः प्रयाणे
नहि जाने हरिणाक्षि केन तुष्येः ॥ १९ ॥

अकरुणमृषाभाषासिन्धो विमुञ्च ममाञ्चलं
तव परिचितस्नेहः सम्यक् मयेत्यभिधायिनीम् ॥
अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां
क इव भवतीं निद्रे भद्रे विना भिनिवेदयेत् ॥२० ॥

गुरूणां मध्ये गता बुधमध्यस्था नतं अङ्गं यस्याः सा तथा मृदङ्गीत्यर्थः ॥ मन्दं मन्दं यथा स्यात्तथा मामवलोक्य दृष्ट्वा घूर्णितासीत् मत्ता बभूव । कीदृशं मां दरं कुण्डलयोः ताण्डवं नृत्यं यस्य स तथा तं चलत्कुण्डलमित्यर्थः । पुनः किंविशिष्टं नता भ्रूलतिका भ्रूभङ्गवल्लीदण्डमिव कामासक्तत्वात् यस्य सः तथा तं । स्मृतो यस्य मित्यर्थः(?) ॥ १८ ॥

विनय इति । अयि इति कोमलामन्त्रणे । हे हरिणाक्षि त्वं केन तुष्येः तदहं न जाने किंतु विनये शिक्षायां नयनयोररुणाश्च ते प्रसाराः रक्तताबाहुल्यात् । हन्त प्रणतौ नमस्कारे निरन्तराश्रुधाराः स्फुटमेव । प्रयाणे प्रस्थाने मम विदेशं गन्तुकामे जीवितसंशयः हि इति सन्देहास्पदालंकृतिः ॥ १९ ॥

अकरुणेति ॥ हे अकरुण हे मृषाभाषासिन्धो मिथ्यावादिन् ममाञ्चलं मदीयं वस्त्रप्रान्तं विमुञ्च त्यज। मया तव स्नेहः सम्यक् परिचितः इत्यभिधायिनीं एवं कथयन्तीं अविरलानि दीर्घाणि गलन्ति बाष्पाणि यस्याः सवदश्रुपातां तन्वीं सूक्ष्म-

---

१ अभिधीयितेति पाठान्तरम् ।

तीरे तरुण्या वदनं सहासं
नीरे सरोजं च मिलद्विकासम् ॥
आलोक्य धावत्युभयत्र मुग्धा
मरन्दलुब्धालिकिशोरमाला ॥ २१ ॥
वीक्ष्य वक्षसि विपक्षकामिनी-
हारलक्ष्म दयितस्य भामिनी ॥
अंसदेशविनिवेशितां क्षणात्
आचकर्ष निजबाहुवल्लरीम् ॥ २२ ॥

देहामत एव निरस्तानि उत्तारितानि भूषणानि यया सा तथा तादृशीं त्वां हे भद्रे निद्रेव क इव ना पुरुषः विनिवेदयत् ॥ तादृशः कोपि तादृशो न । यथा कः प्रजापतिः पुष्कराण्येव धात्रीमनादृत्य गायत्रीमारोपितवान्यथा विनिद्रेव रूयपि कापि तादृशी न यथा निद्रा निद्रन्ति जना यस्यां सा निशेत्यर्थः । यथा निश्चन्द्रा तद्वत् ॥ त्वमपि मां नायकं विना शोभारहिता भवितुमिच्छासि इति तात्पर्यार्थः ॥ २० ॥

तीरइति । तरुण्या वदनं मुखपद्मं सहासं हास्यसहितं यथा स्यात्तथा तीरशब्दोत्र सरोवरतटवाची तस्मिन्नीरे जले सरोजं चालोक्य पद्मिनीमुखे कमलभ्रान्त्या मरन्दे मधुनि लुब्धा सती अलिकिशोरमाला अलीनां किशोरा अज्ञातयौवना माला पङ्क्तिः मुग्धा नायका यथा उभयत्र पितुर्गृहाद्भर्तृगृहं भर्तृगृहात्पितृगृहं धावति तथैवात्रापि ज्ञेयम् ॥ २१ ॥

वीक्ष्येति । भामिनी कोपना स्त्री सैव दयितस्य वल्लभस्य वक्षसि विपक्षकामिनीहारस्य अन्यदीयस्त्रीपुष्पमालायाः लक्ष्म वीक्ष्य अंसदेशे विनिवेशितां चिरादाचकर्ष । क्षणात् इति पाठे स्फुटोर्थः ॥ निजां बाहुवल्लरीं मञ्जरीभूतां कान्तस्कन्ध गतामपि आचकर्ष कर्षितवत्यभूत् ॥ २२ ॥

[illegible]धरबन्धमीष-
[illegible]स्वेदविलोचनाब्जम् ॥
[illegible]सरालसाङ्गं
[illegible] चिरमङ्गनायाः ॥ २३ ॥
[illegible]नेमेतं यामयुग्मा-
[illegible]कांचेदारूयां गृणन्तम् ॥
[illegible]ययौ कातराक्षी
[illegible]न्दिरादिन्दिरेव ॥ २४ ॥

[illegible]मं सौरतं चिरं स्मरामि। कथंभूतं [illegible]न्धौ स्कन्धौ यस्मिन्। इषत् निमीलिते [illegible]न्धे यस्मिन् पुनः अनल्पो बहुलो नि- [illegible]मं अङ्गं अवय वसमूहो यस्मिन् [illegible]यकः ॥ २३ ॥

[illegible]मये अक्षिणी यस्याः सा नायका को- [illegible]ोधागमात् यामयोर्युग्मं द्विप्रहरं त- [illegible]ह्नकाले मुक्तैव रतोत्सुकोसौ कोपनया [illegible]ेतः। पुनश्च एत्य कांचित्तन्नामानुरूपां [illegible] एत्य कपाटोद्घाटनार्थं तं कान्तं गृणन्तं [illegible]त्वैव आययौ । मन्दंमन्दं धीरता [illegible]न्दिरा लक्ष्मीर्यथा मन्दिरात् वृन्दासङ्ग- [illegible]मेन। तद्वदयमपि मध्याह्ने कांचिदभिर- [illegible]वैवायं रात्रिसेवी सुखदः प्रियः तस्मादाग- [illegible]ते भावः । अत्र प्रेमबहुला नायका रस- [illegible]ङ्गारकरुणः ॥ २४ ॥

हृदये कृतशैवलानुषङ्गा
मुहुरङ्गानि यतस्ततः क्षिपन्ती ॥
प्रियनामपरे मुखे सखीना-
मतिदीनामियमादधाति दृष्टिम् ॥ २५ ॥
इत एव निजालयं गताया
वनिताया गुरुभिः समावृतायाः ॥
परिवर्त्तितकन्धरं नतभ्रु-
स्मयमानं वदनाम्बुजं स्मरामि ॥ २६ ॥

हृदय इति । इयं नायिका हृदये कृतः शैवलानां अनुषङ्गो यया सा तथा रोगार्त्तहृदयेत्यर्थः । मुहुः शश्वत् इतस्ततः वामपार्श्वदक्षिणपार्श्वतः अङ्गानि हस्तपादादीनि क्षिपन्ती न्यस्यन्ती सखीनां मुखे जात्यभिप्रायेणैकवचनं प्रियनाम स्वपतिनाम तस्मिन् परं तत्तथा तादृशे प्रियनामग्रहणकारिणीत्यर्थः । तादृशे सति अतिदीनां दृष्टिं आदधाति यतः पतिरहिता पतिनामश्रवणात् सस्मरणा सेङ्गितरहिता जाता तथेत्याशयः अत्र कारुण्यरसः ॥ २५ ॥

इत इति । अहं वनिताया महिलायाः नयनमेवाम्बुजं स्मरामि । कीदृश्याः गुरुभिः पितृभ्रात्रादिभिः समावृतायाः वेष्टितायाः। कुतः इतः मद्गृहात् एव शब्दात् क्रोधेनेत्यर्थः । निजालयं स्वपितुर्गृहं गतायाः प्राप्तायाः तैरागत्य नीतायाः।विशेषणद्वयं कीदृक् वदनाम्बुजं । परिवर्तिता कन्धरा ग्रीवा यस्मिन् तत्तथा किंतु मत्सकाशं गम्यमानत्वात् मद्भवनोन्मुखत्वाच्छज्जयाहीभर्त्रानाहूतैव पितृगृहाभिमुखा पित्रादिवाक्यात् तस्मान्नता नम्रा भूमिं दृष्टवती भ्रूर्यस्मिन् तत्तथा ॥ २६ ॥

कथय कथमिवाशा जायतां जीविते[1] मे
मलयभुजगवान्ता वान्ति वाताः कृतान्ताः ॥
अयमपि खलु गुञ्जन् मञ्जु माकन्दमौलौ
चुलकयति मदीयां चेतनाः चञ्चरीकः ॥ २७ ॥
निरुध्य यान्तीं तरसा कपोतीं
कूजत्कपोतस्य पुरो दधाने ॥

हे पान्थ त्वं मे कथय कथमिव केनाप्युपायेनापि मे जीवने आशा जायतां । कथं यतः पुष्पकर आसन्नः । तमेव विवृणोति मलयभुजगवान्ताः मलयगिरिजातसर्पवहाः वाता वान्ति निश्वासतुल्याः सविषा इत्यर्थः । ननु चन्द्रगिरिजाताः शीताः सर्पफूत्कारसंपर्गजा दहना एवेत्याशयः। एतादृशा वाताः वान्ति । कीदृशाः वाताः कृतान्ताः कृतस्य कार्यस्य अन्ता नाशकाः तत्कृतः दक्षिणवायुसौरभ्यात् मदनोद्गमः तस्मात् कार्यविस्मृतिर्विरहिणां भवतीत्याशयः । अयमपि चञ्चरीकः पिकः मञ्जु यथा स्यात्तथा माकन्दमौलौ रसालशाखोत्तंसे खलु गुञ्जन् संभावनया कामिनां काममुद्दीपयन् शब्दायमानः सन् मदीयां मद्देहगतां चेतनां मज्जात्मिकं तेजस्तां चुलकयति नाशयतीत्यर्थः । यथा वा । वसन्तप्रारम्भे प्रियविरहखिन्ना सहचरी यदि प्राणान् मुञ्चेत्तदिह वद भागी भवति कः । वयो वा स्नेहो वा कुसुमविशिखो वेति विमृशं स्तुहीति प्रव्यक्तं पिकनिकरझङ्कारमशृणोत् । इति अत्र निकरशब्दो न स्पष्टार्थः ॥ २७ ॥

---

१ जीविते इ० पा० । २ अत्रायं सप्तविंशानन्तरं श्लोकः—

प्राणापहरणेनासि तुल्यो हालाहलेन मे ।
शशाङ्क केन मुग्धेन सुधांशुरिति भाषितः ॥ १ ॥

मयि स्मिताद्रं वदनारविन्दं
सा मन्दमन्दं दमयाम्बभूव ॥ २८ ॥
तिमिरं हरन्ति हरितां पुरःस्थितं
तिरयन्ति तापमथ तापशालिनाम् ॥
वदनत्विषस्तव चकोरलोचने
परिमुद्रयन्ति सरसीरुहश्रियः ॥ २९ ॥
कुचकलशयुगान्तर्मामकीनं नखाङ्कं
सपुलकतनुमन्दंमन्दमालोकमाना ॥
विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकितनतनताङ्गी सद्य सद्यो विवेश ॥ ३० ॥

निरुध्येति । सा नायका स्मिताद्रं मन्दहास्यं स्निग्धं सरसामिति यावत् मन्दंमन्दं वदनारविन्दं दमयाम्बभूव नासाभूषणचिक्के । विशेषात् नमयाम्बभूवेति पाठे नसिप्रोतं यथा नासाभूषणं नम्रवदाचरणमर्थः । किं कृत्य कपोतीं तरसा यान्तीं शीघ्रं गच्छन्तीं निरुध्य कूजत्कपोतस्य दधाने पुरोग्रे स्थिते मयि सति ॥ २८ ॥

तिमिरमिति । सरसीरुहश्रियः कमलकान्तयः तव वदनत्विषः परिमुद्रयन्ति मुखशोभास्तिरकुर्वन्ति यथा हे चकोरलोचने रात्रौ कमलानामस्फुटत्वात् मुखानां रात्रौ रतारम्भकतया प्रसन्नत्वान्निरुपमातिशयः। वदनत्विषः हरितां दिशां पुरस्थितं अग्रस्थितं तिमिरं अन्धकारं हरन्ति चन्द्रोपममुखत्वात् सरसीरुहश्रियस्तु वाथ तापशालिनां पुरस्थितं तापं निर्जलदेशगमनरूपं हरन्ति । तस्मादन्योन्योपमत्वात् युक्तमिति भावः ॥ २९ ॥

कुचेति।बाला नायिका मां गवाक्षे विनिहितवदनं वीक्ष्य प्रेक्षन्मुखं

---

१ नमयांबभूव इ० पा० ।

विधाय सा मद्वचनानुकूलं
कपोलमूलं हृदये शयाना ॥
तन्वी तदानीमतुलां वरोरेः
साम्राज्यलक्ष्मीमधरी चकार ॥ ३१ ॥
मुहुरर्थितयाद्य निद्रया मे
बत यामे चरमे निवेदितायाः ॥
चिबुकं सुदृशोर्मृगानि यावन्मयि
तावन्मुदिरोपि निर्दयोभूत् ॥ ३२ ॥

दृष्ट्वा लज्जया चकितं भीतं नतनतं नीचं मुखं बहुलं ह्रीसहं सद्म सद्यो विवेश गुप्ताभूदित्यर्थः । कीदृशी बाला कुचकलशयोः युगं तस्यान्तः हृदि मध्ये इत्यर्थः। मामकीनं मद्धस्तकृतं नखाङ्कं नखाकारव्रणं सपुलका सलोमहर्षा तनुर्यस्यां यथा भवति तथा किंतु रोमाञ्चितशरीरेत्यर्थः । मन्दं मन्दं आलोकमाना प्रेक्षन्तीत्यर्थः ॥ ३० ॥

विधायेति । तदानीं तदा तस्मिन् समये इत्यर्थः । तन्वी लब्धावयवा नायका वरोरेः इन्द्रस्य साम्राज्यलक्ष्मीः सम्राज इयं साम्राज्याया लक्ष्मीस्तामतुलामपि अतुल्यामप्यधिकामपि इत्यर्थः । किंतु शची शोभामपि अधरीचकार ॥ यद्यपि उत्तरा तथापि सुखसंमानात् सा लक्ष्मीः नीचा यतो भोक्तुमशक्या तस्मात् स्वस्त्रीसेवैव सुखदोत्तमा ज्ञेयेत्याशयः । कीदृशा तन्वी मद्वदनानुकूलं मम मुखस्य चुम्बनद्वारानुकूलं कपोलमूलं विधाय गण्डस्थलं धृत्वेत्यर्थः । हृदये उरसि उपरि शयाना विपरीतासनगता इत्यर्थः ॥ ३१ ॥

मुहुरिति । मे मया मुहुरर्थितया प्रार्थितया निद्रया मे बत यामे

---

१ वलोरेः इ० पा० । २ च रसे इ० पा० ।

श्रुतिशतमपि भूयः शीलितं भारतं वा
विरचयति तथा नो हन्तसन्तापशान्तिम् ॥
अयि सपदि तथायं केलिविश्रान्तिकान्ता-
वदनकमलनिर्यत्कान्तिसान्द्रो नकारः ॥ ३३ ॥
लवलीं तव लीलया कपोले
कवलीकुर्वति कोमलत्विषा ॥
परिपाण्डुरपुण्डरीककण्ठे
परिपेतुः परितो महाधयः ॥ ३४ ॥

चरमे चतुर्थे प्रहरे निवेदितायाः अन्वेष्टुमागतायाः सुहृशो वनितायाः चिबुकं आभरणं यावन्मृगामि अन्वेष्यामि तावन्मुदिरोऽपि अङ्गुलिमुद्राभरणेपि मायि निर्दयोभूत् गतः तस्यान्वेषणासक्तं मां अयमपि अन्विष्य तेन निद्रामि सर्वामेव रात्रिं चान्वेषणपरोहं तिष्ठामि ॥ ३२ ॥

श्रुतिरिति । भूयः शीलितं शिक्षितं श्रुतिशतं अपि पुनः भारतं पुराणं च पठितमपि तथा नो अस्माकं सन्तापशान्तिं न विरचयति । अयि हे सखे तया यथायं केलिविश्रान्तिस्तस्याः कारणेन कान्तावदनकमलान्निर्यत्कान्तिस्तया सान्द्रः स्निग्धः यो नकारः नहिनहीति वाक्यं स्त्रीस्वभावजं संतापशान्तिकृत् नान्यदित्याशयः । किंतु रतारम्भे स्त्रीमुखोक्तनहिनाहिशब्देन द्विगुणा सुखासक्तिर्भवति भर्तुः स्त्रीवाक्यकेलिभिरेवोत्साहः । नतु श्रुतिस्मृतिभिः ताभिस्तु वृद्धस्य सुखं भवति । भुक्तभोगस्येत्यर्थः ॥ ३३ ॥

लवलीमिति । हे सखि तव कपोले गल्लद्वये लीलया सहसैव कोमलत्विषा पेलवशोभया लवलीं कवलीकुर्वन्ति। नत्वीदृशा ल-

१ ०वल्गत्कान्तिसान्द्रो नकारः इ० पा० । २ ०पुण्डरीकखण्डे इ० पा० ।

यौवनोद्गमनितान्तशङ्किताः
शौर्यशीलबलकान्तिशोभिताः ॥
संकुचन्ति विकुचन्ति राघवे
जानकीनयननीरजश्रियः ॥ ३५ ॥
अधिरोप्य हरस्य कृत्तचापं
परितापं प्रशमय्य बान्धवानाम् ॥
परिणेष्यति वा न वा युवाऽयं
निरपायं मिथिलाधिनाथपुत्रीम् ॥ ३६ ॥

वली यादृशी गल्लरुचिः।महाधयः महत्य आधयः मानसीव्याधयः शुष्कभावात् परिपाण्डुरं पीतवर्णं न रक्तं तत् पुण्डरीकं सिताम्भोजं तस्मिन् शिशिरजनितपाण्डुरूपकमलस्य कण्ठे परितः सर्वतो दिग्भ्यः परिपेतुः पवनदाहः पद्मविनाशकृत् शिशिरे भवति अत्र तु न तथा ॥ ३४ ॥

यौवनेति । यौवनस्य उद्गमो वयसः आधिक्यं तेन नितान्तं अधिकं शङ्का येषां ते तथा शौर्यं शीलं स्वभावं बलस्य कान्तिः विजयलक्ष्मीः ताभ्यां शोभिताः जानकीनयनयोः नीरजश्रिय इव श्रियः प्रान्तरक्तोत्पलवच्छोभाः संकुचन्ति सङ्कोचं कुर्वन्ति। कुतः यतो रावणालोकनात् अथ च राघवे विकसन्ति रामचन्द्रं सहासमालोकयन्ति ॥ ३५ ॥

अधीति ।अयं युवा तरुणो रामः मिथिलाधिराजस्य जनकस्य पुत्रीं श्रीसीतां परिणेष्यति वा न परिणेष्यति इति कस्याप्यभिप्रायः । किंकृत्य हरस्य कृत्तचापं त्रुटितधनुं अधिरोप्य ज्यासहितं कृत्वा पुनः बान्धवानां परितापं प्रशमय्य किंतु जामदग्नेः स-

---

१ शील शौर्य० इ० पा० ।

भुजपञ्जरे गृहीता नवपरिणीता चिरेण दहति वधूः ॥
तत्कालजालपतिता बालकुरङ्गीव वेपते बाला ॥ ३७ ॥
उपनिषदः परिपीता गीता पि च हन्त मतिपथं नीता ॥
तदपि न हा विधुवदना मानससदनाद्बहिर्याति ॥३८॥
अकरुणहृदयप्रियतम मुञ्चामि त्वामतः परं नाहम् ॥

काशात् प्रादुर्भवद्भयहेतुं दशाररथप्रभृतिदुःखं दूरीकृत्वेत्यर्थः। इति तथैव रावणमारणद्वारा ततो लब्धां जानकीं। उवास्य(?)तं नेत्रयोर्निरन्तरितदर्शनतो न कोपि नायिकादोषः ॥ ३६ ॥

भुजेति। वधूः नवपरिणीता सती भुजपञ्जरे गृहीता भुजयोः पञ्जरं आवरणं आसनविशेषं तस्मिन्गृहीता न भुक्तिमायाता नूतनभोगत्वात् चिरेण दहति मलिना भवति चिरशब्दात् वारंवारमैथुनसेवत्वायेत्यर्थः। तत्तस्मात् यस्मादसौ बाला अज्ञातयौवना रुद्धमदनाङ्कुशेत्यर्थः। वेपते कम्पते कथं यथा कालस्य जाले पतिता मृगघ्नवशमायाता सती बाला कुरङ्गी हरिणीव। कथं यथा मृगी लुब्धकाहता वेपते तथेयं किंतु स्वप्राणनाशनव्यथया भूयमानं उद्भूयत इत्यर्थः ॥ ३७ ॥

वधूरिति। उपनिषदो विचारवेदाः परिपीताः अधीताः आस्वादिताः अर्थावगमादित्यर्थः। गीतापि अष्टादशाध्यायी भारतोक्ता मतिपथं नीता विचार्य श्रेष्ठाज्ञातवस्तुन उपादेयत्वात्। तदपि हा कष्टतरं विधुवदना चन्द्रमुखी नायका मानससदनान्मन्मथस्थानात् बहिर्न याति तत्रैव स्थिता सति अतृप्तया मां शीक्षयतीत्यर्थः ॥ ३८ ॥

---

१ वरेण रहसि इ० पा०। २ वेपते नितराम् इ० पा०।

इत्यालपति कराम्बुजमादायालीजनस्य विकला सा३९
लोभाद्वराटिकानां विक्रेतुं तक्रमनिशमटन्त्याः ॥
लब्धो गोपकिशोर्या मध्येरथ्यं महेन्द्रनीलमणिः ॥४०॥

हे अकरुण हृदयनिर्दयचित्त हे प्रियतम मम प्रियनायक परं अतः केवलमस्मादेव हेतोः त्वां न मुञ्चामि त्यक्ष्यामि कुतः अकरुणं हृदयं तस्मिन्नपि कामातुरत्वाद्देहश्रमकारिणि सति तद्विषये हृदि मध्ये इत्यस्मिन् प्रियतमत्वेनाभीष्टत्वं स्त्रीकुलं श्रमपदावास्यैरतोत्साहयति पुरुषा एव श्राम्यन्तीति भावः । यद्वा अकरणहृदयपाठे नास्ति करणमिन्द्रियं यस्य तथाभूतो रतः तृप्तः जडहृदय इत्यर्थः । तस्मादपि श्रमरताहित्यादप्रियइत्यपि प्रियतमत्वेन संबुध्यते इत्यालपति आकथयति सभामध्ये अलीजनस्य कराम्बुजं हस्तं आदाय गृहीत्वा सा गीतवीन्नविकला विक्षिप्तामागता ॥ ३९ ॥

वराटिकानां द्रव्यकृतशंखानां । कौडी इति लोके । तासां लोभात् विक्रेतुं तक्रमनिशं अटन्त्याः । गमनं कुर्वाणायाः भ्राम्यमाणाया इत्यर्थः । गोपकिशोर्या गोपकन्याया मध्येरथ्यां रथ्यानां मध्ये महेन्द्रनीलमणिः इन्द्रनीलमणिः 'पनना इतिलोके।स लब्धः प्राप्तः यथा कस्याः पितृदत्तायाः नायिकायाः पातिव्रत्यतिरस्कारस्तद्वदित्यर्थः । यथा रसो वै रसः रसस्तु परकीयायामेव यथा मणिः प्रायेण गोपकन्याभाग्यं मणिशब्देन सर्वद्रव्याणां विशिष्टद्रव्यरूपो भगवान् कृष्णो वरो लब्धः वृषभानुजया तथापि मध्ये रथ्यात्वेन निर्लज्जत्वं अप्राप्तसुखं व्यज्यते ४०

---

१ नक्रमानिशमटन्त्याः इ० पा०। २ अत्रायं चत्वारिंशाग्रेऽधिकः श्लोकः-
रूपादपि निरसितुं रसयन्त्या हरिमुखस्य लावण्यम् ।
तृप्तः शिवश्चिव सकले जाता सकलेऽपरे जयत्यरुचिः ॥ १ ॥

किं जल्पसि मुग्धतया हन्त ममाङ्गं सुवर्णवर्णमिति ॥
तद्यदि पतति हुताशे तदा हताशे तुलां तवारोहेत् ॥ ४१ ॥
औत्सुक्यात्परिमिलतां त्रपया सङ्कोचमञ्चतां च मुहुः ॥
नवसंगमयोर्यूनोर्नयनानामुत्सवो जयति ॥ ४२ ॥
गरिमाणमर्पयित्वा लघिमानं कुचतटात् कुरङ्गदृशाम् ॥
स्वीकुर्वते नमस्ते यूनां धैर्याय निर्विवेकाय ॥ ४३ ॥
निःसीमशोभासौभाग्यं नताङ्ग्या नयनद्वयम् ॥
अन्योन्यालोकनानन्दविरहादिव चञ्चलम् ॥ ४४ ॥

किमिति । मुग्धतया अज्ञानतया हे मुग्धेऽतिव्यस्तं वा तया नायिकया सह त्वं किं जल्पसि इति किं ममाङ्गं सुवर्णं मम देहं स्वर्णवत्तेजस्वि तत् यदि हुताशे दाहकत्वात् निराशे हुताशेऽग्नौ तव पतति तदा तुलां आरोहेत् तुल्यतां प्राप्नोति किंतु सुवर्णं परीक्षयेत् । यथाग्नौ तथात्र नायिकापरीक्षणं नायक एवेत्याशयः ॥ ४१ ॥

औत्सुक्यादिति । सुगमम् ॥ ४२ ॥

गरिमाणं गौरवं अर्पयित्वा लघिमानं कुचतटात् कुचमध्यात् गृहीत्वा स्वयंकुरङ्गदृशां स्त्रीणां यूनां च युवानः पुरुषास्तेषां धैर्याय निर्विवेकाय ते तुभ्यं नमः । निर्विवेकत्वेन स्थौल्यार्पणं कुचमर्दनात् लघ्वर्पणं विवेकस्य नाशात् । धैर्यं न लघ्वपि स्थितं कथं कीदृशाय कुचतटसकाशात् लघिमानं स्वीकुर्वते नष्टायेत्यर्थः ॥ ४३ ॥

निरिति । निःसीमासौ अधिकप्रतिष्ठा तस्याः शोभायाः सौभाग्यं सर्वशृंगारश्रेष्ठं नताङ्ग्या नयनद्वयम् । अन्योन्यमालोकनमेवानन्दं रतं तस्य विरहादिव चञ्चलम् ॥ ४४ ॥

---

१ कुचतटाद् सरोजदृशामिति वा पाठः ।

भवति वयसि प्रथमे समुदञ्चति तरुणिमनि सुदृशः ॥
दधति स्म मधुरिमाणं वाचो गत्वयश्च विभ्रमाश्च भृशम् ४५
गुरुमध्ये हरिणाक्षीमार्तिकशकलैर्निहन्तुकामं माम् ॥
रदयन्निव रसनाग्रं तरलितनयनं निवारयाञ्चक्रे ॥ ४६ ॥
नयनाञ्चलावमर्षं या न कदाचित्पुरा सेहे ॥
आलिङ्गितापि जोषं तस्थौ सागन्तुकेन दयितेन ॥ ४७ ॥
मानपराग्वदनापि प्रियाशयाने च दयितकरकमले ॥
उद्वेल्लद्भुजमलसग्रीवाबन्धं कपोलमाधत्ते ॥ ४८ ॥

तरुणिं अतिक्रम्य सुदृशः वयसि वृद्धनायकावयक्रमे(?!)प्रथमे भवति सति बालवयसि अथ तृतीये युववयसि समुदञ्चति सति वाचो बाल्ये गतयो युवत्यांश्च विभ्रमाभृशं धुरिमाणं धूर्भारं तस्य भावं दधति स्म ॥ ४५ ॥

गुर्विति । तरलितनयनं चञ्चलनेत्रं रसनाग्रं रदयन् इव जिह्वाग्रं मर्दयन्निव नासिकाग्रगततर्जन्या मां निवारयांचक्रे निवारयामास कथंभूतं मां गुरुमध्ये श्वस्रूश्यालसभार्यां आर्त्तिकशकलैर्नीराजनखण्डैः पिष्टहरिद्राकृतैः कृत्वा हरिणाक्षीं मृगवच्चञ्चलनेत्रां निहन्तुकामं प्रहर्तुमिच्छन्तम् ॥ ४६ ॥

नयनेति । यानाय या कदाचित् पुरा पूर्वं नयनयोरञ्चले प्रान्ते तयोरवमर्षं न सेहे । जोषं सुखेन आलिङ्गितापि गन्तुकेन विदेशं प्रति प्रस्थितेन यद्वा गन्तुकेन विदेशादागतेनालिंगिता तस्थौ स्थिताभूत् । किंतु न हृदयाद्दूरीभवितुं कामनीया॥४७॥

मानपराग्वदना न मानवती अपि प्रियाशयाने दयितकर-

---

१ भवतीत्याद्ययं श्लोकोनिः सीमेत्यस्यादौ पठितः केषु चित्पुस्तकेषु । भवतीत्यत्र मञ्चतीति वा पाठः ॥

लोचनफुल्लाम्भोजद्वयलोभान्दोलितैकमनाः ॥
कस्तूरीतिलकमिषादयमलिकेलिस्तवोल्लसति ॥४९॥
अधिरजनि प्रियसविधे कथमपि संवेशिता गुरुभिः ॥
किं भवितेति सशङ्कं पङ्कजनयना परामृशति ॥ ५० ॥
चिन्तामीलितमनसो मनसिज सरूपो विहीनप्रभाः
प्राणेशः प्रणयाकुलः पुनरसावास्तां समस्ता कथा ॥
एतत्त्वां प्रतिबोधयामि मम चेदुक्तिं हितां मन्यसे
मुग्धे मा कुरु मानमाननमिदं राकापतिर्जेष्यति ॥५१॥

कमले प्रियहस्तपद्मे उद्वेल्लद्भुजं आलिङ्गितबाहु यस्मिन् तत् अलसं ग्रीवाबन्धं यत्र तादृशं कपोलं आधत्ते ॥ ४८ ॥

लोचनेति । कस्तूरीतिलकस्य मिषस्तस्मात् अयं अलिकेलिस्तवोल्लसति । कीदृशः केलिः लोचने एव फुल्लाम्भोजे तयोर्द्वये लोभेन आन्दोलं इतं प्राप्तं चञ्चलत्वमायान्तं केवलं एकं मनो यस्याः सा तथा ॥ ४९ ॥

अधीति । अधिरजनि रजन्यामधिगतं यत् प्रियस्य सविधं सत्कारं तस्मिन् कार्ये कथमपि महता कष्टेन गुरुभिः पित्रादिबन्धुभिः संवेशिताऽऽज्ञप्ता नियुक्तेत्यर्थः । पङ्कजनयना पङ्कजशब्दात् किंचिन्म्लाननेत्रा सा सती किं भविता भविष्यति इति सशङ्कं शङ्कया सहितं यत्र यस्यां क्रियायां यथा भवति तथा परामृशति विचारयति ॥ ५० ॥

चिन्तेति । हे मुग्धेऽहं त्वां प्रति एतद्वक्ष्यमाणं प्रतिबोधयामि ज्ञापयामि कथयामीत्यर्थः । चेत् त्वं ममोक्तिं हितां मन्यसे

---

१ °विनिवेदयामि इति वा पाठः ।

अलङ्कर्तुं कर्णौ भृशमनुभवन्त्या नवरुचं
ससीत्कारं तिर्यग्वलितवदनाया मृगदृशः ॥
कराब्जव्यापारानतिसुकृतसारान् रसयतो
जनुः सर्वश्लाघ्यं जयति ललितोत्तंस भवतः ॥ ५२॥
आयातैव निशा निशापतिकरैः कीर्णं दिशामन्दिरं
भामिन्यो भवनेषु भूषणगणैरङ्गान्यलंकुर्वते ॥
मुग्धे मानमपाकरोषि न मनागद्यापि रोषेण ते
हाहा बालमृणालतोऽप्यतितरां तन्वी तनुस्ताम्यति५३॥

तार्हि मानं मा कुरु इदं आननं माने कृते सति राकापतिः पूर्णिमापतिश्चन्द्रो जेष्यति मालिन्याद् मुखे जन्यमानलाञ्छनत्वादिति भावः । कुतः यतः चिन्तामीलितं शुचानिलीनं मानसं यस्य तत्तथा मनसिजः कामः जातः । सख्यो विहीना प्रभा यासां ताः तथा प्राणेशः प्रियतमप्रणयाकुलः स्नेहव्याकुलितचेताः । असौ नायका पुनः समस्ता कथा प्रतिद्वावेवास्तु तस्य निन्दकाप्रियाप्रियायानिन्दकोसौ (?) ॥ ५१ ॥

अलमिति । हे ललितोतंस ललितायाः उत्तंस प्रिय । भवतः तव सर्वश्लाघ्यं जनुः जयति किंभूतस्य तव अतिसुकृतस्य सारान् कराब्जव्यापारान् हस्तकृतकार्यान् रसयतः स्त्रीहस्ततले स्वहस्ततालेन वार्त्तामालयतः।किं कर्तुं भृशं अधिकं नवरुचं अनुभवन्त्याः शोभायमानायाः ससीत्कारं व्यथया सीत्काराविर्भावं यथा स्यात्तथा तिर्यग्वलितं वदनं यस्याः सा तथा तस्या मृगदृशः हारिणाक्ष्याः कर्णौ अलं कर्तुं भूषितुमित्यर्थः ॥ ५२ ॥

आया० । हे मुग्धे निशापतिकरैः चन्द्रकिरणैः निशारात्रिः

---

१ दिशामन्तरम् ।

वाचं माङ्गलिकीं प्रयाणसमये जल्पत्यनल्पं जने
केलीमन्दिरमारुतायनमुखेविन्यस्तवक्त्राम्बुजा ॥
निःश्वासग्लपिताधरं परिपतद्बाष्पार्द्रवक्षोरुहा
बाला लोलविलोचना शिवशिव प्राणेशमालोकते ५४॥

आयातैव एवशब्दोत्र पादपूरणे दिशामन्तरं कीर्णं व्याप्तं चन्द्र-राश्मिभिरित्यर्थः। भामिन्यो भवनेषु शृङ्गारगृहेषु भूषणानां स्वर्णम-णिमुक्ताभरणानां गणैः समूहैरङ्गानि नासाद्यवयवानि अलंकुर्वते भूषयन्तीत्यर्थः । तथापि त्वं मानं मनाक् अपि नापाकरोषि न दूरीकरोषि अद्यापि ते रोषेण हाहा बालमृणालतोपि अतितरां तन्वी तस्मादप्यतिमृद्वी तनुस्ताम्यति कुप्यति किन्तु मानभावात् क्रोधावसरस्तत्र रतकारिणी नायकादप्यतिविषमृदुलोपस्थशरा-न शाम्यति रतोत्साहे निश्चितापि न निवर्तत इत्याशयः ॥५३॥

वाचमिति । मांगलिकीं मंगलानुसारिणीं तां जल्पति जने सति अनल्पं यथा स्यात्तथा बहुतरमित्यर्थः । केलीमन्दिरस्य

१ वाचो माङ्गलिकीः इति बहुवचनान्तः पाठोपि चतुःपञ्चाशत्तमाग्रे इमं प्रक्षिप्तः—

यदवधि दयितो विलोचनाभ्यां सहचरि दैववशेन दूरतोभूत् ॥
तदवधि शिथिलीकृतो मदीयै रथकरणैः प्रणयो निजक्रियासु ॥ १ ॥
निखिलां रजनीं प्रियेण दूरात् उपयातेन विशोधिता कथाभिः ॥
अधिकं नहि पारयामि वक्तुं सखि मा जल्प तवायसी रसज्ञा ॥ २ ॥
निपतद्बाष्पभरोधमुक्तचाञ्चल्यतारकम् ॥
कदानयननीलाब्ज मालोकेय मृगीदृशः ॥ ३ ॥
यदि लक्ष्मण सा मृगेषणा न मदीक्षासरणिं समेष्यति ।
अमुनाजडजीवितेन मे जगता वा विफलेन किं फलम् ॥ ४ ॥
भवनं करुणावती विशन्ती गमनाज्ञालवलाभलालसेषु ।
तरुणेषु विलोचनाब्जमालामथ बाला पथि पातयांबभूव ॥ ५ ॥
पापं हन्त मया हतेन विहितं सीतापि यद्यापिता
सा मामिन्दुमुखी विना बत वने किं जीवित धास्यति ।

दारिद्र्यं भजते कलानिधिरयं राकाधुना म्लायति
स्वैरं कैरवकाननेषु परितो मालिन्यमुन्मीलति ॥
द्योतन्ते हरिदन्तराणि सुहृदां वृन्दं समानन्दति
स्वं वेदश्रसि काञ्चनाङ्गि वदनाम्भोजे विकासश्रियम् ५९

माकतायने मधास्यं तस्य मुखे विन्यस्तं वक्त्राम्बुजं यया सा तथा सति परिपतन्ति बाष्पाणि तैः आर्द्रौ वक्षोरुहौ स्तनौ यस्याः सा तथा बाला मुग्धा नायिका लोले विलोचने यस्याः सा तथा चञ्चलेक्षणा सतीत्यर्थः । निःश्वासम्लापिताधरं श्वाससंशुष्काधरौष्ठं प्राणेशं नायकमवितृप्तमित्यर्थः । शिवशिव आलोकते काकुरसः । तथा नायिका मुग्धलक्षणम् ॥ ५८ ॥

दारिद्र्यमिति । असौ कलानिधिः चन्द्रः दारिद्र्यं भजते अमा-

आलोकेव कथं मुखं सुकृतिनां किंते वदिष्यन्ति मां
राज्यं वातु रसातलं पुनरिदं न प्राप्तितुं कामये ॥ ६ ॥
जघसि प्रतिपक्षकामिनीसदनादन्तिकमायति प्रिये ।
सुदृशो वदनाब्जकः पयोरुदियाय त्वरयाऽरुणद्युतिः ॥ ७ ॥
क्षमापयैकपदयोः पदयोः पतति प्रिये ।
रोमुः सरोजवदना वदनारुणकान्तयः ॥ ८ ॥
निर्वासयन्ती धृतिमङ्गनानां शोभा हरेरंघदङ्गो धयन्त्याः ।
चिरापसर्पत्स्मृतिमात्मलोपि रोषः क्षणमाघुणिको बभूव ॥ ९ ॥
राज्ञी मयातिकृच्छ्रेण महद्भवमुपस्थितम् ।
बाले वारय पाञ्चस्य वासदानविधानतः ॥ १० ॥
मलयानिलमनलयिति मयिभवने काननीयति क्षणतः ।
विरहेण विकलहृदया निर्जलमीनायते महिला ॥ ११ ॥
कालामुदयं सा हालाहलवद्विजानती नितराम् ।
अपि नीलोत्पलमालां बाला ज्वालावलिं किलामनुत ॥ १२ ॥
विधिवञ्चितया मया न यातं तस्थि सङ्केतनिकेतनं प्रियस्य ।
अधुना बत किं विधातुकामो मयि कामो कृपतिः पुनर्न जाने ॥१३॥

पाटीरास्तु भुजङ्गपुङ्गवमुखापाता इवातापिनो
वाता वान्ति दहन्ति लोचनममीताम्रारसालद्रुमाः ॥
एते हन्त किरन्ति कूजितमयं हालाहलं कोकिला
बाला बालमृणालकोमलतनुः प्राणान् कथं रक्षतु ५६॥
आयातैव निशा मनोमृगदृशामुन्निद्रमातन्वती
मानो मे कथमेष संप्रतिनिरातङ्कं हृदि स्थास्यति ॥

वास्यावर्णनमित्यर्थः। निष्कलो भवति। अथ च राकाधुना म्लायति कुहूरूपा भवतीत्यर्थः। स्वैरं स्वेच्छयैव कैरवाणां कुमुदानां काननेषु परितः मालिन्यं निर्विकासत्वं उन्मीलति सति मुद्रिते सति कौमुद्यभावादित्यर्थः । हरिदन्तराणि द्योत्तते कुतः यतः हे काञ्चनाङ्गि स्वर्णवद्गौरशरीरे त्वं चेद्वदनाम्भोजे विकासश्रियं मुखे हास्यमेव अश्नसि अङ्गीकरोषि शोभायाइत्यर्थः । तर्हि सुहृदां वृन्दं समानन्दति ॥ ५५ ॥

पाटीराश्चन्दनद्रुमाः भुजङ्गपुङ्गवानां मुखेभ्य आयाता निःश्वासरूपा इव न तु चन्दनाः शीतलाः सर्पफूत्कारेभ्यो मिश्रिताः सन्तेः सन्तापवहा इति भावः। आतापिनः चिल्लाः पक्षिणो यथा वाता वान्ति चक्रवातावात्यारूपवत् । अमी रसालद्रुमाः ताम्रा जाताः ग्रीष्मर्तुवत् । एते कोकिलाः कूजितमयं हालाहलं हन्त किरन्ति विरहिणां कोकिलशब्दो व्यथादाता तस्मान्मारणात्मकं शब्दं विषमुच्यते ॥ बाला बालमृणालवत् कोमला तनुर्यस्याः सा कथं प्राणान् रक्षतु कथं रतोद्यता न भवतीत्यर्थः अपि तु भवतु आशीः कथम् ॥ मनस्विनीमानविघातदक्षं तदेवजातं वचनं स्मरस्येति कुमारः ॥ ५६ ॥

---

१ पाटीरद्रुमु० इति पाठः ।

[redacted] ।

[redacted] यावद्विश्वचेतरां
[redacted] लेभे कथंसे विधोः॥५७॥
[redacted] स्यन्दैर्नेत्रा रसा-
[redacted] स्तम्भोत्सवव्रीलया ॥
[redacted] द्रेपाटचरैः-
[redacted] रुतैः ॥ ५८ ॥

[redacted] क्लेदं रतोत्सुक निद्रार-
[redacted] नातन्वती कुर्वन्ती वि-
[redacted] मनः सम्प्रति अधुना नि-
[redacted] स्यति न मानं स्था-
[redacted] ज्ञेयः । मानराहित्यात् ।
[redacted] निकेतनमित्यर्थः ॥ अ-
[redacted] इमं पूर्वोक्तं यावद्वि-
[redacted] तस्य शोभा सुषमा
[redacted] बिम्बं मण्डलं बभासे
[redacted] । २७ ॥
[redacted] प्रणयं स्नेहं चन्द्र-
[redacted] अमुष्य कान्तस्य र-
[redacted] अमीलयत् मुद्रीच-
[redacted] विस्मृतप्रभातेत्यर्थः ।
[redacted] भ्रमरैः कृत्वा
[redacted] गतैः पु-
[redacted] इत्यन्वयः । नतु

विदूरादाश्चर्यस्तिमितमथ किञ्चित्परिचया-
दुदञ्चच्चाञ्चल्यं तदनु परितः स्फारयति रुचिः ॥
गुरूणां संघातैः सपदि मयि याते समजनि
त्रपाघूर्णोत्तारं नयनमिह सारं मृगदृशाम् ५९ ॥
कपोलावुन्मीलत् पुलकनिकरौ मयि मनात्
मृशन्त्यतः स्मेरं स्तबकितमुखाम्भोरुरुरुचः ॥
कथंकारं शक्याः परिगदितमिन्दीवरदृशो
लसद्राक्षानिर्यत् रसभरसमच्छाभणतयः ॥ ६० ॥

तस्याहस्तावृत्तियुक्त इतिभावः । सा दक्षिणा नायका पद्मिनी पद्मलाञ्छितहस्तेत्यर्थः ॥ ५८ ॥

विदूरात्समीपात् आश्चर्ये अस्तिमितं निश्चलं अथ किंचित् परिचयात् सङ्गत्या उदञ्चत् प्रगटीभवत् चाचल्यं यस्य तत्तथा तदनु परितः सर्वतो वृद्धा रुचिः सूर्यप्रभा स्फारति उन्मेषयति जाग्रयतीत्यर्थः । किं जागृति मृगदृशां त्रपाघूर्ण उत् उर्ध्वे तारे यस्य तादृशं उर्ध्वकनीनयनं इह सारं श्रेष्ठं कामोद्दीपकप्रेक्षणात् । कस्मिन् सति गुरूणां संघातैः समूहैः सह सपदि शीघ्रं उद्यमायेत्यर्थः । मयि याते सति ॥ ५९ ॥

अथ इन्दीवरदृशः कज्जलबाष्पावृतनेत्रायाः स्त्रियः परिगदितं वाक्यं कथं कारं कथामिति प्रबन्धयुक्तं शक्यङ्कारशब्दात् कर्त्तुपर्यायो ज्ञेयः । शक्यः समर्थो भवति यस्या भणतयः लसन्ति द्राक्षा या मृद्वीका तस्याः रसस्तेन भरः भारस्तस्य समच्छाः मिष्टा इत्यर्थः । स्तबकिता सान्द्रा मुखाम्भोरुहस्य

---

१ स्फारितरुचिः इ० पा० । २ संघातं इ० पा० । ३ सारंगमदृशः इ० पा० । ४ उन्मीलन्नवपुलकपाली मयि मनाक् इ० पा० ।

[illegible] वैशाखक त्वां तु यः
[illegible] जरातो विधिः ॥
[illegible] विन्दश्रिये
[illegible] जातो नवो मन्मथः६१
[illegible] नन्दसूनोः
[illegible] कर्मणि ज्ञा ॥
[illegible] गण्डमूले
[illegible] मादुरासीत्॥६२॥

[illegible] कामिन्याः सकाशे
[illegible] उन्मीलत् पुलकस्य
[illegible] कपोलौ मृशति सति
[illegible] सतीतिपाठे(?)।

[illegible] वैशाखकः स्यादायुष्मा-
[illegible] जनयामास ।
[illegible] जरातः वृ-
[illegible] नवो जातो मन्मथः क-
[illegible] खण्डं नास्ति
[illegible] संप्रति
[illegible] तस्य नयने इव
[illegible] तस्य श्रिये श्री-
[illegible] ॥ ६१ ॥
[illegible] बहुलं मधु मद्यं यत्र

[illegible] विशेऽन्यत्र पुस्तके

प्रसङ्गे गोपानां गुरुषु महिमानं यदुपते-
रुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूः ॥
विषज्वालाजालं झटिति वमतः पन्नगपते
फणायां साश्चर्यं कथयतितरां ताण्डवविधिम्॥६३॥

यथा स्यात्तथा नन्दसूनोः कृष्णात् काचित् कान्तिनिखिलानां सर्वेषां प्राणिनां नयनान्याकर्षयति तत् तस्मिन्कर्माणि जानातीति ज्ञा सती आविर्भूता । कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते । तस्मात्सार्थकमेवेति भावः । स्यन्दिनी स्रवयुक्ता भक्त्युद्रेकेणेत्याशयः । तस्या अवधिमुखे विरहे दीर्घश्वासो निश्वासः गण्डमूले पाण्डिमा योतगच्छस्थलता च शून्या वृत्तिः आगमनं मधुपुरीप्रस्थानात् तत्रैवाविर्भावाधिक्यं दृष्टं रङ्गं गतः साग्रज इति तत्रैव कुलमृगदृशां चेतसि पुरनायिकानां चाकुलं जातिः तस्याः मृगदृशां याःवनितानां चेतसि प्रादुरासीत् ॥ ६२ ॥

प्रेति । कुलवधू राधिका प्रसङ्गे सभाप्रास्ताविकवार्तालापे गुरुषु पित्रादिषु तृतीयार्थः तैः कृत्वा वर्ण्यमानं गोपानां मध्ये यदुपतेः माहिमानं कृष्णस्य चरितप्रशंसां उपाकर्ण्य श्रुत्वा पुलकिते सगद्गदे कपोले यस्याः सा तथा सति विषज्वालानां जालं समूहं झटिति तत्क्षणमेव वमतः उद्गिरतः पन्नगपतेः कालियस्य फणायां एकशतसंख्यायां दर्व्यां आश्चर्येण सहितं साश्चर्यं यथा स्यात्तथा व्यस्तं वा सेति नायका आश्चर्यं विस्मायकं ताण्डवस्य विधिं । तच्चित्रताण्डवेति श्रीभागवते । विधिशब्दात् यद्यच्छिरो न नमतेंगशतैकशीर्ष्णस्तत्तन्ममर्द खलदण्डधरोङ्घ्रिपातैरिति विध्यर्थः । तं विधिं कथयति तरां शीघ्रं क्रमेणयथायोग्यं विस्तार्य कथयति ॥ ६३ ॥

कैशोरे वयसि क्रमेण तनुतामायाति तन्व्यास्तना-
वागामिन्यखिलेश्वरे रतिपतौ तत्कालमस्याज्ञया ॥
आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहां
किंचासीदमृतस्य भेदविगमः साचिस्मिते तात्विकः ६४
शयिता शैवलशयने सुषमा सैषा नवेन्दुलेखेव ॥
प्रियमागतमपि साविधे सत्कुरुते मधुरवीक्षणैरेव ॥६५॥

कैशोरेइति। हे साचिस्मिते मन्दहास्ये कैशोरे वयसि मुग्धावस्थायां क्रमेण सति तन्व्वाः सूक्ष्मदेहायाः पद्मिन्या इत्यर्थः। तनौ कुचा तनुतां सूक्ष्मत्वं आयाति आयातौ इति योज्यं उक्तिबहुत्वान्न प्रयोगविरोधोत्र दर्शितः। अस्य आज्ञया कान्ताधीनतया रतिपतौ कन्दर्पे तत्कालं तत्क्षणमेवागामिनि सति प्रादुर्भूते सति यतोखिलस्य जगतः जंगमस्य ईश्वरे नियन्तरि तद्विशेषणं। किं भवति कामाङ्कुरे आस्ये मुखे पूर्णशशाङ्कश्चन्द्रस्तद्वत्प्रसन्नता नयनयोः अम्भोरुहां तादात्म्यं कमलमिव मृदुरागत्वं च भवति इति योज्यं किंच पुनः किं भवति। तात्त्विकः तत्त्वभवः वीर्यजः अमृतस्यायुषः भेदः नाशरोगकरत्वात् उक्तं हि कोके महारामः पुमान् यो वै स वै भवति चाश्मरीति तस्यामृतभेदस्य विगमो निष्क्रिया सा भवति वीर्यस्खलनं भवतीत्याशयः ॥ ६४ ॥

शैवलानां शयने शयिता सा एषा नायिका ग्रीष्मे शीतगुणदत्वात्। शैवालशय्यां रचित्वा सुप्यन्ति कामिन्यः तस्मात् शैवलपदं उत्तरस्थानगतं ज्ञेयं अथ पल्लवाङ्कुरपुष्परचितशय्याया-मिति ज्ञेया शैवालस्य लेपकत्वात्। अयुक्तमिव दृश्यते केवल नवेन्दोः लेखेव यथा चन्द्रस्यैकाकलाऽऽकाशस्थिता तथेव नीलवर्णत्वात् अत्र शैवलपदं उपमासादृश्यं प्रियं सविधे सत्कारे

विरहेण विकलहृदया विलपन्ती दयितदयितेति ॥
आगतमपि तं सविधे परिचयहीनेव वीक्षते बाला ६६॥
अधरद्युतिरस्तपल्लवा मुखशोभा शशिकान्तिलङ्घिनी ॥
तनुरप्रतिमात्र सुभ्रवो न विधेरस्य कृतिं विवक्षति ६७
व्यत्यस्तं लपति क्षणं क्षणमहो मौनं समालम्बते
सर्वस्मिन् विदधाति किंच विषये दृष्टिं निरालम्बनाम्॥
श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं
वैदेहीविकलव्यथाविकलितो हा हन्त लङ्केश्वरः ॥६८॥

आगतमपि सत्कारकारिणमित्यर्थः । सत्कुरुते कैः कटाक्षैरेव नतु गीर्भिः यतोसौ विदग्धा ॥ ६५ ॥

विरहेणेति । पारिचयोज्ञानं तेन हीना मूढेव वीक्षते न ज्ञानवती मुग्धेत्यर्थः । अविदग्धा । शेषं सुगमम् ॥ ६६ ॥

अधरेति । सुभ्रुवो मृगाक्ष्याः अधरोष्ठद्युतिः अस्ता निरस्ता पल्लवा यया सा । तथा तनुः देहवल्ली अप्रतिमा नान्यसमाऽस्य विधेर्दैवस्य कृतिं न विवक्षति । शेषं सुगमम् ॥ ६७ ॥

व्यत्यस्तमिति । क्षणं व्यत्यस्तं लपति विरुद्धं कथयति हे वैदेहि मामङ्गीकुर्विति क्षणमहो मौनं समालम्बते तूष्णीं भवति तस्या निरुत्तरात् भयशङ्कया इति भावः। किंच सर्वस्मिन् विषये स्त्रीमात्रे निरालम्बनां न सेादां दृष्टिं विदधातीति सर्वाः स्त्रियोऽमर्षयन् राक्षसेन्द्रः इति जानकीदोषात् अद्भुते कथितं दीर्घं श्वासं दाहवशात् निर्मदत्वाभावात् उरीकरोति निःश्वसतीत्यर्थः।वैदेह्याः विकला व्यथा निर्जीवाशङ्कया विकलितमपि सङ्गमयति सति वैदेही निर्जीवा भविष्यतीति निर्भयात् ईश्वरनियुक्तोसौ रावणो जात इति भावः । तस्मात्परस्त्रीषु रसो विरसो ज्ञेयः ॥ ६८ ॥

---

१ नायं श्लोकोन्यत्र पुस्तकेषु ।

उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण ॥
मुदितं च सकललनाचूडामणिशंसनेन मदनेन ६९

आलोक्य सुन्दरि मुखं तव मन्दहासं
नन्दन्त्यमन्दमरविन्दधिया मिलिन्दाः ॥
किं वासिताक्षि मृगलाञ्छनसंभ्रमेण
चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥ ७० ॥

स्मितं नैतत् किंतु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते को वा कुसुममिदमुच्चत् परिमलम् ॥
स्तनद्वन्द्वं मिथ्याकनकनिभमेतत्फलयुगं
लतारम्या सेयं भमरकुलरम्या[1] न रमणी ॥ ७१ ॥

सङ्गामाङ्गणसन्मुखाहतकियद्विश्वम्भराधीश्वर-
व्यादीर्णीकृतमध्यभागविवरोन्मीलन्नभोनीलिमा ॥
अङ्गारप्रखरैः करैः कवलयन्नेतन्महीमण्डलं
मार्तण्डोयमुदेति केन पशुना लोके शशाङ्कीकृतः ७२

उदितमिति । मुदितं सुरतं उदितं सर्वत्र संबध्यते ॥६९॥

आलोक्येति । अमन्दं बहु यथा स्यात्तथाऽरविन्दधिया पद्मशङ्कया नन्दन्ति आनन्दिताः सन्ति । किं वाथो वा मृगलाञ्छनस्य संभ्रमेण कौतुकेन चन्द्राशङ्कया चटुलयन्ति विवृतास्या भवन्ति हेसिताक्षि कज्जलाञ्चितनेत्रे । शेषं सुगमम् ॥ ७० ॥

स्मितमिति । सुगमम् ॥ ७१ ॥

समिति । अयं मार्त्तण्डः सूर्यः अङ्गारप्रखरैः महासन्तप्तैः करैः एतन्महीमण्डलं कवलयन् संग्रसन् निरसयन्नित्यर्थः । उदेति स केन पशुना शशाङ्कीकृतः । पशबन्धने इत्यस्मात् पश्यतीति वि-

---

१ भ्रमरकुलनम्या इति वा पाठः ।

श्यामं शितं च सुदृशो न दृशोः स्वरूपं
किंतु स्फुटं च गरमेतदथामृतं वा ॥
नोचेत्कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः ॥ ७३ ॥
अलिर्मृगो वा नेत्रं वा यत्रकिञ्चिद्विभासते ॥
अरविन्दं मृगाङ्को वा मुखं चेदं मृगीदृशः ॥ ७४ ॥
दयिते रदनत्विषां मिषात्
अयि तेऽमी विलसन्ति केसराः ॥

ग्रहः केन पशुना जालेन निबद्धेनेत्यर्थः । मेघपर्यायः । तेन मेघेनासौ शशाङ्कीकृतः चन्द्रवच्छीतलः कृतः । अन्तर्लापकः श्लोकोयम् । कीदृशो मार्तण्डः संग्रामाङ्गणे सन्मुखाः युद्धानुयायिनो ये दैत्यास्तैराहतो यो विश्वम्भराधीश्वरस्तेन तेजोरूपेण व्यादीर्णीकृतं विदीर्णीभूतं यन्मध्यं तस्य भागे वितरः बिलं तस्मात् उन्मीलत् दृश्यत् नभोनीलिमा यस्य स तथा दैत्ययुधाहतविदीर्णहृदयत्वात् । सूर्यमध्ये कृष्णत्वं दृश्यते स एव कालसंज्ञः पुमानित्यर्थः ॥ ७२ ॥

श्यामामिति । सुगमम् ॥ ७३ ॥

अलिरिति । सुगमम् ॥ ७४ ॥

---

१ चतुः सप्तमितमाग्रे प्रक्षिप्ता इमे—

सुविरलमौक्तिकतारे धवलांशुकचन्द्रिकाचमत्कारे ।
वदन परिपूर्णचन्द्रे सुन्दरि राकासि नात्र सन्देहः ॥
रूपजलाचलनयना नाभ्यावर्ता कुचावलिभुजङ्गा ।
मज्जन्ति यत्र सन्तः सेयं तरुणी तरङ्गिणी विषमा ॥
शोणाधरांशुसंभिन्नास्तन्वि ते वदनाम्बुजे ।
केसरा इव काश्यन्ते कान्त दन्तालिकान्तयः ॥

[illegible]
[illegible]
[illegible]॥ ७५ ॥

[illegible] हे प्रिये ते तव रदनत्विषां दन्त-[illegible] इन्द्राः केसरा विलसन्ति । अपि च [illegible] नायका तस्याः मकरन्दस्पृहया [illegible] विलसन्ति इत्यत्रापि योज्यम् ॥७५॥

[illegible] इति उक्तिः—

[illegible]
[illegible] मृगशावकचक्षुषा ।
[illegible] चक्रवाके अंको नाकलोक इवामवत् ॥ १ ॥
[illegible]
[illegible] वदनं तव वीक्ष्य बिभ्रत् ।
[illegible]
[illegible] चिरं चकोराः ॥ २ ॥
[illegible] तवेदं दिवसेशामृतरश्मिमण्डलम् ।
[illegible] तवेदं शोभते तन्व रोचेन सदृशं माननम् ॥ ३ ॥
[illegible]
[illegible] वदः कुरोऽस्तु किं ततः ॥ ४ ॥
[illegible] सुधैकमयमूर्तेः ।
[illegible] विधिर्वाच्यः ॥ ५ ॥
[illegible] केवलं
[illegible] ॥ ६ ॥
[illegible] किं वक्त्र इष्यसि ।
[illegible] ॥ ७ ॥
[illegible] हरिणवनितायाः ।
[illegible] ॥ ८ ॥
[illegible]
[illegible] ॥ ९ ॥
[illegible] विधातः सखाऽसि ।
[illegible] त्वयी त्वयाऽपि ॥ १० ॥
[illegible]

सदैव सेव्यं स्तनभारवत्यो न चेद्युवत्यो हृदयं हरेयुः ॥ ११ ॥
सा मदागमनकांक्षितोषा जागरेण गमितारिवलदोषा ।
बोधिताऽपि बुबुधे मधुपैर्न प्रातराननजसौरभलुब्धैः ॥ १२ ॥
अविचिन्त्यशक्तिविभवेन सुन्दरि प्रथितस्य शम्बररिपोः प्रभावतः ।
विधुभावमञ्चतितमां तवाननं नयने रुरोजदलनिर्विशेषताम् ॥ १३ ॥
मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती ।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी ॥ १४ ॥
पान्थ मन्दमते किं वा सन्तापमनुविन्दसि ।
पयोधरं समाशास्व येन शान्तिमवाप्नुयाः ॥ १५ ॥
संपश्यतां तामतिमात्रतन्वीं शोभाभिराभासितसर्वलोकाम् ।
सौदामिनी वा सितयामिनी वेत्येवं जनानां हृदि संशयोऽभूत् ॥ १६ ॥
सपल्लवा किं नु विभाति वल्लरी सफुल्लपद्मा किमियं नु पद्मिनी ।
समुल्लसत्पाणिपदां स्मितानना मितेक्षमाणैः समलम्भि संशयः ॥ १७ ॥
नेत्राभिरामं रामाया वदनं वीक्ष्य तत्क्षणम् ।
सरोजं चन्द्रबिम्बं वेत्यखिलाः समशेरत ॥ १८ ॥
कनकद्रवकान्तिकान्तया मिलितं राममुदीक्ष्य कान्तया ।
चपलायुतवारिदभ्रमान्नृतुः चातकपीतकैर्वने ॥ १९ ॥
वनितेति वदन्त्येतां लोकाः सर्वे वदन्तु ते ।
यूनां परिणता सेयं तपस्येति मतं मम ॥ २० ॥
स्मयमानाननां तत्र तां विलोक्य विलासिनीम् ।
चकोराश्चञ्चरीकाश्च मुदं परतरां ययुः ॥ २१ ॥
वदनकमलेन बाले स्मितसुषमालेशमादधासि यदा ।
जगदिह तदैव जाने दशार्धबाणेन विजितमिति ॥ २२ ॥
कलिन्दजानीरभरेऽर्धमग्ना बकाः प्रकामं कृतमूरिशब्दाः ।
ध्वान्तेन वैराद्विनिगीर्यमाणाः क्रोशन्ति मन्ये शशिनः किशोराः२३
परस्परासङ्गसुखान्नतभ्रुवः पयोधरौ पीनतरौ बभूवतुः ।
तयोरमृष्यन्नयमुन्नतिं परामवैमि मध्यस्तनिमानमेति ॥ २४ ॥
जनमोहकरं तवालि मन्ये चिकुराकारमिदं घनान्धकारम् ।
वदनेन्दुरुचामिहाप्रचारादिव तन्वङ्गि नितान्तकान्तिकान्तम् ॥ २५ ॥
दिवानिशं वारिणि कण्ठदघ्ने दिवाकराराधनमाचरन्ती ।
वक्षोजतापै किमु पक्ष्मलाक्ष्यास्तपश्चरन्त्यब्जपतिप्रिया ॥ २६ ॥

[illegible] वियोगिनि ।
[illegible] ॥ २७ ॥
[illegible] निर्मितवती
[illegible]चेतम् ।
[illegible] कृती
[illegible] ॥ २८ ॥
[illegible]गतम् ।
[illegible] ॥ २९ ॥
[illegible]
[illegible]नयनायाः ॥ ३० ॥
[illegible]कोरकाः ।
[illegible] कलया तुलयामहे ॥३१॥
[illegible] प्रियायाः ।
[illegible] मानः ॥ ३२ ॥
[illegible]रेखः ।
[illegible] सुधाकरः ॥ ३३ ॥
[illegible]वृतम् ।
[illegible] ॥ ३४ ॥
[illegible]म्बुजा ।
[illegible] ॥ ३५ ॥
[illegible]यानाम् ।
[illegible] प्रतीतिः ॥ ३६ ॥
[illegible]नाम् ।
[illegible] ॥ ३७ ॥
[illegible]
[illegible]
[illegible]
[illegible] ॥ ३८ ॥
[illegible]
[illegible] तिमिरैः ।
[illegible]

कुतो हेतोः श्वेतो विधुरयमुदेति प्रतिदिनम् ॥ ३९ ॥
विनैव शस्त्रं हृदयानि यूनां विवेकभाजामपि दारयन्त्यः ।
अनल्पमायामयवल्गुलीला जयन्ति नीलाब्जदलायताक्ष्यः ॥४०॥
यदवधि विलासभवनं यौवनमुदियाय चन्द्रवदनायाः ।
दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते ॥ ४१ ॥
न मिश्रयति लोचने सहसितं न संभाषते
कथासु तव किं च सा विरचयत्यरालां भ्रुवम् ।
विपक्षसुदृशः कथामिति निवेदयन्त्या पुरः
प्रियस्य शिथिलीकृतः स्वविषयेऽनुरागग्रहः ॥ ४२ ॥
वडवानलकालकूटवन् मकरव्यालगणैः सहैधितः ।
रजनीरमणो भवेन्नृणां न कथं प्राणवियोगकारणम् ॥ ४३ ॥
लभ्येत पुण्यैर्गृहिणो मनोज्ञा तया सुपुत्राः परितः पवित्राः ।
स्फीतं यशस्तैः समुदेति नित्यं तेनास्य नित्यः खलु नाकलोकः ४४
प्रभुरपि याचितुकामो भजते वामोरु लाघवं सहसा ।
यदहं त्वयाऽधार्थी सपदि विमुख्या निराशतां नीतः ॥ ४५ ॥
जलकुम्भमुम्भितरसं सपदि सरस्याः समानयन्त्यास्ते ।
तटकुञ्जगूढसुरतं भगधानेको मनोभवो वेद ॥ ४६ ॥
त्वमिव पथिकः प्रियो मे विटपिस्तोमेषु गमयति क्लेशान् ।
किमितोऽन्यत् कुशलं मे सम्प्रति यत्पान्थ जीवामि ॥ ४७ ॥
तुलामनालोक्य निजामखर्वं गौराङ्गि गर्वं न कदापि कुर्याः ।
लसन्ति नामाफलभारवत्यो लताः कियत्यो गहनान्तरेषु ॥ ४८ ॥
इयमुल्लसिता मुखस्य शोभा परिफुल्लं नयनाम्बुजद्वयं ते ।
जलपालिमयं जगद्वितन्वन् कलितः कापि किमालि नीलमेघः॥४९॥
आसायं सलिलान्तः सवितारमुपास्य सादरं तपसा ।
अधुनाऽजनि मनाक् तव मानिनि तुलना मुखस्याऽऽपि ॥ ५० ॥
अयि मन्दस्मितमधुरं वदनं तन्वङ्गि यदि मनाक् कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हन्त साम्राज्यम् ॥ ५१ ॥
मधुरतरं स्मयमानः स्वस्मिन्नेवालपञ्च्छलैः किमपि ।
कोकनदयंस्त्रिलोकीमालम्बनशून्यमीक्षते क्षीबः ॥ ५२ ॥
मधुरसान्मधुरं हि तवाधरं तरुणि मद्वदने विनिवेशय ।
मम गृहाण करेण करम्बुजं पपपतामि ह हा भ भ भूतले ॥ ५३ ॥
शतेनीपायानां कथमपि गतः सौधशिखरं

[illegible]
[illegible]
[illegible]
[illegible] ॥ ७६ ॥

[illegible] । चञ्चला चपला अपी-
[illegible] सा नायका स्वयं सुषमा परमा शोभा
[illegible] कथं कृष्णसर्पेण्या भवति । वत कष्टम् ।
[illegible] सर्पः फणिशावैः सर्पपोतकैः तुल्यं शीलं
[illegible] सन्निव व्यत्यचामासीलङ्कारः। नयनान्ताः
[illegible] सरः तद्वदेवाचरणात्मिकेत्यर्थः ॥ ७६ ॥

[illegible]
[illegible]
[illegible]

वचने तव यत्र माधुरी सा
हृदि पूर्णा करुणा च कोमलेभूत् ॥
अधुना हरिणाक्षि हा कथं वा
गतिरन्यैव विलोक्यते गुणानाम् ॥ ७७ ॥
अनिशं नयनाभिरामया
रमया संमदिनो मुखस्य ते ॥
निशिनिःसरदिन्दिरं कथं त-
त्तुलयामः कलयापि पङ्कजम् ॥ ७८ ॥
अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं हरति ॥
विकलयति कुसुमबाणो बाणालीभिर्मम प्राणान् १९
खिद्यति सा पथि यान्ती कोमलचरणा नितम्बभारेण ॥
खिद्यामि हन्त परितस्तद्रूपविलोकनेन विकलोहम् ॥८०॥

वचन इति । गुणानां वचनादीनां अन्यैव विरुद्धेव विलोक्यते कथं वा नेत्यर्थः । तादृश्येव सुखदा तव सङ्गतिः । अत्र विरहाभावो नायकः ॥ ७७ ॥

अनिशामिति । अनिशं सदैव नयनयोरभिरामया शीतलकारिण्या मया शोभयासंमदिनो मत्तस्य ते मुखस्य कलयापि षोडशीसंख्ययापि निशि रात्रौ निःसरन्तीन्दिरा यस्मात्तस्मात् पङ्कजं पद्मं वयं कथं तुलयामः नैवेत्यर्थः । कथमस्य पर्यायो निषेधः ॥ ७८ ॥

अङ्गैरिति । सुगमम् ॥ ७९ ॥

खिद्यतीति । सुकुमारचरणा नायका नायकस्त्वधीरः । सुगमम् ॥ ८० ॥

---

१. वदने इति पाठान्तरम् ।

मधुरागमनोन्मुखे सुसारा
वसुभारार्तिभृतां व्रजाङ्गनानाम् ॥
प्रलयज्वलनायते स्म राका
भवनाकाशमजायताम्बुराशिः ॥ ८१ ॥

केलीमन्दिरमागतस्य शनकैरालीरपास्येङ्गितैः
सुप्तायाः सरुषः सरोरुहदृशः संवीजनं कुर्वतः ॥
जानन्त्याप्यनभिज्ञयेव कपटव्यामीलिताक्ष्णोरिव
श्रान्तोसीत्यभिधाय वक्षसि तया पाणिर्ममासिञ्चितः ८२

मान्धर्यमाप गमनं सह शैशवेन
रक्तं सहैव मनसाधरबिम्बमासीत् ॥

मधुरेति । मधुरागमने मन्दगतौ उन्मुखः तस्मिन् जने सुसारा सुतत्वा वसुभारेणाभरणभरेणार्तिभृतां व्यथावतीनाम् व्रजाङ्गनानां गोपीनां प्रलयज्वलनस्य सूर्यस्याग्नेर्वा तस्य तेजसः । राका पूर्णे निशाकरे सा राधिका शीतलकारिणी कालाग्निशमनीत्यर्थः । तस्मात् यत्रेदृशी नायका तद्भवनाकाशं गृहान्तरं सावकाशवसनमित्यर्थः । अम्बुराशिः समुद्रोऽजायत ॥ ८१ ॥

केलीति । केलीमन्दिरमागतस्य सुरतगेहं प्राप्तस्य शनकैः इङ्गितैः रहस्यैरालीः सख्योऽपास्य त्यक्त्वा सुप्तायाः सरुषः सरोरुहदृशः कामिन्याः रुषितायाः सकाशे संवीजनम् कुर्वतो मम भृत्यवन्नियुक्तस्य कामार्तस्य वक्षसि हृदि श्रान्तोसीत्यभिधाय कथयित्वा कुपितयापि तया पाणिरासिञ्चितः । कीदृश्या तया कपटव्यामीलिताक्ष्णोरिव नेत्रयोः । तृतीयार्थे षष्ठी ज्ञेया । ताभ्यां कृत्वोपलक्षितया जानत्यापि पतिं समीपे व्यजनहस्तं वीजयन्तम् । अनभिज्ञया न बुधया यतोसौ चीरमर्दिता ॥ ८२ ॥

१—० स्येङ्गिते इ० पा० । २—० व्यामीलिताक्ष्या साक्षि इ० पाठान्तरम् ।

किं वा भवान्मृगकिशोरदृशोर्नितम्बः
सर्वाधिको गुरुरयं सहसा स्मरेण ॥ ८३ ॥
श्वासोऽनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टिः ॥
तस्याः सुरतकथेयं तिष्ठतु तावत् कथान्तरं कथय ८४
पाणौ कृतः पाणिरिलासुतायाः
सस्वेदकम्पो रघुनन्दनेन ॥
हिमाम्बुगङ्गानिलसंयुतस्य
प्रभात पद्मस्य बभार शोभाम् ॥ ८५ ॥
अरुणमपि विद्रुमद्रुममृदुलतरं स्वापि किसलयं बाले ॥
अधरीकरोति नितरां तवाधरो मधुरिमातिशयात् ॥ ८६ ॥

मान्थर्यामिति । गमनं शैशवेन सह आबाल्येन साकं मृगकिशोरदृशो नायकाया मान्थर्यमाप मन्थरत्वमागात् । मन्थरात्र नायका हस्तिनीभेदः। अधरबिम्बं मनसा सहैव रक्तमासीत् किंच नितम्बः स्मरेण सहसाकं सर्वाधिको गुरुः स्थूलो ऽभवत् ८३॥

श्वासइति । श्वासः प्राणोदानरूपः अपानगतोयमित्यनुमानेन बेद्यः अनेन रतान्तसमयोदर्शितः। शीतान्यङ्गानि निर्गतशुक्रत्वात् निश्चला दृष्टिः भोगान्तत्वात् । शेषं सुगमम् ॥ ८४ ॥

पाणाविति । रघुनन्दनेन यथा पाणौ कृतः हस्ते गृहीतः अतः सखेदो कम्पो यस्य स तथा भूता इलासुतायाः जानक्याः पाणिः हिमाम्बुगङ्गानिलः शीतजलवात् गङ्गाया तद्युक्तो वातस्तेन युतस्य प्रभातपद्मस्य सखेदकम्पस्य शोभां बभार ॥ ८५ ॥

अरुणमिति । हेबाले चोषिताधरो तवाधरो मधुरिमायाः मधुरतामायाति अतिशयात् अरुणमपि आरक्तमपि विद्रुमस्य द्रुमः मुमगा इतिलोके । शस्तः । स इव मृदुलतरं कोमलमुरूयं चापि किसलयं पत्रं अधरीकरोति नैरुपम्यात् नीचैः करोति ॥ ८६॥

नयने वहनानुखं जनाना-
मिह नानाविध मङ्गभङ्गिभाग्यम् ॥
मुखमेतु कथं तुलां सुशोभं
सुदृशो भङ्गुरसम्पदोम्बुजस्य ॥ ८७ ॥

सुदृशोज्झितरत्नमालया सुरतान्तश्रमबिन्दुमालया ॥
अलकेन च हेमकान्तिना विदधे कापि रुचिः परस्परम् ८८

परपूरुषदृष्टिपातवज्रा-
हतिभीता हृदयं प्रियस्य सीता ॥
अविशत् परकामिनी भुजङ्गी
भयतः सत्वर मेव सोपि तस्याः ॥ ८९ ॥

नयनेति। नु वितर्के सुदृशः नयने खञ्जनानां नानाविधं अङ्गस्य भङ्गिः कला नृत्यादिकातस्य भाग्यं कथं वहतां नैव शब्दस्य पर्यायः कथमित्यत्रोभये सम्बध्यते। सुशोभं शोभनारात्रिसमं कला यत्रेति तन्मुखं भङ्गरादिवा स्थापनी संपत् प्रफुल्लतारूपा श्रीर्यस्मिन् तस्याम्बुजस्य तुलां कथं एतु कविभिः कथ्यते तथापि नैवोपमेत्यर्थः ॥ ८७ ॥

सुदृशेति। उज्झिता उत्तारिता रत्नानां माला यया सा तथा तया सुरतोत्थितयेत्यर्थः। सुरतान्तस्य श्रमः तस्य बिन्दूनां स्वेदानां माला यस्याः सा। तया च पुनः हेमकान्तिना अलकेन कुण्डलालंकृतेनालकेन कापि परस्परं रुचिः विदधे किं तु तस्या-लङ्कारपरा पुनरासक्तेत्यर्थः। विश्वसिता पूर्वानुभूता नायका ॥ ८८ ॥

परेति। परपुरुषो रावणः तस्य दृष्टिपात एव वज्राहतिस्ताडना तेन भीता प्रियस्य हृदयं अविशत् प्रविष्टाभूत्। सोपि सत्वरं

---

१ नयनानि वहन्तु इति पाठः। २ सदृशं कथमाननं सुशोभत्।

जम्बीरश्रियमतिलङ्घ्य लीलयैव
व्यानम्रीकृतकमनीयहेमकुम्भौ ॥
नीलाम्भोरुहनयनेधुना कुचौ ते
स्पर्द्धेते किल कनकाचलेन सार्द्धम् ॥ ९० ॥
अङ्गानि दत्वा हेमाङ्गि प्राणान् क्रीणासि चेन्नृणाम् ॥
उक्तमेतं न तु पुनः कोणं नयनपद्मयोः ॥ ९१ ॥
जितरत्नरुचां सद रदानां
सह वासेन परां मुदं दधानाम् ॥
अधरीकुरुते न साधुनासा

तस्याः जानक्याः हृदयं प्रविष्टःपरकामिन्येव भुनङ्क्ती तस्याः भवतः हेतोः ॥ ८९ ॥

जम्बीरेति । जम्बीरश्रियं लीलयैव क्रीडयैव अतिलङ्घ्य बाल्यमावृत्य पुनः व्यानम्रीकृतौ कमनीयौ हेम्नः स्वर्णस्य घटौ याभ्यां तौ ते कुचौ स्तनौ हे नीलाम्भोरुहनयने कनकाचलेन सार्धं स्पर्द्धेते स्वर्णगिरिसमौ जातौ युवतीत्वात्स्थूलावित्यर्थः ९०

अङ्गानीति । हे हेमाङ्गि गौरदेहे अङ्गानि अवयवानि दत्त्वा समर्थप्राणान् क्रीणासि तर्हि एतदुक्तं वाक्यं तु पुनः नयनपद्मयोः कोणं न नेत्रयातस्तु रतोत्सुकत्वादेव भवतीति ज्ञेयम् ॥ ९१ ॥

जितेति । जिता रत्नानां वज्रहीराणां रुचो यैस्तेषां रदानां दन्तानां वासेनाधरेण सह परां मुदं दधाना सति सा नायका ते अधरेसौ अधुना साहसाच्छालते शोभते तन्मौक्तिकं मधुना मद्येन न अधरीकुरुते साध्वी नासा यस्याः सा नशब्दात् ओष्ठी कुरुते ॥ ९२ ॥

---

१ नायंश्लोक एकस्मिन्नेव पुस्तके । २ जितमौक्तिकसंपदां रदाना मित्यपि पाठः । ३ विरसादधरी करोति नासाम्, विशदादधरी करोति नासामिति पाठद्वयमपि ।

उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण ॥
मुदितं च सकललनाचूडामणिशंसनेन मदनेन ६९

आलोक्य सुन्दरि मुखं तव मन्दहासं
नन्दन्त्यमन्दमरविन्दधिया मिलिन्दाः ॥
किं वासिताक्षि मृगलाञ्छनसंभ्रमेण
चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥ ७० ॥

स्मितं नैतत् किंतु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते को वा कुसुममिदमुच्चत् परिमलम् ॥
स्तनद्वन्द्वं मिथ्याकनकनिभमेतत्फलयुगं
लतारम्या सेयं भमरकुलरम्या[1] न रमणी ॥ ७१ ॥

सङ्ग्रामाङ्गणसन्मुखाहतकियद्विश्वम्भराधीश्वर-
व्यादीर्णीकृतमध्यभागविवरोन्मीलन्नभोनीलिमा ॥
अङ्गारप्रखरैः करैः कवलयन्नेतन्महीमण्डलं
मार्तण्डोयमुदेति केन पशुना लोके शशाङ्कीकृतः ७२

उदितमिति । मुदितं सुरतं उदितं सर्वत्र संबध्यते ॥६९॥

आलोक्येति । अमन्दं बहु यथा स्यात्तथाऽरविन्दधिया पद्मशङ्कया नन्दन्ति आनन्दिताः सन्ति । किं वाथो वा मृगलाञ्छनस्य संभ्रमेण कौतुकेन चन्द्राशङ्कया चटुलयन्ति विवृतास्याः भवन्ति हेसिताक्षि कज्जलाञ्चितनेत्रे । शेषं सुगमम् ॥ ७० ॥

स्मितमिति । सुगमम् ॥ ७१ ॥

समिति । अयं मार्त्तण्डः सूर्यः अङ्गारप्रखरैः महासन्तप्तैः करैः एतन्महीमण्डलं कवलयन् संग्रसन् निरसयन्नित्यर्थः । उदेति स केन पशुना शशाङ्कीकृतः । पशबन्धने इत्यस्मात् पश्यतीति वि-

---

१ भ्रमरकुलनम्या इति वा पाठः ।

श्यामं शितं च सुदृशो न दृशोः स्वरूपं
किंतु स्फुटं च गरमेतदथामृतं वा ॥
नोचेत्कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः ॥ ७३ ॥
अलिर्मृगो वा नेत्रं वा यत्रकिञ्चिद्विभासते ॥
अरविन्दं मृगाङ्को वा मुखं चेदं मृगीदृशः ॥ ७४ ॥
दयिते रदनत्विषां मिषात्
अयि तेऽमी विलसन्ति केसराः ॥

ग्रहः केन पशुना जालेन निबद्धेनेत्यर्थः । मेघपर्यायः । तेन मेघेनासौ शशाङ्कीकृतः चन्द्रवच्छीतलः कृतः । अन्तर्लापकः श्लोकोयम् । कीदृशो मार्तण्डः संग्रामाङ्गणे सन्मुखाः युद्धानुयायिनो ये दैत्यास्तैराहतो यो विश्वम्भराधीश्वरस्तेन तेजोरूपेण व्यादीर्णीकृतं विदीर्णीभूतं यन्मध्यं तस्य भागे वितरः बिलं तस्मात् उन्मीलत् दृश्यत् नभोनीलिमा यस्य स तथा दैत्ययुधाहतविदीर्णहृदयत्वात् । सूर्यमध्ये कृष्णत्वं दृश्यते स एव कालसंज्ञः पुमानित्यर्थः ॥ ७२ ॥

श्यामामिति । सुगमम् ॥ ७३ ॥

अलिरिति । सुगमम् ॥ ७४ ॥

---

१ चतुः सप्तमितमाग्रे प्रक्षिप्ता इमे—

सुविरलमौक्तिकतारे धवलांशुकचन्द्रिकाचमत्कारे ।
वदन परिपूर्णचन्द्रे सुन्दरि राकासि नात्र सन्देहः ॥
रूपजलाचलनयना नाभ्यावर्ता कुचावलिभुजङ्गा ।
मज्जन्ति यत्र सन्तः सेयं तरुणी तरङ्गिणी विषमा ॥
शोणाधरांशुसंभिन्नास्तन्वि ते वदनाम्बुजे ।
केसरा इव काशन्ते कान्त दन्तालिकान्तयः ॥

अपि चालकवेषधारिणी
मकरन्दस्पृहयालिचोलयः ॥ ७५ ॥

दयित इति । अयि दयिते हे प्रिये ते तव रदनत्विषां दन्तकान्तीनां कैतवात् अमी दन्ताः केसरा विलसन्ति । अपि च पुनः अलकानां वेषस्य धारिणी नायका तस्याः मकरन्दस्पृहया अलिचोलयः भ्रमरपङ्क्तयः विलसन्ति इत्यर्थोऽपि योज्यम् ॥७५॥

---

१ पञ्चसप्ततिमाग्रे इमे प्रक्षिप्ताः—

तया तिलोत्तमीयन्त्या मृगशावकचक्षुषा ।
ममाऽयं मानुषो लोको नाकलोक इवाभवत् ॥ १ ॥
अङ्क्यायमानमलिके मृगनाभिपङ्कं
पङ्केरुहाक्षि वदनं तव वीक्ष्य बिभ्रत् ।
उल्लासपल्लवितकोमलपक्षमूला-
श्चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥ २ ॥
शिशिरेण यथा सरोरुहं दिवसेनामृतरश्मिमण्डलम् ।
न मनागपि तन्वि शोभते तव रोषेण तथेदमाननम् ॥ ३ ॥
चलदृक्कमिवाम्भोजमधीरनयनं मुखम् ।
तदीयं यदि दृश्येत कामः क्षुब्धोऽस्तु किं ततः ॥ ४ ॥
शतकोटिकठिनचित्तः सोऽहं तस्याः सुधैकमयमूर्तेः ।
येनाकारिषि मित्रं स विकल्पहृदयो विधिर्वाच्यः ॥ ५ ॥
श्यामलेनाङ्कितं बाले भाले केनापि लक्ष्मणा ।
मुखं तवान्तरासुप्तभृङ्गफुल्लाम्बुजायते ॥ ६ ॥
अद्वितीयं रुचात्मानं मत्वा किं चन्द्र हृष्यसि ।
भूमण्डलमिदं मूढ केन वा विनिभालितम् ॥ ७ ॥
नीलाञ्चलेन संवृतमाननमाभाति हरिणनयनायाः ।
प्रतिबिम्बित इव यमुनागभीरनीरान्तरिणाङ्कः ॥ ८ ॥
स्तनाभोगे पतन् भाति कपोलात्कुटिलोऽलकः ।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः ॥ ९ ॥
यथा लतायाः स्तबकानतायाः स्तनावनम्रे नितरां समाऽसि ।
तथा लता पल्लविनी सगर्वं शीर्णाश्रयायाः सरणी तवाऽपि ॥ १० ॥
इदं लताभिः स्तबकानताभिर्मनोहरं हन्त वनान्तरालम् ।

सदैव सेव्यं स्तनभारवत्यो न चेद्युवत्यो हृदयं हरेयुः ॥ ११ ॥
सा मदागमनबृंहिततोषा जागरेण गमितारिवलदोषा ।
बोधिताऽपि बुबुधे मधुपैर्न प्राततानजसौरभलुब्धैः ॥ १२ ॥
अविचिन्त्यशक्तिविभवेन सुन्दरि प्रथितस्य शम्बररिपोः प्रभावतः ।
विधुभावमञ्चतितमां तवाननं नयने रुरोजदलनिर्विशेषताम् ॥ १३ ॥
मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती ।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी ॥ १४ ॥
पान्थ मन्दमते किं वा सन्तापमनुविन्दसि ।
पयोधरं समाशास्व येन शान्तिमवाप्नुयाः ॥ १५ ॥
संपश्यतां तामतिमात्रतन्वीं शोभाभिराभासितसर्वलोकाम् ।
सौदामिनी वा सितयामिनी वेत्येवं जनानां हृदि संशयोऽभूत् ॥ १६ ॥
सपल्लवा किं नु विभाति वल्लरी सफुल्लपद्मा किमियं नु पद्मिनी ।
समुल्लसत्पाणिपदां स्मिताननामितीक्षमाणैः समलम्भि संशयः ॥ १७ ॥
नेत्राभिरामं रामाया वदनं वीक्ष्य तत्क्षणम् ।
सरोजं चन्द्रबिम्बं वेत्यखिलाः समशेरत ॥ १८ ॥
कनकद्रवकान्तिकान्तया मिलितं राममुदीक्ष्य कान्तया ।
चपलायुतवारिदभ्रमान्नृतुः चातकपीतकैर्वने ॥ १९ ॥
वनितेति वदन्त्येतां लोकाः सर्वे वदन्तु ते ।
यूनां परिणता सेयं तपस्येति मतं मम ॥ २० ॥
स्मयमाननानां तत्र तां विलोक्य विलासिनीम् ।
चकोराश्चञ्चरीकाश्च मुदं परतरां ययुः ॥ २१ ॥
वदनकमलेन बाले स्मितसुषमालेशमादधासि यदा ।
जगदिह तदैव जाने दशार्धबाणेन विजितमिति ॥ २२ ॥
कलिन्दजानीरभरेऽर्धमग्ना बकाः प्रकामं कृतभूरिशब्दाः ।
ध्वा तेन वैराद्विनिगीर्यमाणाः क्रोशन्ति मन्ये शशिनः किशोराः २३
परस्परासङ्गसुखान्नतभ्रुवः पयोधरौ पीनतरौ बभूवतुः ।
तयोरमृष्यन्नयमुन्नतिं परामवैमि मध्यस्तनिमानमेति ॥ २४ ॥
जनमोहकरं तवालि मन्ये चिकुराकारमिदं घनान्धकारम् ।
वदनेन्दुरुचामिहाप्रचारादिव तन्वङ्गि नितान्तकान्तिकान्तम् ॥ २५ ॥
दिवानिशं वारिणि कण्ठदघ्ने दिवाकराराधनमाचरन्ती ।
वक्षोजतापै किमु पद्मलाक्ष्यास्तापश्चरन्त्यब्जपरिक्षयेण ॥ २६ ॥

वियोगवह्निकुण्डेऽस्मिन् हृदये ते वियोगिनि ।
प्रियसंगसुखायेव मुक्ताहारस्तपस्यति ॥ २७ ॥
निधिं लावण्यानां तव खलु मुखं निर्मितवती
महामोहं मन्ये सरसिरुहसूनोरुपचितम् ।
त्वदपेक्ष्य त्वां यस्माद्विधुमयमकस्मादिह कृती
कलाहीनं दीनं विकल इव राजानमकरोत् ॥ २८ ॥
स्तनान्तर्गतमाणिक्यदीपुर्बहिरुपागतम् ।
मनोऽनुरागि ते तन्वि मन्ये वक्षमीक्षितुम् ॥ २९ ॥
जगदन्तरममृतमयैरंशुभिरापूरयन्नितराम् ।
उदयति वदनव्याजाद् किमु राजा हरिणशावनयनायाः ॥ ३० ॥
तिमिरशारदचन्दिरचन्द्रिकाः कमलविद्रुमचम्पककोरकाः ।
यदि मिलन्ति कदापि तदाननं खलु तदा कलया तुलयामहे ॥३१॥
प्रिये विषादं जहिहीति वाचं प्रिये सरागं वदति प्रियायाः ।
वाराामुदारा विजगाल धारा विलोचनाभ्यां मनसश्च मानः ॥ ३२ ॥
राज्याभिषेकमाज्ञाय शम्बरासुरवैरिणः ।
सुधाभिर्जगतीमध्यं लिम्पतीव सुधाकरः ॥ ३३ ॥
आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतम् ।
भ्रमद्भ्रमरसंभारं स्मरामि सरसिरुहम् ॥ ३४ ॥
यान्ती गुरुजनैः साकं स्मयमाननानम्बुजा ।
तिर्यग्ग्रीवं यदद्राक्षीत् तन्निष्पन्नाकरोज्जगत् ॥ ३५ ॥
मृणालमन्दानिलचन्दनानामुशीरशैवालकुशेशयानाम् ।
वियोगदूरीकृतचेतनानां विनैव शैत्यं भवति प्रतीतिः ॥ ३६ ॥
विबोधयन् करस्पर्शैः पद्मिनीं मुद्रिताननाम् ।
परिपूर्णोऽनुरागेण प्रातर्जयति भास्करः ॥ ३७ ॥
आनम्य वल्गुवचनैर्विनिवारितेऽपि
रोषात् प्रयातुमुदिते मयि दूरदेशम् ।
बाला कराङ्गुलिनिदेशवशंवदेन
क्रीडाबिडालशिशुनाऽऽशु रुरोध मार्गम् ॥ ३८ ॥
अभूदप्रत्यूहः कुसुमशरकोदण्डमहिमा
विलीनो लोकानां सह नयनतापोऽपि तिमिरैः ।
तवाऽस्मिन् पीयूषं किरति परितस्तन्वि वदने

कुतो हेतोः श्वेतो विधुरयमुदेति प्रतिदिनम् ॥ ३९ ॥
विनैव शस्त्रं हृदयानि यूनां विवेकभाजामपि दारयन्त्यः ।
अनल्पमायामयवल्गुलीला जयन्ति नीलाब्जदलायताक्ष्यः ॥४०॥
यदवधि विलासभवनं यौवनमुदियाय चन्द्रवदनायाः ।
दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते ॥ ४१ ॥
न मिश्रयति लोचने सहसितं न संभाषते
कथासु तव किं च सा विरचयत्यरालां भ्रुवम् ।
विपक्षसुहृशः कथामिति निवेदयन्त्या पुरः
प्रियस्य शिथिलीकृतः स्वविषयेऽनुरागग्रहः ॥ ४२ ॥
वडवानलकालकूटवन् मकरव्यालगणैः सहैधितः ।
रजनीरमणो भवेन्नृणां न कथं प्राणवियोगकारणम् ॥ ४३ ॥
लभ्येत पुण्यैर्गृहिणो मनोज्ञा तया सुपुत्राः परितः पवित्राः ।
स्फीतं यशस्तैः समुदेति नित्यं तेनास्य नित्यः खलु नाकलोकः ४४
प्रभुरपि याचितुकामो भजते वामोरु लाघवं सहसा ।
यदहं त्वयाऽधरार्थी सपदि विमुख्या निराशतां नीतः ॥ ४५ ॥
जलकुम्भमुम्भितरसं सपदि सरस्याः समानयन्त्यास्ते ।
तटकुञ्जगूढसुरतं भगवानेको मनीभवो वेद ॥ ४६ ॥
त्वमिव पथिकः प्रियो मे विटपिस्तोमेषु गमयति क्लेशान् ।
किमितोऽन्यत् कुशलं मे सम्प्रति यत्पान्थ जीवामि ॥ ४७ ॥
तुलामनालोक्य निजामखर्वं गौराङ्गि गर्वं न कदापि कुर्याः ।
लसन्ति नानाफलभारवत्यो लताः कियत्यो गहनान्तरेषु ॥ ४८ ॥
इयमुल्लसिता मुखस्य शोभा परिफुल्लं नयनाम्बुजद्वयं ते ।
जलपालिमयं जगद्वितन्वन् कलितः कापि किमालि नीलमेघः॥४९॥
आसाद्य सलिलान्तः सवितारमुपास्य सादरं तपसा ।
अधुनाब्जेन मनाक् तव मानिनि तुलना मुखस्याऽऽपि ॥ ५० ॥
अयि मन्दस्मितमधुरं वदनं तन्वङ्गि यदि मनाक् कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हन्त साम्राज्यम् ॥ ५१ ॥
मधुरतरं स्मयमानः स्वस्मिन्नेवालपञ्छलैः किमपि ।
कोकनदयंस्त्रिलोकीमालम्बनशून्यमीक्षते क्षीबः ॥ ५२ ॥
मधुरसान्मधुरं हि तवाधरं तरुणि मद्वचने विनिवेशय ।
मम गृहाण करेण कराम्बुजं पप पतामि ह हा म म भूतले ॥५३ ॥
शतेनोपायानां कथमपि मतः सौधशिखरं

अलकाः फणिशावतुल्यशीला
नयनान्ताः परिपुङ्खितेषु लीलाः ॥
चपलोपमिता खलु स्वयं या
बत लोके सुषमाधनं कथं सा ॥ ७६ ॥

अलका इति । या चपलोपमिता । चञ्चला चपला अपीत्यमरः । विद्युत्समास्ति सा नायका स्वयं सुषमा परमा शोभा तस्या धनं कथमस्ति कथं शृङ्गारयोग्या भवति । बत कष्टम् । अलकाश्चूर्णकुन्तला यस्याः फणिशावैः सर्पपोतकैः तुल्यं शीलं येषां ते तथा तादृशाः सन्ति व्यत्ययाभासोलङ्कारः । नयनान्ताः परिपुङ्खितेषुः पक्षी शरः तद्वल्लीलामारणाग्निकेत्यर्थः ॥ ७६ ॥

सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने ।
विबोध्य क्षामांगीं चकितनयनां स्मेरवदनां
सनिःश्वासं श्लिष्यत्यहह सुकृती राजरमणीम् ॥ ५४ ॥
गुञ्जन्ति मञ्जु परितो गत्वा धावन्ति संमुखम् ।
आवर्तन्ते विवर्तन्ते सरसीषु मधुव्रताः ॥ ५५ ॥
यथा यथा तामरसेक्षणा मया पुनः सरागं नितरां निषेविता ।
तथा तथा तत्त्वकथैव सर्वतो विकृष्य मामेकरसं चकार सा ॥ ५६ ॥
हरिणीप्रेक्षणा यत्र गृहिणी न विलोक्यते ।
सेवितं सर्वसंपद्भिरपि तद्भवनं वनम् ॥ ५७ ॥
लोलालकावलिचलन्नयनारविन्दलीलावशंवदितलोकविलोचनायाः ।
सायाह्नि प्रणयिनो भवनं व्रजन्त्याश्चेतो न कस्य हरते गतिरङ्गनायाः ॥ ५८ ॥
दन्तांशुकान्तमरविन्दरमापहारि सान्द्रामृतं वदनमेणविलोचनायाः ।
वेधा विधाय पुनरक्तमिवेन्दुबिम्बं दूरीकरोति न कथं विदुषां वरेण्यः ॥ ५९ ॥
सानुकम्पाः सानुरागाश्चतुराः शीलशीतलाः ।
हरन्ति हृदयं हन्त कान्तायाः स्वान्तकृतयः ॥ ६० ॥

१ सुखसाधनं कथं सा इति पाठान्तरम् ।

वचने तव यत्र माधुरी सा
हृदि पूर्णा करुणा च कोमलेभूत् ॥
अधुना हरिणाक्षि हा कथं वा
गतिरन्यैव विलोक्यते गुणानाम् ॥ ७७ ॥
अनिशं नयनाभिरामया
रमया संमदिनो मुखस्य ते ॥
निशिनिःसरदिन्दिरं कथं त-
त्तुलयामः कलयापि पङ्कजम् ॥ ७८ ॥
अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं हरति ॥
विकलयति कुसुमबाणो बाणालीभिर्मम प्राणान् १९
खिद्यति सा पथि यान्ती कोमलचरणा नितम्बभारेण ॥
खिद्यामि हन्त परितस्तद्रूपविलोकनेन विकलोहम् ॥८०॥

वचन इति । गुणानां वचनादीनां अन्यैव विरुद्धेव विलोक्यते कथं वा नेत्यर्थः । तादृश्येव सुखदा तव सङ्गतिः । अत्र विरहाभावो नायकः ॥ ७७ ॥

अनिशामिति । अनिशं सदैव नयनयोरभिरामया शीतलकारिण्या मया शोभयासंमदिनो मत्तस्य ते मुखस्य कलयापि षोडशीसंख्ययापि निशि रात्रौ निःसरन्तीन्दिरा यस्मात्तस्मात् पङ्कजं पद्मं वयं कथं तुलयामः नैवेत्यर्थः । कथमस्य पर्यायो निषेधः ॥ ७८ ॥

अङ्गैरिति । सुगमम् ॥ ७९ ॥

खिद्यतीति । सुकुमारचरणा नायका नायकस्त्वधीरः । सुगमम् ॥ ८० ॥

---

१. वदने इति पाठान्तरम् ।

मधुरागमनोन्मुखे सुसारा
वसुभारार्तिभृतां व्रजाङ्गनानाम् ॥
प्रलयज्वलनायते स्म राका
भवनाकाशमजायताम्बुराशिः ॥ ८१ ॥

केलीमन्दिरमागतस्य शनकैरालीरपास्येङ्गितैः
सुप्तायाः सरुषः सरोरुहदृशः संवीजनं कुर्वतः ॥
जानन्त्याप्यनभिज्ञयैव कपटव्यामीलिताक्ष्णोरिव
श्रान्तोसीत्यभिधाय वक्षसि तया पाणिर्ममासिञ्चितः ८२

मान्यर्यमाप गमनं सह शैशवेन
रक्तं सहैव मनसाधरबिम्बमासीत् ॥

मधुरेति । मधुरागमने मन्दगतौ उन्मुखः तस्मिन् जने सुसारा सुतत्वा वसुभारेणाभरणभरेणार्त्तिभृतां व्यथावतीनाम् व्रजाङ्गनानां गोपीनां प्रलयज्वलनस्य सूर्यस्याग्नेर्वा तस्य तेजसः । राका पूर्णे निशाकरे सा राधिका शीतलकारिणी कालाग्निशमनीत्यर्थः । तस्मात् यत्रेदृशी नायका तद्भवनाकाशं गृहान्तरं सावकाशवसनमित्यर्थः । अम्बुराशिः समुद्रोऽजायत ॥ ८१ ॥

केलीति । केलीमन्दिरमागतस्य सुरतगेहं प्राप्तस्य शनकैः । इङ्गितैः रहस्यैराली: सख्योऽपास्य त्यक्त्वा सुप्तायाः सरुषःसरोरुहदृशः कामिन्याः रुषितायाः सकाशे संवीजनम् कुर्वतो मम भृत्यवन्नियुक्तस्य कामार्तस्य वक्षसि हृदि श्रान्तोसीत्यभिधाय कथयित्वा कुपितयापि तया पाणिरासिञ्चितः । कीदृश्या तया कपटव्यामीलिताक्ष्णोरिव नेत्रयोः । तृतीयार्थे षष्ठी ज्ञेया । ताभ्यां कृत्वोपलक्षितया जानत्यापि पतिं समीपे व्यजनहस्तं वीजयन्तम् । अनभिज्ञया न बुधया यतोसौ चीरमर्दिता ॥ ८२ ॥

१—० स्येङ्गिते इ० पा० । २—० व्यामीलिताक्ष्या साकि इ० पाठान्तरम् ।

किं वा भवान्मृगकिशोरदृशोर्नितम्बः
सर्वाधिको गुरुरयं सहसा स्मरेण ॥ ८३ ॥
श्वासोऽनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टिः ॥
तस्याः सुरतकथेयं तिष्ठतु तावत् कथान्तरं कथय ८४
पाणौ कृतः पाणिरिलासुतायाः
सस्वेदकम्पो रघुनन्दनेन ॥
हिमाम्बुगङ्गानिलसंयुतस्य
प्रभात पद्मस्य बभार शोभाम् ॥ ८५ ॥
अरुणमपि विद्रुमद्रुममृदुलतरं स्वापि किसलयं बाले ॥
अधरीकरोति नितरां तवाधरो मधुरिमातिशयात् ॥ ८६ ॥

मान्थर्यामिति । गमनं शैशवेन सह आबाल्येन साकं मृगकिशोरदृशो नायकाया मान्थर्यमाप मन्थरत्वमागात् । मन्थरात्र नायका हस्तिनीभेदः। अधरबिम्बं मनसा सहैव रक्तमासीत् किंच नितम्बः स्मरेण सहसाकं सर्वाधिको गुरुः स्थूलो ऽभवत् ८३॥

श्वासइति । श्वासः प्राणोदानरूपः अपानगतोयमित्यनुमानेन वेद्यः अनेन रतान्तसमयोदर्शितः। शीतान्यङ्गानि निर्गतशुक्रत्वात् निश्चला दृष्टिः भोगान्तत्वात् । शेषं सुगमम् ॥ ८४ ॥

पाणाविति । रघुनन्दनेन यथा पाणौ कृतः हस्ते गृहीतः अतः सखेदो कम्पो यस्य स तथा भूता इलासुतायाः जानक्याः पाणिः हिमाम्बुगङ्गानिलः शीतजलवात् गङ्गाया तद्युक्तो वातस्तेन युतस्य प्रभातपद्मस्प सखेदकम्पस्य शोभां बभार ॥ ८५ ॥

अरुणमिति । हेबाले चोषिताधरो तवाधरो मधुरिमायाः मधुरतामायाति अतिशयात् अरुणमपि आरक्तमपि विद्रुमस्य द्रुमः मुमगा इतिलोके । शस्तः । स इव मृदुलतरं कोमलमुल्यं चापि किसलयं पत्रं अधरीकरोति नैरुपम्यात् नीचैः करोति ॥ ८६॥

नयने वहनांनुखं जनाना-
मिह नानाविध मङ्गभङ्गिभाग्यम् ॥
मुखमेतु कथं तुलां सुशोभं
सुदृशो भङ्गुरसम्पदोम्बुजस्य ॥ ८७ ॥

सुदृशोज्झितरत्नमालया सुरतान्तश्रमबिन्दुमालया ॥
अलकेन च हेमकान्तिना विदधे काति रुचिः परस्परम् ८८

परपूरुषदृष्टिपातवज्रा-
हतिभीता हृदयं प्रियस्य सीता ॥
अविशत् परकामिनी भुजङ्गी
भयतः सत्वर मेव सोपि तस्याः ॥ ८९ ॥

नयनेति। नु वितर्के सुदृशः नयने खञ्जनानां नानाविधं अङ्गस्य भङ्गिः कला नृत्यादिकातस्य भाग्यं कथं वहतां नैव शब्दस्य पर्यायः कथमित्यत्रोभये सम्बध्यते। सुशोभं शोभनारात्रिसमं कला यत्रेति तन्मुखं भङ्गरादिवा स्थापनी संपत् प्रफुल्लतारूपा श्रीर्यस्मिन् तस्याम्बुजस्य तुलां कथं एतु कविभिः कथ्यते तथापि नैवोपमेत्यर्थः ॥ ८७ ॥

सुदृशेति। उज्झिता उत्तारिता रत्नानां माला यया सा तथा तया सुरतोत्थितयेत्यर्थः। सुरतान्तस्य श्रमः तस्य बिन्दूनां स्वेदानां माला यस्याः सा। तया च पुनः हेमकान्तिना अलकेन कुण्डलालंकृतेनालकेन कापि परस्परं रुचिः विदधे किं तु तस्या-लङ्कारपरा पुनरासक्तेत्यर्थः। विश्वसिता पूर्वानुभूता नायका ॥ ८८ ॥

परेति। परपुरुषो रावणः तस्य दृष्टिपात एव वज्राहतिस्ताडना तेन भीता प्रियस्य हृदयं अविशत् प्रविष्टाभूत्। सोपि सत्वरं

---

१ नयनानि वहन्तु इति पाठः। २ सदृशं कथमाननं सुशोभम्।

जम्बीरश्रियमतिलङ्घ्य लीलयैव
व्यानम्रीकृतकमनीयहेमकुम्भौ ॥
नीलाम्भोरुहनयनेधुना कुचौ ते
स्पर्द्धेते किल कनकाचलेन सार्द्धम् ॥ ९० ॥
अङ्गानि दत्वा हेमाङ्गि प्राणान् क्रीणासि चेन्नृणाम् ॥
उक्तमेतं न तु पुनः कोणं नयनपद्मयोः ॥ ९१ ॥
जितरत्नरुचां सद रदानां
सह वासेन परां मुदं दधानाम् ॥
अधरीकुरुते न साधुनासा

तस्याः जानक्याः हृदयं प्रविष्टःपरकामिन्येव भुनङ्गी तस्याः भवतः हेतोः ॥ ८९ ॥

जम्बीरेति । जम्बीरश्रियं लीलयैव क्रीडयैव अतिलङ्घ्य बाल्यमावृत्य पुनः व्यानम्रीकृतौ कमनीयौ हेम्नः स्वर्णस्य घटौ याभ्यां तौ ते कुचौ स्तनौ हे नीलाम्भोरुहनयने कनकाचलेन सार्धं स्पर्द्धेते स्वर्णगिरिसमौ जातौ युवतीत्वात्स्थूलावित्यर्थः ९०

अङ्गानीति । हे हेमाङ्गि गौरदेहे अङ्गानि अवयवानि दत्त्वा समर्थप्राणान् क्रीणासि तर्हि एतदुक्तं वाक्यं तु पुनः नयनपद्मयोः कोणं न नेत्रयातस्तु रतोत्सुकत्वादेव भवतीति ज्ञेयम् ॥ ९१ ॥

जितेति । जिता रत्नानां वज्रहीराणां रुचो यैस्तेषां रदानां दन्तानां वासेनाधरेण सह परां मुदं दधाना सति सा नायका ते अधरेसौ अधुना साहसाच्छालते शोभते तन्मौक्तिकं मधुना मद्येन न अधरीकुरुते साध्वी नासा यस्याः सा नशब्दात् ओष्ठी कुरुते ॥ ९२ ॥

---

१ नायंश्लोक एकस्मिन्नेव पुस्तके । २ जितमौक्तिसंपदां रदाना मित्यपि पाठः । ३ विरसादधरी करोति नासाम्, विशदादधरी करोति नासामिति पाठद्वयमपि ।

मधुना साहसशालि मौक्तिकं ते[1] ॥ ९२ ॥
निर्मालयभूयोनिजगौरिमाणं[2]
मानापमानं सहसैव यान्त्याः ॥
गृहेगृहे पश्य तवाङ्गवर्णा
मुग्धे सवर्णा वलयो लुठन्ति ॥ ९३ ॥
करिकुम्भतुलामुरोजयोः क्रियमाणां कविभिर्विशृङ्खलैः ॥
कथमालि शृणोषि सादरं विपरीतार्थविदो हि योषितः ९४
तिरस्कृतो रोषवशात्परिव्रजन्[3]
प्रियो मृगाक्ष्या शयितः पराङ्मुखः ॥

निर्मालयेति । हे मुग्धे निर्मालयभूयः निर्मलत्वाधिक्यं निज-गौरिमाणं गौरवर्णत्वं सहसा गृहेगृहे नायकाद्वारि मानश्चापमानश्च यत्र यस्यां क्रियायां यथा भवति तथा यान्त्या गच्छन्त्यास्तव सवर्णावलयः त्वत्समानां सखीनां अवलयः पंक्तयो लुठन्ति शेरते त्वं पश्य ॥ ९३ ॥

करीति । हे अलि त्वं कथं करिकुम्भयोस्तुलां साम्यतां उरजयोस्तनयोः विशृङ्खलैः अप्रमाणवादिभिः कविभिः क्रियमाणां शृणोषि सादरं नैव शृणुषे कथं यतो हि योषितो विपरीतार्थविदः विपरीतमर्थं जानन्त्यः करिकुम्भयोः प्राप्यत्वात् तस्य मुष्काङ्गकत्वात् हास्यकारिण्य इत्यभिप्रायः ॥ ९४ ॥

तिरस्कृत इति । मृगाक्ष्याः रोषवशात् तिरस्कृतः प्रियः

---

१ पञ्चनवतितमाग्रे प्रक्षिप्तः—
विलसत्याननं तस्या नासाग्रस्थितमौक्तिकम् ॥
अलक्षितबुधाश्लेषं राकेन्दोरिव मण्डलम् ॥ १ ॥

२ निभाल्यभूयो इति पाठान्तरम् । तदा निभाल्य सादरं दृष्ट्वेत्यर्थः । ३ परिष्वजन् रोषवशात्तिरस्कृत इ० पा० ।

किंदुःखितो सावीति कांदिशीकया
कदाचिदाच्युम्ब्य चिराय सस्वजे ॥९५॥
चैलाञ्चलेनाननशीतरश्मिम
संवृण्वतीनां हरिदीश्वराणाम् ॥
व्रजाङ्गनानां स्मरजातपाद-
मकाण्डसम्पात मियाय नीवी ॥ ९६ ॥

परिव्रजन् प्रस्थानं कुर्वन् सन् शयितः । कीदृशो पराङ्मुखः सन्मुखायोग्यः । पुनः कीदृशः प्रियः दुःखितः किं शब्दात् नैव दुःखितः कांदिशीकया भयद्रुतया नायिकया कदाचिदाचुम्ब्य चिराय सष्वजे समालिङ्गितः कांदिशीकः पतिः कांदिशीका नायका ॥ ९५ ॥

चैलेति । चैलस्य वस्त्रस्य शाटीकस्याञ्चलेनाग्रेणाननमेव शीतरश्मिश्चन्द्रः तं मुखचन्द्रं संवृण्वतीनां लज्जयावरणं कुर्वतीनां हरिदीश्वराणां हरितामीश्वराणां लोकेशस्त्रीणां । संभवन्तु सुरस्त्रियः इति भागवते । तस्मादेवाङ्गनारूपाणां यद्वा हरित् हरिः ईश्वरो यासां हारित् शब्दो हरिति पर्यायवाची कवीनाम् युक्तिबहुत्वात् हरित् हरिः नीलरूप इत्यर्थः वर्णव्याख्यापना ज्ञेया तादृशीनां व्रजाङ्गनानां गोपीनां स्मरजातकम्पात् कामाविर्भूतकम्पादिचिह्नात् नीवी अकाण्डसंपातो यत्र यस्यां क्रियायां यथा स्यात्तथा नीवीसंपातं इयाय प्रपतिता अकम्पशब्दो हरिकृतं चाश्चर्यं अकाण्डसंपातोत्र न किञ्चित् पतनं प्राप्ता नीवीशब्दोत्र परिधानवस्त्राधारसूत्रं नाडाइतिलोके । अत्र निर्लज्जा नायका ॥ ९६ ॥

अधरेण समागता इदानी-
मरुणिम्ना पिहितो हि शुक्लभावः ॥
हरितेन शितेन पक्ष्मलक्ष्म्याः
पुनरुल्लासमवाप जातपक्षः ॥ ९७ ॥

सरसिरुहोदर सुषमावधरित[2] बिम्बाधरे मृगाक्षि ॥
तव वदने मणिरदने ताम्बूलं केन लक्षयेम वयम् ॥ ९८ ॥

शयिता सविधेप्यनीश्वरस्य
स फलीकर्त्तुमहो मनोरथान् ॥
दयिता दयितानना‌म्बुजं
दरमीलन्नयना निरीक्षते ॥ ९९ ॥

अधरेणेति।जातः पक्षो यस्य स पक्षी तद्वत् हंस इव अधरेण समागता दन्ता इदानीं अरुणिम्नाऽधररक्तरागेण शुक्लश्वेतस्य भावः पिहितः आच्छादितो हि पुनः सहायवान् पक्षपातः हरितेन कृष्णेन शितेन रामेण पक्ष्मणां लक्ष्मीशोभा तस्या उल्लासं इति किं रामकृष्णदर्शनं चात्र सहायः हास्यकमत्र दन्तादिदर्शनभावम् । अत्र विदग्धा नायिका ॥ ९७ ॥

सरसीति।हे मृगाक्षि तव वदने मणिरदने श्वेतदन्तयुक्ते ताम्बूलं वयं केन लक्षयेम कीदृशे वदने सरसिरुहस्योदरवत्सुषमाकमलगर्भरक्तताया हेतोः तस्यावधरितं बिम्बं इव अधरं यत्रेति ९८

सपितेति।अनीश्वरस्य पूर्वं कृतपराक्रमस्यात एवाऽधुनाऽसमर्थसुरतोत्साहरहितस्य भर्त्तुः । सविधे संगे एकशय्यायामित्यर्थः ।

---

१ अधरेत्यत्र पाठान्तरम्—
अधरेण समागमाद्रदानामरुणिम्ना पिहितोऽपि शुक्लभावः ।
हसितेन सितेन पक्ष्मलाक्ष्याः पुनरुल्लासमवाप जातपक्षः ॥ १ ॥
इति । २ सुरभावधरित इ० पा० ।

वदनारविन्दसौरभलोभादिन्दीवरेषु निपतत्सु ॥
मय्यधरार्थिनि सुदृशो दृशो जयन्त्यतिरुषः परुषाः १००
किमिति कृशासि कृशोदरि किं तव परकीयवृत्तान्तैः ॥
कथय कथापि मुदे मम कथयिष्यति पथिक तव जाया१॥

इति श्रीपण्डितजगन्नाथविरचिते भामिनीविलासे शृङ्गारसमुल्लासे शृंगारसमुल्लासो द्वितीयः संपूर्णः ।

शयितापि सफलीकर्त्तुं पुनः सुरतं कर्त्तुं दयिता दयितस्य भर्त्तुराननमेवाम्बुजं मुखपद्मं दरं यथा स्यात्तथा मीलन्मुद्रिते नयने यस्याः सा सती निरीक्षते ॥ ९९ ॥

वदनेति। इन्दीवरेषु नीलकमलेषु वदनारविन्दस्य लोभात् निरपतत्सु सत्सु किंतु मुखेषोभयात् कमलेषु कृष्णेषु सत्सु दृशोऽधरार्थिनि मयि अतिरुषः परुषाः नीरसा इति यावत् अतिक्रोधिनो जयन्ति पुनरपि मुखं कमलोपमं कथ्यते ॥ १०० ॥

किमिति । हे कृशोदरि कृशमध्ये परकीयवृत्तान्तैः । किमिति कृशासि तव मुदे ममापि कथय । तदा सा प्राह । हे पथिक तव जाया कथां कथयिष्यति । नाहं जारभोग्या तव स्त्री चैवेत्यर्थः अत्र धृष्टा नायका ॥ १०१ ॥

इति नायकनायकासुखानां वचनानां परमाद्भुतार्थतत्वम् ।
प्रकटीकुरुते कविः पुराणो न महादेवपरिक्रियाविहीनः ।
रससारसमुल्लासं द्वितीयाख्यं हि पूर्णितम् ॥

इति श्रीपण्डितराजजगन्नाथविरचिते भामिनीविलासे शृङ्गारसमुल्लासे तत्पौत्रमाधवात्मजमहादेवसूरिविरचितायां भामिनीविलासदीपिकायां शृङ्गारसमुल्लासो द्वितीयः संपूर्णः ॥ २ ॥

[illegible]।

[illegible]स्तृतीयः।

[illegible] हन्त जाते
[illegible] रेव प्रतिबन्धुरत्ने ॥
[illegible] निजावस्थां
[illegible] वचनैस्तवाधिम् ॥ १ ॥
[illegible] पुरैव
[illegible] सरसावलोकैः ॥
[illegible] बाले
[illegible] शिशिरी करोषि ॥ २ ॥

[illegible] ॥
[illegible] ॥ १ ॥
[illegible] ॥
[illegible] ॥ २ ॥
[illegible] देवभट्टाचार्यः वै-
[illegible] सति
[illegible] गृहिण्यां दिवं
[illegible] निजाम-
[illegible] शमि-

[illegible] बाले
[illegible] सरसव-
[illegible] पुनः
[illegible]

सर्वेपि विस्मृतिपथं विषयाः प्रयाताः
विद्यापि खेदगलिता विमुखी बभूव ॥
सा केवलं हरिणशावकलोचना मे
नैवाप याति हृदयादधिदेवतेव ॥ ३ ॥
निर्वाणमङ्गलपदं त्वरया विशन्त्या
मुक्ता दयावति दयापि किल त्वयासौ ॥
यन्मानभामिनि निमीलयसि प्रभाते
नीलारविन्दमदभङ्गमदैः कटाक्षैः ॥ ४ ॥
धृत्या पदस्खलनभीतिवशाच्चिरं मे
यारूढवत्यसि शिलाशकलं विवाहे ॥
सा मां विहाय कथमद्य विलासिनीद्या-
मारोहसीति हृदयं दशधा प्रयाति ॥ ५ ॥

सर्वेपीति । सुगमम् ॥ ३ ॥

निरिति । हे दयावति त्वरया वेगेन निर्वाणमङ्गलपदं स्वर्गम् । निर्वाणो मुनिवन्ध्यादौ इत्यमरः। निर्वाणपदेन चिताग्निं विशन्त्या त्वया दया मुक्ता त्यक्ता । यत् यस्मात् मां नीलारविन्दस्य मद-भङ्गो यस्मात् स चासौ मदो येषां ते कटाक्षास्तैः कृत्वा प्रभाते मां न निमीलयसि न मारासि तस्मात् हे भामिनि ते युक्तं नेत्यर्थः ॥ ४ ॥

धृत्येति । विलापं कुर्वन्पूर्वभावं वर्णयन्नाह । या भामिनी धृत्या धैर्येण पदस्खलनस्य भीतिः पतनं तस्य वशात् मे करं हस्तं विवाहे शिलाशकलं गौरीप्रतिष्ठोपलं प्रतिरूढवत्यसि सप्तप्रदक्षिणामिषाद्धस्तानुगामिनी वस्त्रनिबद्धा सा मां विहाय जीवितं त्यक्त्वा कथं द्यामारोहासि स्वर्गं गमिष्यसि शेषं । सुगमम् ॥ ५ ॥

---

१. धृत्वेतिपाठः ।

निर्द्वेषणा गुणवती रसभावपूर्णा
सालंकृतिः श्रवणकोमलवर्णराजिः ॥
सा मामकीनकवितेव मनोधिरामा
रामा कदापि हृदयान्मम नापयाति ॥ ६ ॥
चिंता शशाम सकलापि सरोरुहाणा-
मिन्दोश्च बिम्बमसमां सुषमामयासीत् ॥
अभ्युद्गतः कलकलः किल कोकिलानां
प्राणप्रिये यदवधित्वमितो गतासि ॥ ७ ॥
सौदामिनीविलसितप्रतिमा न काण्डे
दत्त्वा कियन्त्यपि दिनानि महेन्द्रभोगान् ॥
मन्त्रोज्झितस्य नृपतेरिव राजलक्ष्मी-
र्भाग्यच्युतस्य करतो मम निर्गतासि ॥ ८ ॥

निरिति।निर्द्वीषणा निःशेषद्वीसहिता गुणवती चतुरा रसभावपूर्णा सालंकृतिः सकुण्डला श्रवणयोः कर्णयोः कोमला वर्णराजिः गौरतापंक्तिर्यस्याः सा मामकीना मामकीया कवितेव मनोभिरम्यते यस्यां सा रामा सुन्दरी रमणी मम हृदयान्नापयाति न दूरी भवति स्मरणमायातीत्यर्थः ॥ ६ ॥

चिन्तेति । हे प्राणप्रिये त्वं यत् यस्मात् अवधित्वं परलोकं गतासि ततस्तस्मादेव सकलापि सरोरुहाणां चिन्ता शशाम सुखनैरूपमत्वात् । च पुनः इन्दोः बिम्बं असमां श्रेष्ठां शोभां सुषमामपासीत् तत्याज किलेति । कोकिलानां कलकलः अभ्युद्गतः प्राप्तोर्ध्वगमनः ॥ ७ ॥

सौदामिनीति ।हे भद्रे भाग्यात् विधेः च्युतस्य मन्दभाग्यस्येत्यर्थः। मम करतो निर्गतासि मद्धस्तादन्यत्रापि गता मद्धस्तदुर्लभासि त्व-

१ निर्दूषणां इति पाठान्तरम् । २ राज्यलक्ष्मीः इति पाठान्तरम् ।

केनापि मे विलसितेन समुद्गतस्य
कोपस्य किंनु करभोरुवशंवदाभूः ॥
यन्मां विहाय सहसैव पतिव्रतापि
यातासि मुक्तिरमणीसदनं विदूरम् ॥ ९ ॥
काव्यात्मना मनसि पर्यणमन् पुरा मे
पीयूषसारसरसास्तव ये विलासाः ॥
तानन्तरेण रमणी रमणीयशीले
चेतोहरासु कविता भविता कथं नः ॥ १० ॥

मिति शेषः । कथं यथा सौदामिनी ताडित् विलसिता सुखकरी प्रतिमा कान्तिर्यस्यास्सा तथा सती काण्डे न बहु नैकत्र स्थिता चञ्चलत्वात् कियन्त्यपि दिनानि महेन्द्रभोगान् दत्त्वा पुनर्यथा निर्गच्छति सा यथा तथा त्वमित्यर्थः । पुनरुपम्यते मन्त्रोज्झितस्य मन्त्रविचाररहितस्य नृपत्तेः नराधिपस्य जरुपलक्ष्मीः वाक्यशासनेव यथा विचारं विना राजा वाचं न गृह्णन्त मन्त्रिणस्तथा मम त्वं गता व्यर्था जातेत्यभिप्रायः ॥ ८ ॥

केनेति । केनापि विलसितेन सुखेन कृत्वा समुद्गतस्य उद्धतस्य मे कोपस्य वशंवदा तज्जन्यहेतुभूतका मृताऽभूत्त्वं हे करभोरु तत् किंनु वदेत्यविस्मरणवाक्यम् । तत् यत् मां पतिं विहाय हसायं पतिव्रतापि विदूरं स्वर्गं मुक्तिरमणीसदनं परमेश्वरस्त्रीभोगायतनं गतासि ॥ ९ ॥

काव्येति । काव्यात्मना शुक्रात्मना मे मया मनसि पुरा ये तव विलासाः पीयूषसारवत्सरसाः अमृतफलवद्रसिकाः पर्यणमन् शिक्षिताः तेनानन्तरेण तैर्विना हे रमणि रमणीयलीला यस्याः तथा तत्सम्बुद्धौ हे सुखदे नः अस्माकं कविता कथं चेतोहरा भविता भविष्यतीति । त्वां विना कवितापि विस्मृता जातेत्यर्थः ॥ १० ॥

या तावकीनमधुरस्मितकान्तिकान्ते
भूमण्डले विकलतां कविषु व्यतानीत् ॥
सा कातराक्षि विलयं त्वयि यातवत्यां
राकाधुना वहति वै भवमिन्दिरायाः ॥ ११ ॥
मन्दस्मितेन सुधया परिषिच्य या मां
नेत्रोत्पलैर्विकसितैरनिशं समीजे ॥
सा नित्यमङ्गलमयी गृहदेवता मे
कामेश्वरी हृदयतो दयिता न याति ॥ १२ ॥
भूमौ स्थिता रमण नाथ मनोहरेति
सम्बोधनैर्यमधिरोपितवत्यसि द्याम् ॥
स्वर्गं गता कथमिव क्षिपसि त्वमेण-
शावाक्षि तं धरणिधूलिषु मामिदानीम् ॥ १३ ॥

येति। या राका पूर्णिमा तावकीनं मधुरं स्मितं मन्दहास्यं तेन कान्तिः शोभा तया कान्ते शोभने भ्रूमण्डले विकलतां कविषु व्यतानीत् विस्तारयामास। सा राकाऽधुना हे कातराक्षि त्वयि विलयं मृत्युं यातवत्यां प्राप्तायां सत्यां इन्दिराया वैभवं वहति चन्द्रे एव शोभामपयन्ति सुखाविष्काराद् ॥ ११ ॥

मन्देति। पूर्वं स्त्रीकृतोपकारं स्मरन्नाह। या मां मन्दस्मितेन सुधयाऽमृतरूपेण परिषिच्य प्रसन्नवदनेत्यर्थः नेत्रोत्पलैः नयन-कमलैः विकसितैः फुल्लैः कृत्वाऽनिशं सदा समीजे पूजयामास सा नित्यमङ्गलः पुत्रपौत्राद्युत्सवः तत्प्रचुरा नित्यमङ्गलमयी मे गृहदे-वता कामेश्वरी हृदयतो न याति। कीदृशी दयिता दया सञ्जा-ता यस्याः सा भक्तवत्सला देवी हृदयतो न याति ॥ १२ ॥

भूमाविति। भूमौ स्थिता जीविता यं मां द्यां अधिरोपितवती

१ विफलताम् इ० पा०।

लावण्यमुज्ज्वलमपास्ततुलं च शीलं
लोकोत्तरं विनयमर्थमयं वचश्च ॥
एतान्गुणान् शरणकान् कतमांश्च हित्वा
हा हन्त सुन्दरि कथं त्रिदिवं गतासि ॥ १४ ॥
कान्त्या सुवर्णवरया परयापि शुद्धा
नित्यं स्वकाः खलु शिखाः परितः क्षिपन्ती ॥
चेतोहरामपि कुशेशयलोचने त्वां
जानामि कोपकलुषो दहनो ददाह ॥ १५ ॥
कर्पूरवर्तिरिव लोचनतापहन्त्री
फुल्लाम्बुजस्रगिव कण्ठसुखैकहेतुः ॥

सुखतोऽविस्मृतस्वर्गकारिणी असि अधुना स्वर्गं गता मृता सती धरणिधूलिषु पार्थिवरेणुषु मां कथमिव महता कष्टेन क्षिपसि मामपि तत्र नयेत्यर्थः ॥ १३ ॥

लावण्येति । लावण्यरूपं उज्ज्वलं निर्मलं अपास्ततुलं निश्चलं शीलं लोकोत्तरं सर्वेभ्योप्यधिकं विनयं वचश्चार्थमयं सार्थकम् । एतान् शरणकान् शरणरूपान् कतमांश्चान्यान् गुणानपि हित्वा हन्त हा कष्टं महत् हे सुन्दरि कथं त्रिदिवं स्वर्गं त्वं गतासि ॥ १४ ॥

कान्त्येति । कान्त्या रूपेण सुवर्णवत्यापि गौरेणापि परया शुद्धापि निर्मलातिशयेनापि परितः स्वकाः शिखाः क्षिपन्तीति वाला रूपा शिखा चूडा केशपाशेत्यमरः।अत्र केशपाशोज्ञेयस्तान् क्षिपन्ती उद्ग्रथयन्ती पुष्पाद्यलंकरिष्यन्ती सा चेतसो हरा रतिरिव मयि हे कुशेशयलोचनेऽहं त्वां जानामि । कोपकलुषो दहनो ददाह अग्निरेव चितोद्भूतस्त्वां ददाहेत्यर्थः ॥ १५ ॥

---

१ एतान्गुणानशरणान् इति पाठान्तरम् ।

चेतश्च मत्कृतपदं कवितेव रम्या
रँम्यानरीभिरमरीव हि सा विरेजे ॥ १६ ॥
स्वप्नान्तरेपि खलु भामिनि पत्युरन्यं
या हृष्टवत्यसि न कञ्चन साभिलाषम् ॥
सा सम्प्रति प्रचलितासि गुणैर्विहीनं
प्राप्तं कथं कथय हन्त परं पुमांसम् ॥ १७ ॥
दयितस्य गुणाननुस्मरन्ती
शयने सम्प्रति या विलोकितासीत् ॥
अधुना खलु हन्त सा कृशाङ्गी
गिरमंगीकुरुते न भाषितापि ॥ १८ ॥

कर्पूरेति । कार्पासकृता कर्पूरयुक्तघृतयुक्ततूलवर्तिका वत् लोचनतापहन्त्री नेत्रयो रात्रिगतं तिमिरतापं हरतीति विग्रहे सा नायका फुल्लानि अम्बुजानि तेषां स्रक् मालेव कण्ठस्य सुखैको मुख्यो हेतुः चेतश्च चित्तमपि मयि कृतं पदं यस्य तत् तथा कविता रम्येव सेयमतास्सा रम्या नदीभिः स्त्रीभिः मानुषीभिः अमरीव हि सा विरेजे शचीव शोभामापत् ॥ १६ ॥

स्वप्नेति। नायका स्वप्नेपि मां पत्युरन्वयाद्दृष्टवत्यसि साभिलाषं सोपभोगं कञ्चनेति सम्प्रति अधुना गुणैर्विहीनं मां त्यक्त्वा परं पुमांसं मदन्यं जारमित्यर्थः। गुणैर्विहीनं सम्प्रति प्रचलिता त्वमसि हन्त युक्तिरत्राधन्या । परं पुमांसं परमेश्वरम् । गुणैर्विहीनं कृत्यं याता तद्वक्तियुक्तातो जाबालिसुतः श्रीभानुगो यो राधापतिः स च निषण्णः सो राधाकामुकः कृष्ण एव स्वतन्त्रनायकः इति ज्ञेयं श्रीभानुकस्यानमारः जगन्नाथाचार्यः तस्य भामिनीसख्या मन्त्रप्रस्तुतोयं श्लोकः ॥ १७ ॥

दयितस्येति । या दयितस्य नायकस्य गुणान् रतोत्साहा-

---

१ नम्यानरीभिः इ० पा० ।

सन्तापयामि किमहं धावन् धावन् धरातले हृदयम् ॥
अस्ति मम शिरसि सततं नन्दकुमारः प्रभुः परमः २०

रे रे मनो मम मनो भवशासनस्य
पादाम्बुजद्वयमनारतमामनन्तम् ॥
किं मां निपातयसि संसृतिमर्तमध्ये
नैतावता तव गमिष्यति पुत्रशोकः ॥ २१ ॥

मरकतमणिमेदिनीधरो वा
तरुणतरस्तरुरेष वा तमालः ॥
रघुपतिमवलोक्य तत्र दूरा-
दृषिनिकरैरिति संशयः प्रपेदे ॥ २२ ॥

तरणितनया किं स्यादेषा न तोयमयी हि सा
मरकतमणिज्योत्स्ना वा स्यान्न सा मधुरा कुतः ॥
इति रघुपतेः कायच्छायाविलोकनकौतुकै-
र्वनवसतिभिः कैः कैरादौ न संदधिरे जनैः ॥ २३ ॥

सन्तापयामीति । सुगमम् ॥ २० ॥

रे रे इति। मम मनः रे मूर्ख मनोभवस्य शासतेसौ शिवः तस्य पादाम्बुजं चरणारविन्दं अनारतं सततं आमनन्तं स्मरन्तं मां त्वं किं संसृतिगर्त्तमध्ये निपातयासि तवैतावता पुत्रशोको कामनाशशोकविलपनं न गमिष्यति ॥ २१ ॥

मरकतेति । तत्र दण्डकारण्यवने रघुपतिं श्रीरामचन्द्रं दूरात् अवलोक्य दृष्ट्वा ऋषिनिकरैरवाधूलसाद्यैर्दण्डकारण्यवासिभिरिति सन्देहः प्राप एषः दृश्यमानो रामः मरकतमणिः नीलमणिः पन्ना इति तेषां मेदिनीधरः महीध्रः तत्सदृशो वायमिति सन्देहः एषो वा पक्षान्तरे तरुणतरो घनछायः तरुस्तमालनाम्मा२२

तरणीति । इति अमुना प्रकारेण रघुपतेः कायस्य छायाविलोकने

चपलाजलदाच्युता लता वा
तरुमुख्यादिति संशये निमग्नः ॥
गुरुनिश्वसितैः कपिर्मनीषी
निरणैषीदथ तां वियोगिनीति ॥ २४ ॥

भूतिर्नीचगृहेषु विप्रसदने दारिद्र्यकोलाहलो
नाशो हन्त सतामसत्पथजुषामायुः समानां शतम् ॥
दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोपि सन्
किं कुर्वे जगदीश यत्पुनरहं दीनो भवानीश्वरः २५

कौतुकं येषां तैर्वनवसतिभिः मुनिभिः कैः न संदधिरे न सन्देहो वृतः । सन्देहमेनं विहृणोति एषा तरणितनया सूर्यपुत्रिका यमुनानदीत्यर्थः । किं स्यात्तर्हि सा नदी जलप्रचुरा इयं तु प्रभुमूर्त्तिरिति मरकतमणीनां ज्योत्स्ना वा स्यात् तर्हि सा मधुराशीता इयं तु न सुखावहत्वात् तेजस्त्वाच्चेयं रामतनुग्रीष्मशीता तस्मात् कुतः न स्यात् वर्त्तमानताऽत्र सूचिता ॥ २३ ॥

चपलादिति । मनीषी बुद्धिमान् मन्त्रीत्यर्थः। कपिर्हनुमान् गुरुनिश्वसितैः श्रेष्ठकारुण्यनिश्वासैरुपलक्षितोसौ तां वियोगिनि इति निरणैषीत् सीतारामचन्द्रोपकारं कृतवान्। कीदृशो हनुमान् चपलात्स्वभावात् अथ मङ्गलार्थं तरुमुख्यात् लतावान् हस्तकृतसहस्रलतावान् सन् तत् विषयात् च्युतः पतितः इति सन्देहे मग्नः वियोगिनि विरहिणि रामे तां जानकीं निरणैषीत् ॥ २४ ॥

भूतिरिति । नीचगृहेषु विरुद्धजनगेहमध्ये भूतिः सम्पत्तिः। विद्वत्सदने पण्डितराजगृहे दारिद्र्यस्य कोलाहलः कुतूहलः हन्तानुकम्पायां सतां नाशः परमहंसानां मृत्युः । अथ च असत्पथजुषां जाराणामायुः जीवितं समानां वर्षाणां शतं । तव दुर्नीतिं अन्यायं वीक्ष्य हे दैव कोप एव दहनोग्निस्तस्य ज्वालास्ताभि-

आमूलाद्रत्नसानोर्मलयवलयिता दा च कूलात्पयोधे-
र्यावन्तः सन्ति काव्ये प्रणयनपटवस्ते विशङ्कं वदन्तु ॥
मृद्वीकामध्यनिर्यन्मसृणरसझरीभाग्यभाजां नृपाणां
वाचामाचार्यतायाः पदमनुभवितुं कोस्ति धन्यो मदन्यः२६

र्जटालोवगुण्ठितः सन् क्रोधोपहतोपि भवन् सन् हे जगदीश पुनरहं क्रुद्धोपि किं कुर्वे किं करिष्यामि किंकर एव भवामीति न तु रिपुरावणादिवदिति भावः यत् यस्मादहं दीनः दरिद्रः भवान् त्वं ईश्वरः लक्ष्मीनाथः तस्मादहं असमर्थः । समर्थस्त्वमेवेति भावः ॥ २५ ॥

आमूलादिति । रत्नसानोर्हेमाद्रेः सकाशात् वलयं वर्त्तुलं वलयवदाचरितं सुगन्धवत्त्वात् पयोधेः सकाशात् समुद्रकूले दावो वह्निः कूलशब्दः पूर्वं ग्राह्यः तद्वच्छीतलत्वात् समुद्रतटे वह्निः शाम्यति वह्निशङ्का कृपीटभवा बोध्या यावन्तः बहवः सन्ति कवेर्भावः काव्यं तस्य प्रणयने रचनायां पटवश्चतुरास्ते विशङ्कं वदन्तु वादं कुर्वन्तु तथापि। मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति चेत्यमरः । तस्याः मध्ये निर्यत् निष्क्रष्यत् मसृणः चिक्कणो रसः तस्य झरी निरन्तरा वृष्टिः तस्या भाग्यं सुखं भजतां सेवतां पुरुषाणां मध्ये नृपाणां महमदक्षोणिपतीनां सभायामित्यर्थः । मदन्यः कः अहमेव । आचार्यतायाः राजपदव्याः वाचां पदं पण्डितराज इति क्षोणीशचक्रवर्त्तिधृतं स्वकं नाम अनुभवितुं भोक्तुं धन्योस्ति समर्थोस्ति नान्यः यादृशः पण्डितराजः तादृशो न पण्डितः दृष्ट इति महम्मदप्रशंसा ॥ २६ ॥

---

१ रसझरी माधुरीभाग्यभाजाम् इ० पाठो वा ।

गिरां देवी वीणागुणरसनहीनादरकला
यदीयानां वाचाममृतमयमाचामति रसम् ॥
वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-
रधुन्वन्मूर्द्धानं नृपशुरथवायं पशुपतिः ॥ २७ ॥
मद्वाचमङ्कुशविषादमनादरेण
मात्सर्यभुग्नमनसां तरसा खलानाम् ॥
काव्यारविन्दमकरन्दमधुव्रतानां
मास्येषु धास्यतितमां कियतो विलासान् ॥ २८ ॥
मधुद्राक्षासाक्षादमृतमथ वामाधरसुधा
कदाचित्केषां चिन्न खलु विदधीरन्नपि मुदम् ॥
ध्रुवं ते जीवन्तोप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः॥ २९ ॥

गिरामिति । तस्य वचः आकर्ण्य श्रुत्वा मूर्द्धानं अधुन्वन् पशुपतिः रुद्रः नृपशुरथ वा क्षितीशो महम्मदः गिरां देवी सरस्वती वीणागुणस्य रसनं शब्दो तेन हीनादरकला यस्याः यदीयानां यस्य जातानां वाचां अमृतमयं रसं आचामति आचमनं करोति पिबतीति श्रवणसुभगं कर्णमनोहरम् ॥ २७ ॥

मदिति। मद्वाचं अङ्कुशवद्विषादं दुःखं यथा स्यात्तथा हस्तिनां अङ्कुशं यथा तथैव पण्डितानां मम वाणी विषादकरी तत् यथा स्यात्तथा ऽनादरेण मात्स्यर्यः तेन द्वेषेण भग्नं मनो येषां कुटिलहृदयाणामित्यर्थः । खलानां दुष्टानां वादिनामित्यर्थः काव्यमेवारविन्दं सरोजं तस्य मकरन्दः पुष्परसः मधुवत् मद्यवत् तस्मिन् व्रतो येषां तेषां कवीनामित्यर्थः । आस्येषु विलासान् कतमान् धास्यति नैव धास्यतीत्यर्थः ॥ २८ ॥

मध्विति। मधुद्राक्षा क्षौद्रं द्राक्षा च साक्षाद्रसरूपा अमृतं अथ

निर्माणे यदि मार्मिकोसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ॥
काव्यं तर्हि सखे सुखेन कथय त्वं सन्मुखे माद्दशां
नो चेदुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः ३०
धुर्यैरपि माधुर्ये द्राक्षाक्षीरेक्षुमाक्षिकादीनाम् ॥

वामायाःस्त्रियोधरसुधा जगन्नाथस्य भणितिः कृतिः येषां कदाचित् केषांचित् न मुदं विदधीरन् अपि शब्दात् द्राक्षादिका यदिमिष्टत्वमायाति तदा मत्कवितापि रसकरी भवति येषां काव्यं भामिनीविलासाख्यं आनन्दं न जनयति ते ध्रुवं जीवन्तोपि अहह मृतकाः जीवन्मृतका इत्यर्थः । यतः शास्त्रे मन्दमतयः कुबोधाः ॥ २९ ॥

निरिति । हे सखे त्वं अत्यन्तपाकेन फलावसरेण द्रवत् स्रावयुक्तं मृद्वीकामधुमिष्टरसः तस्य माधुरी तस्याः मदपरीहारायोद्धुराणां धुरन्धराणां गिरां वाचां निर्माणे रचनायां यदि मार्मिकोसि मर्मज्ञोसि तर्हि माद्दशां कवीनां सन्मुखे सुखेन काव्यं कथय चेन्नोस्ति तर्हि आत्मना दुष्कृतमिव स्वान्तात् कृतं बहिर्मा कृथाः मा हृदयाद्बहिः कुरु मा वदेत्यर्थः ॥ ३० ॥

माधुर्यैरिति । माधुर्ये रसे मिष्टे धुर्यैः पुंभिः मुख्यैर्द्राक्षा क्षीरं इक्षु माक्षिकं क्षौद्रं तदादीनां यथा माधुरी तथा पण्डितराजस्य क-

---

१ अत्रायं त्रिंशत्तमाग्रे प्रक्षिप्तः—

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्यं वास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयद् वाचां विपाको मम ॥ १ ॥

वन्द्यैव माधुरीयं पण्डितराजस्य कवितायाः ॥३१॥
शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि संभाविता
दिल्लीवल्लभ पाणिपल्लवतले नीतं नवीनं वयः ।
संप्रत्युज्झित वासनं मधुपुरीमध्ये हरिः सेव्यते
सर्वं पण्डितराजराजितिलकेनाऽकारि लोकाधिकम्३२
दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया ॥
मदीयपद्यरत्नानां मञ्जूषेयं कृतिर्मम ॥ ३३ ॥

इति श्रीमत्पण्डितजगन्नाथविरचिते भामिनीविलासे शान्तविलासश्चतुर्थः ॥ ४ ॥

विताया माधुरी पदप्रणयना यमकादियुक्ता सालङ्कारा सरसेत्यर्थः । तेभ्योन्यमाधुरीभ्योपि तत्कवितामाधुरी सर्वरसेति तात्पर्यार्थः ॥ ३१ ॥

इति श्रीमदखिलाङ्घ्रिवेगीयनाव्यककुत्कुलावतंसजागेश्वरसूरिपुत्रेण पण्डितराजाख्यसूरिणा विरचिते भामिनीविलासे चतुर्थे शान्त्याख्ये विलासे तत्पौत्रमाधवदीक्षितसूरिसूनुमहादेवसूरिदीक्षितपण्डितराजविरचिते भामिनीविलासभूषणे शान्तिकाख्यानं सम्पूर्णम् ।

—००—

मुद्रितमेतन्मुम्बय्यां गोपाळनारायणजनतया स्वकीये मुद्रालये ।

BHAMINIVILAS.

ANYOKTI SAMULLASA.

My nectar-like poem is on this earth sweet to its utmost limit, is produced by churning the ocean of literature and is the giver of much pleasure to those who drink (read) it.

(1). The elephants, whose temples are soiled with rut, are heard (to have run away) to the end of the quarters; the female elephants are an object of pity; while the deer are indeed not a footing of equality. Where should then this lord of the beasts exhibit the sharpness of his nails, the ends of which are incomparable.

(2). Tell (me) how the prince of swans, who had passed his former days on the Manas Lake in the water, made fragrant by the pollens falling from the full blown lotuses, should now remain in the water of a puddle full of frogs, gathered together.

(3). When the chakoras, with their eyes unsteady on account of thirst, are looking towards the East; when the Moon-lotuses are giving up their silence (are blowing open); when cupid is twanging his bow and when the anger of proud women is on the point of giving way; is it, O creator, fit for a sheet of cloud to appear on the Moon?

(4). O full blown lotus, let the bees tasting your indescribably sweet juice, dripping downwards, hum agreeably. (But) this other (viz.) the wind spreading your fragance in every direction, is a disinterested friend of yours.

(5) O lotus, though the bee, come to you to enjoy your fragrance, got confined, still when freed (from his confinement) he hums your glory; whereas the wind having deprived you of all your essence makes himself famous (fragrant.)

(6). O Kutaj, when the bee by chance approaches (thee) dont show disrespect to him; (for) he is held in high respect by lotuses full of juice.

(7). O Cuckoo, pass away the dull days by resorting to any other forest, until a mangotree, surrounded by bees, puts forth its blossom.

(8). O lotus, why do you distress your mind with the thought that you are disregarded by ignorant cranes. May the bees, the appreciators of your fully developed juice, live long on earth.

(9). O well, never give yourself up to sorrow with the thought "I am exceedingly low (नीच)"since you have your bottom (हृदय) full of very sweet water (रस) and you take the string (गुण) of others to help it up.

(Taking the words नीच, हृदय, रस, ग्रहीतृ, & गुण to mean poor, heart, love, appreciator, and merit respectively the version would stand thus:-O man never give yourself up to sorrow with the thought " I am exceedingly poor (नीच) " since thy heart (हृदय) is full of love (रस) and thou art the appreciator of merits (गुण) in others.)

(10). Alas! how indeed did the bee, who passed his days in the full-blown lotus, containing much juice, entertain a desire for kutaj tree ?

(11). O Sandal-tree, for whose power of description can this greatness of yours be a subject (who can describe your greatness)? since, by emitting fragrance you gratify the snakes (though) vomitting venom.

(12). O sandalwood; what intelligent (sensible) person can imitate this action (manner) of yours since though powdered you give pleasure by means of your fragrance even to those who reduce you to atoms.

(13). O swan if you even are disposed to be idle in separating milk from water, who else on earth will fulfil (adhere to) the family vow?

(14). Glory to the persons of indescribable greatness whose exterior is like the edge of a sword and who are more ferocious than the most frightful snakes, but who are at heart so mild as evidently to become preceptors for teaching mildness to grapes.

(15). O full-blown lotus, let the bees, enjoying your juice at their own pleasure, produce humming; but none else in this world than the wind is well versed in spreading the fragrance in all directions.

(16). Blessed is the existence of this lake on the road whose body is reduced every day by such constant distressing thoughts "when I shall be soon after dried up by the scorching rays of the Summer-sun, whom will this crowd of travellers go to, when oppressed with excessive heat." Fie upon the existence of the ocean.

(17). O tank when you are reduced (dried up) the birds around might take to the path of sky the bees might resort to the blossom of mangotrees; but alas! what state would the most miserable fish be reduced to.

(18). O lotus, dont think that the desire for fragrance in this wind is like that of the bee; (for) though high minded, he has stooped to beg only for the pleasure of the people.

(19). O Málati, dont remain shut, when the bee is sweetly humming; (for) even the trees of heaven, the foremost among the charitable, bear him on their heads with profound respect.

(20). O Sandal-tree what to say to this insolence of yours,

since you bear (on your body) those very serpents by whom you, though possessed of many good qualities, are made unfit to be served by the good.

(21 L. R.). The whole forest was closely searched; all the trees around were also seen; (but) none, O Mango tree, was seen by the bee to resemble thee.

(21). O bee, what a sensible creature must you be, if you desire to fly to yet another flower, after having once sat (enjoyed) on a flower of the trees of heaven, before which no mention of any other fragrance can be made (which defies any other fragrance).

(22). O river, holy because of taking your source from the Vindiya Mountains, think well if it be proper for you to accept of the gutter water, even though you be dried up.

(23). O Barbur tree, tell (me) what attraction should draw us to you (for) you are never seen with the charms of leaves, fruits or flowers, but on the contrary are covered with thorns.

(24). O cuckoo, while alone in this forest, you should never utter sweet tunes, so that the ruthless crows may not kill you mistaking you to be one of their own kind.

(25). O Father of Parvatee, for what attraction, do you sustain (the weight of) this snow drift, which on earth, destroys the beauty of a number of trees and causes affliction to many living beings.

(26). O young one of an elephant never show any disrespect to this bee, coming to thee; for he is welcome to take his seat upon the head of even the best of elephants, who appear charming on account of (flowing) rut.

(27). This fondness for other flowers, in a bee all of whose desires are fully gratified by the enjoyment of the fragrance of flowers of the celestial trees, is a matter of great ridiculousness.

(28). Indeed cuckoos are inquired, all trees around are examined but O mango tree no equal to thee has been found to the bee.

(परपुष्टाः so called because they are nourished by another *i. e.* by a crow).

(29). O gardener is it possible for the clouds which pour down heavy showers of water from all sides, to work that development in this tree, which is effected with tenderness by thee with little water in the summer when the sun is very hot?

(Frugal timely meals are more wholesome than continual sumptuous feasts.) वार् N. water.

